अथ दशमोऽध्यायः

श्रीशुक उवाच

खट्वाङ्गाद् दीर्घबाहुश्च रघुस्तस्मात् पृथुश्रवाः । अजस्ततो महाराजस्तस्माद् दशरथोऽभवत् ॥ १ ॥
तस्यापि भगवानेष साक्षाद् ब्रह्ममयो हरिः ।
अंशांशेन चतुर्धागात् पुत्रत्वं प्रार्थितः सुरैः । रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया ॥ २ ॥
तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः । श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥ ३ ॥

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरिन्द्रानुजाभ्याम् ।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषाऽऽरोपितभ्रूविजृम्भ-
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवताद्नः ॥ ४ ॥

विश्वामित्राध्वरे येन मारीचाद्या निशाचराः । पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुङ्गवाः ॥ ५ ॥

यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयंवरगृहे त्रिशतोपनीतम् ।
आदाय बालगजलील इवेक्षुयष्टिं सज्ञीकृतं नृप विकृष्य बभञ्ज मध्ये ॥ ६ ॥
जित्वानुरूपगुणशीलवयोऽङ्गरूपां सीताभिधां श्रियमुरस्यभिलब्धमानाम् ।
मार्गे व्रजन् भृगुपतेर्व्यनयत् प्ररूढं दर्पं महीमकृत यस्त्रिरराजबीजाम् ॥ ७ ॥
यः सत्यपाशपरिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः ।
राज्यं श्रियं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसङ्गः ॥ ८ ॥

कृष्णप्रिया व्याख्या

अन्वयः—महाराजः खट्वाङ्गात् दीर्घबाहुः तस्मात् पृथुश्रवाः रघुः ततः अजः तस्मात् दशरथः अभवत् ॥ १ ॥ तस्य अपि साक्षात् एषः भगवान् ब्रह्ममयः हरिः सुरैः प्रार्थितः रामलक्ष्मणभरतशत्रुघ्नाः इति संज्ञया अंशांशेन चतुर्धा पुत्रत्वम् अगात् ॥ २ ॥ ❀ ❀ राजन् तत्त्वदर्शिभिः ऋषिभिः भूरि वर्णितं तस्य सीतापतेः अनुचरितं त्वया मुहुः श्रुतं हि ॥ ३ ॥ ❀ ❀ गुर्वर्थं त्यक्तराज्यः यः प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथरूजः शूर्पणख्याः वैरूप्यात् प्रियविरहरुषा आरोपितभ्रूविजृम्भत्रस्ताब्धिः बद्धसेतुः खलदवदहनः कोशलेन्द्रः नः अवतात् ॥ ४ ॥ ❀ ❀ येन विश्वामित्राध्वरे लक्ष्मणस्य पश्यतः एव मारीचाद्याः निशाचराः नैर्ऋतपुङ्गवाः हताः ॥ ५ ॥ ❀ ❀ नृप बालगजलीलः यः सीतास्वयंवर-गृहे लोकवीरसमितौ त्रिशतोपनीतम् उग्रम् ऐशं धनुः इक्षुयष्टिम् इव आदाय सज्जीकृतं विकृष्य च मध्ये बभंज ॥ ६ ॥ अनुरूपगुणशीलवयोऽङ्गरूपाम् उरसि अभिलब्धमानां सीताभिधां श्रियं जित्वा मार्गे व्रजन् भृगुपतेः प्ररूढं दर्पं व्यनयत् यः महीं त्रिः अराजबीजाम् अकृत ॥ ७ ॥ ❀ ❀ यः च स्त्रैणस्य अपि सत्यपाशपरिवीतपितुः निदेशं शिरसा जगृहे मुक्तसङ्गः असून् इव राज्यं श्रियं प्रणयिनः सुहृदः निवासं त्यक्त्वा सभार्यः वनं ययौ ॥ ८ ॥

---

१. ऽनुरु० ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

दशमे प्राह खट्वांगवंशे श्रीरामसंभवम् । तच्चरित्रं च लंकेशं हत्वायोध्यागमावधि ॥ १ ॥

खट्वाङ्गाच्च दीर्घबाहुः ॥ १-२ ॥ ❀ ❀ ऋषिभिर्वाल्मीकिमुख्यैर्भूरि वर्णितं त्वया मुहुः श्रुतं तथापि संक्षेपतः कथ्यमानं शृणु ॥ ३ ॥ ❀ ❀ "ग्रंथकोटिभिराकीर्णमद्भुतं रामविक्रमम् । अध्यायद्वयतो वक्ष्यन्नेकश्लोके समस्यति ।" स कोशलेन्द्रः श्रीरामो नोऽस्मानवतात्पातु । कथंभूतः । यो गुर्वर्थं पितुः सत्यस्य पालनार्थं त्यक्तराज्यः सन् । पद्मवदतिसुकुमाराभ्यां पद्भ्याम् । तदेवाह । प्रियायाः पाणिनाऽपि स्पर्शे नास्ति क्षमा ययोस्ताभ्यां प्रतिवनं व्यचरत् । हरींद्रो हनुमान्सुग्रीवो वाऽनुजो लक्ष्मणस्ताभ्यां मृजिताऽपनीतापथरुजा मार्गश्रमो यस्य । शूर्पणख्या वैरूप्यात्कर्णनासिकाच्छेदाद्धेतोः तया प्रलोभितेन रावणेनापहारात्प्रियेण कलत्रेण विरहस्तेन रुट् तयाऽऽरोपितयोर्भ्रुवोर्विजृंभेणैव त्रस्तोऽब्धिर्यस्मात् । ततस्तद्विज्ञापनेन बद्धः सेतुर्येन । ततः खला रावणादय एव दवो वनं तस्य दहनः ॥ ४ ॥ ❀ ❀ संक्षेपतो वर्णितं रामचरितमादित आरभ्य विस्तरेणाह । विश्वामित्राध्वर इत्यादिना यावदुत्तराध्यायसमाप्ति । पश्यत एव लक्ष्मणस्य । तमप्यनपेक्ष्यैव हता इत्यर्थः । यच्छब्दानां स कोशलेंद्रोवतादित्यनेनैवान्वयः ॥ ५ ॥ ❀ ❀ लोके ये वीरास्तेषां समितौ समाजे ऐशं त्रैयंबकं धनुरित्तु-धनुरित्तुयष्टिमिव लीलयैवादाय सज्जीकृतमारोपितं विकृष्य मध्ये बभंज । हे नृप । उग्रं कठिनं गरिष्ठम् । तदाह । वाहकानां त्रिभिः शतैरुपनीतम् । बालगजस्य लीलेव लीला यस्य सः ॥ ६ ॥ ❀ ❀ अनुरूपाणि स्वयोग्यानि गुणशीलादीनि यस्यास्तां सीतासंज्ञां पूर्वमुरस्यभिलब्धो मानो यया तां श्रियं जित्वा धनुर्भंगमहानादश्रवणक्षुभितस्य भृगुपतेर्दर्पं व्यनयदपनीतवान् । कथंभूतस्य । त्रिःसप्तकृत्वो राजबीजशून्यां महीं योऽकरोत्तस्य ॥ ७ ॥ ❀ ❀ इदानीं गुर्वर्थं इति श्लोकं विवृण्वन्नाह । य इति कदाचित्कैकेय्यास्तुष्टेन राज्ञा त्वदपेक्षितं दास्यामीति प्रतिश्रुतम् । ततः श्रीरामस्य युवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य च वने वासः प्रार्थितस्तदा सत्यपाशेन परिवीतस्य पितुर्निर्देशमाज्ञां शिरसा जगृहे । ततो राज्यादिकं त्यक्त्वा सभार्यो वनं ययौ । दुस्त्यजस्यापि सहर्षत्यागे दृष्टांतः । मुक्तसंगा योगी असून्प्राणानिवेति ॥ ८ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

तच्चरित्रं श्रीरामचरितम् (१) । तस्मादीर्घबाहोः । पृथुश्रवा महायशा इति रघुविशेषणम् । ततो रघोः । तस्मात् अजात् ॥ १ ॥ ❀ ❀ तस्यापि दशरथस्यापि । एव इति बुद्धिसन्निहितत्वात् । साक्षाद्ब्रह्ममयः मयडत्र स्वरूपे । भक्तार्तिहरत्वात्पृथ्वीभारहरत्वाच्च हरिः । साक्षादित्युक्तेः परिपूर्णस्वरूप एवावतीर्णो न त्वंशत इति ध्येयम् । ('एते चांशकलाः पुंसः' इत्यत्र चकारश्रीरामसमुच्चयार्थक एवान्यथा 'ते ह्यशकलाः पुंसः' इत्थमेव वदेदिति भावः) । "रमंते योगिनोऽनंतनित्यानंदे चिदात्मनि । इति रामपदेनासौ परब्रह्माभिधीयते ।" इत्यादिना रामतापनीयाथर्वशिरशि श्रीरामस्य साक्षाद्ब्रह्मतोक्तेः । अंशांशेन पायसरूपवैष्णवतेजोंशांशेनेत्यर्थः । तदुक्तं कालिदासेन "स तेजो वैष्णवं पत्न्योर्विभजे चरुसंज्ञितम् । द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् । अर्चिता तस्य कौशल्या प्रिया केकयवंशजा । अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः । ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः । चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे । सा हि प्रणयवत्यासीत्सपत्न्योरपि" इति रघुवंशे । अत एव पाद्मे "युगं बभूवतुस्तत्र सुस्निग्धौ रामलक्ष्मणौ । तथा भरतशत्रुघ्नौ पायसांशवशात्स्वतः ।" इत्युक्तम् । चरोरर्द्धार्द्धभागाभ्यां स्वलब्धांशसंबंध्यर्द्धार्द्धभागाभ्यामित्यर्थः । यद्वा पायसांशांशेन स्वयं पायसांशेन भरतादिरूपमित्यर्थः । तदुक्तं वाल्मीकीये "कौशल्यायै नरपतिः पायसार्द्धं ददौ तदा । अर्द्धादर्द्धं ददौ चापि सुमित्रायै नराधिपः । केकय्यै चावशिष्टार्द्धं ददौ पुत्रार्थकारणात् । प्रददौ चावशिष्टार्द्धं पायस्यामृतोपमम् । अनुचिंत्य सुमित्रायै पुनरेव महामतिः । एवं तासां ददौ राजा भार्याणां पायसं पृथक् ।" इति बालकांडे । प्रथमोऽर्द्धशब्दः समविभागार्थकः । अर्द्धादर्द्धं तुरीयांशमित्यर्थः । अवशिष्टार्द्धमवशिष्टस्य तुरीयांशस्यार्द्धमष्टमांशमित्यर्थः । पुनरवशिष्टार्द्धमष्टमांशमित्यर्थः । अनुचिंत्येति । कैकेय्यपेक्षया ज्येष्ठत्वं कौशल्यापेक्षया कनिष्ठत्वं च सुमित्राया विचार्य पादोनार्द्धांशदानमिति भावः । सुरैः प्रार्थितश्चतुर्द्धा पुत्रत्वमगात् । तदुक्तम् । "राज्ञो दशरथस्य त्वमयोध्याधिपतेर्विभो । धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः । अस्य भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च । विष्णो पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधम् ।" इति वाल्मीकीये । आत्मानं सोपकरणमात्मानमित्यर्थः । "अन्येद्युः पांचजन्यात्मा कैकेय्यां भरतोऽभवत् । तदन्येद्युः सुमित्रायामनंतात्मा च लक्ष्मणः । सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत्त्रिये ।" इति पाद्मोक्तेः । अत्रात्मानमित्युक्त्या शंखचक्रानंतानामपि भगवद्रूपतैव सूचिता । चातुर्विध्यविधानं रावणेंद्रजिल्लवणगंधर्वाणां चतुर्णां वधार्थमिति भावः । रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञयेति । एकस्यैव संज्ञाभेदेप्यर्थैक्यादैक्यमेव । अरायीति रा॒ः बाहुलकात्कर्मणि विच् । राः गृहीता पत्नीत्वेन मा लक्ष्मीस्सीता येन सः रामः । 'सीता साक्षात्स्वयं लक्ष्मीः' इत्युक्तेः । एवं रा आत्ता

मारीचवधावसरे मा सीता रक्षणार्थं रामाज्ञया येन स रामो लक्ष्मणोपि राम एव। तथा रा आत्ता मा राज्यलक्ष्मीर्निक्षेपभूता येन स भरतोपि राम एव। तथा रा आत्ता मा शोभा लवणवधमथुरानिवेशजा येन स शत्रुघ्नोपि राम एव। यद्वा—रं रेफममंति प्राप्नुवन्तीति चत्वार एव रेफाढ्यनामवत्त्वाद्रामा एव लक्ष्मणे लकारोऽपि रेफ एव रलयोरैक्यात्। तथा लक्ष्मीर्विद्यतेऽस्येति लक्ष्मणः श्रीरामोऽपि लक्ष्मण एव "लक्ष्म्या अच्च।" लक्ष्माणि युद्धपतितशस्त्रांकानि यद्वा— परममंगलश्रीरामसेवाबोधकहस्तरेखादीनि यस्य स लक्ष्मणः सौमित्रिः। तथा भरतोऽपि लक्ष्मीः सौभ्रात्रलक्षणा कीर्त्तिर्विद्यतेऽस्येति लक्ष्मण एव 'न भरतेन समो भ्राता' इति श्रीवाल्मीक्युक्तेः। तथा शत्रुघ्नोऽपि लक्ष्माणि राजचिह्नानि छत्रचामरादीनि संत्यस्येति लक्ष्मण इति लक्ष्मण एव 'शत्रुघ्नः श्वेतछत्राढ्यश्चामरांदोलितो ययौ' इति पाद्मोक्तेः। एवं भरेण राज्यभरेण ताम्यति ग्लायतीति भरतः। भरपूर्वात्ताम्यतेर्डः। वृत्तं चैतद्रामायणे स्पष्टम्। तथा भरात्तारयति भुवमिति। श्रीरामोऽपि भरत एव "यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितः" इति ब्रह्मांडोक्तेः। तथा भरं भरणं तनोति वन्यमूलफलाद्यानयनेन श्रीसीतारामयोर्वनवास इति लक्ष्मणोऽपि भरत एव। तथा भरं ज्येष्ठभ्रात्रनुरोधेन नानादुःखसहनभारं तनोति निजांग इति शत्रुघ्नोऽपि भरत एवेति। एवं शत्रु लवणाख्यं हंतीति शत्रुघ्नः। तथा शत्रून् रावणप्रभृतीन्नागद्वेषादीन्वा हंतीति रामोऽपि शत्रुघ्न एव तथा शत्रून् गंधर्वादीन्हंतीति भरतोऽपि शत्रुघ्न एव। एवं शत्रून्मेघनादादीनालस्यं वा हंति सदा श्रीरामसेवायां प्रवृत्तत्वाल्लक्ष्मणोऽपि शत्रुघ्न एवेति कृत्वा चतुर्णां नामार्थसाम्येनैक्यमेवेति तत्त्वम् ॥ २ ॥ ❀ ❀ तस्य चतुर्विधात्मनः श्रीरामस्य ॥ ३ ॥ ❀ ❀ आकीर्णं व्याप्तम्। वर्णितमिति यावत्। "चरितं रघुनाथस्य शतकोटिप्रविस्तरम्। एकैकमक्षरं पुंसां महापातकनाशनम्।" इत्युक्तेः। समस्यति संक्षेपेण कथयति (१)। सत्यस्य केकैयीदत्तवरदानद्वयस्य। तदेवातिसुकुमारत्वमेव। प्रियायाः सीतायाः। प्रतिवनं बहुवनम्। हरीणां वानराणामिंद्रः। परमसुखदः परमसुखदत्वेपींद्रपदं राज्येवोचितमिति चेदाह—सुग्रीवो वेति। शूर्पणख्याः सीताभक्षणप्रवृत्ताया रावणस्वसुः तया शूर्पणख्या। प्रलोभितेन सीतासौंदर्यश्रवणोत्सादिततदानयनलोभेन। कलत्रेण सीतारूपेण विरहो वियोगः। रुट् रोषः। आरोपितयोरुद्यतां नीतयोर्भ्रुवोर्भ्रूदेशयोः। विजृंभेण प्रसरणेन। त्रस्तो भीतः। तत अब्धिर्भीतेरनंतरम्। तद्विज्ञापनेनाब्धिप्रार्थनया। सेतुः आलिः। 'सेतुरालौ पुमान्स्त्रियाम्' इत्यमरः। ततः सेतुबंधोत्तरम्। 'दवदावौ वनानिलौ' इत्यमरः। दहनो वह्निः ॥ ४ ॥ ❀ ❀ इत्यर्थ इति। केवलस्यैव सर्वसमर्थत्वान्नान्यापेक्षा तस्यास्तीति भावः। येन रामेण ॥ ५ ॥ गरिष्ठमतिदुर्भरम्। तदेव गरिष्ठत्वमेव। बाहूकानां नाराणाम्। इक्ष्वयष्टिं रसालदंडम्। "इक्षुरित्वच्छायते ज्ञाते गुडादीनां च कारणे" इति निरुक्तिः ॥ ६ ॥ ❀ ❀ पूर्वं चिह्नरूपेणोरसि वक्षसि। भृगुपतेः परशुरामस्य। प्ररूढ प्रकृष्टम् ॥ ७ ॥ ❀ ❀ पूर्वोक्तं स्मारयति—इदानीमिति। परिवीतस्य परिवेष्टितस्य। पितुर्दशरथस्य। निवासमयोध्याम्। मुक्तसंग इति। "असंगो ह्ययं पुरुषः" इति श्रुत्यर्थमाह। असूनिति त्यागानर्हतामाह ॥ ८ ॥

अन्वितार्थप्रकाशिका

श्रीरामो दशमे हत्वा रावणं सीतया सह। स्वपुरीमागमत्तत्र श्लोकाः पर्वतमार्गणाः (५७)

उवाचेति द्वे (२) सपादा द्वासप्ततिरनुष्टुभः (७२।) ॥ १० ॥ खट्वाङ्गादिति। खट्वाङ्गाच्च दीर्घबाहुत्वात् पृथुश्रवाः विपुलकीर्तिः रघुस्ततो महाराजः अजस्तस्माद्दशरथोऽभवत् ॥ १ ॥ ❀ ❀ तस्येति सार्द्धम्। तस्य दशरथस्यापि सुरैर्दैवैः प्रार्थितः सन् साक्षात् ब्रह्ममयो हरिः एषः त्वया स्वमातृगर्भे दृष्टः भगवान् स्वांशांशेन अंशाः भरतलक्ष्मणशत्रुघ्नाः आंशम् अंशसमूहः पूर्णो रामश्च तद्रूपेण रामादिसंज्ञया चतुर्धा पुत्रत्वमगात् ॥ २ ॥ ❀ ❀ तस्येति। हे राजन्! यद्यपि तस्य सीतापतेः श्रीरामस्यानुचरितं तत्त्वदर्शिभिः परमार्थज्ञैर्वाल्मीक्यादिभिः ऋषिभिर्भूरि विस्तृतं यथा भवति तथा वर्णितं त्वया च मुहुः श्रुतमेव तथापि संग्रहेण कथयामीति शेषः ॥ ३ ॥ ❀ ❀ इदानीमध्यायद्वयेन श्रीरामचरितं विवर्णयिषुस्तावदेकेन श्लोकेन संगृह्णंस्तत्कर्तृकामात्मरक्षां प्रार्थयते—गुर्वर्थ इति। यः गुर्वर्थे त्यक्तराज्यः गुरुः पिता दशरथस्तस्य वचः सत्यतापालनार्थे त्यक्तं राज्यं येन तथाभूतः सन् प्रियायाः सीतायाः पाणिना स्पर्शेऽपि नास्ति क्षमा सहिष्णुता ययोस्ताभ्यां पद्मवदतिसुकुमाराभ्यां पद्मश्यामवनं प्रतिवनं व्यचरत्। हरीणां वानराणामिन्द्रः सुग्रीवः अनुजो लक्ष्मणस्ताभ्यां मृजाऽस्याः सञ्जाता मृजिता अपनीता पथरुजा मार्गश्रमो यस्य सः शूर्पणाख्याः राक्षस्याः वैरूप्यात्कर्णनासिकाच्छेदाद्धेतोस्तया प्रलोभितेन रावणेनापहारात् प्रियेण कलत्रेण यो विरहस्तेन या रुट् तया आरोपितयोः कुटिलीकृतयोर्भ्रुवोर्विजृम्भणेनैव त्रस्तो भीतोब्धिः समुद्रो यस्मात्सः ततस्तद्विज्ञानेन बद्धः समुद्रे सेतुर्येन सः खला दुरात्मानो रावणादय एव दवो वनं तस्य दहनः स एवंभूतः कोशलेन्द्रः श्रीरामो नोस्मान् अवतात् पातु। स्रग्धरा छन्दः ॥ ४ ॥ ❀ ❀ विश्वामित्रेति विश्वामित्रस्याध्वरे यज्ञे येन लक्ष्मणस्य पश्यत एव तमप्यनपेक्ष्यैव निशाचराः निशाविहाराः नैर्ऋतपुङ्गवाः राक्षसश्रेष्ठा मारीचादयो हताः स कोशलेन्द्रो नोऽवतादिति पूर्वेणान्वयः। एवमग्रे यच्छब्दानां पूर्वेणैवान्वयः ॥ ५ ॥ ❀ ❀ य इति। हे

नृप बालगजस्येव लीला यस्य सः श्रीरामः सीतायाः स्वयंवरगृहे लोके ये वीरास्तेषां समितौ समाजे उग्रं कठिनं गरिष्ठं च अत एव वाहकानां त्रिभिः शतैः उपनीतम् ऐशं श्रीरुद्रसम्बन्धि धनुः आदाय गृहीत्वा सज्जीकृतमारोपितज्यं विकृष्येक्षुयष्टिमिव मध्ये बभञ्ज भग्नमकरोत् ॥ ६ ॥ ❀ ❀ जित्वेति। अनुरूपाणि स्वयोग्यानि गुणशीलवयोऽङ्गरूपाणि यस्याः ताम्। उरसि वक्षसि अभिलब्धो मानः सत्कारो यया तां सीताभिधां सीतासंज्ञां श्रियं लक्ष्मीं जित्वा प्राप्य धनुर्भङ्गेन स्वाधीनां कृत्वा मार्गे व्रजन् धनुर्भङ्गनादश्रवणक्षुभितस्य आगतस्य भृगुपतेर्भार्गवमुख्यस्य परशुरामस्य प्ररूढमतिवृद्धं दर्पं गर्वं व्यनयत् अपनीतवान्। य इति। त्रिरित्युपलक्षणम्। यो रामः त्रिःसप्तकृत्वो महीमराजबीजां राजबीजशून्यामकृत अकरोत् ॥ ७ ॥ य इति कदाचित् कैकेय्या तुष्टेन दशरथेन त्वदपेक्षितं वरद्वयं दास्यामीति प्रतिश्रुतं तत्र श्रीरामस्य यौवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य वनवासश्चेति वरद्वयं प्रार्थितं तया सत्यरूपेण पाशेन परिवीतस्य परिवृतस्य अत एव स्त्रिया वश्यस्य स्त्रियैहितस्य वा स्त्रैणस्य पितुर्निदेशं वनवासाज्ञां शिरसा जगृहे बहुमानपुरःसरमङ्गीकृतवान्। ततश्च सभार्यः सीतासहितः राज्यं राजाधिकारं श्रियं राजसम्पदं प्रणयिनः प्रेमवतो मात्रादीन् सुहृदो मित्राणि निवासस्थानमयोध्यां च त्यक्त्वा वनं ययौ। दुस्त्यजस्यापि सहर्षत्यागे दृष्टान्तमाह। असूनिवेति। मुक्तसङ्गो विरक्तो योगी यथाऽसून् प्राणांस्त्यजति तद्वदित्यर्थः ॥ ८ ॥

वीरराघवव्याख्या

खट्वाङ्गादीर्घबाहुर्जज्ञे तस्मादीर्घबाहोः रघुः स च पृथु विपुलं श्रवो यशो यस्य तथाभूतः तस्माद्रघोरजः महाराजो जज्ञे तस्मादजादशरथः संबभूव ॥ १ ॥ ❀ ❀ तस्यापि दशरथस्यापि साक्षात्परब्रह्माभिन्नो भगवान् हरिः सुरैः प्रार्थितोऽशांशेन सह चतुर्द्धा पुत्रतां प्राप्तः "भगवान् ब्रह्ममयो हरिः पुत्रतां प्राप्तः" इत्यनेन श्रीरामस्य षाड्गुण्यपूर्णत्वमुक्तम्, अंशांशेन सह पुत्रतां प्राप्त इत्यनेन भरतादीनां तदंशावतारत्वमुक्तम्, एवञ्च भरतादीनामपि स्वांशावतारत्वात्तैस्सह चतुर्द्धा पुत्रतां प्राप्त इत्यर्थः ॥ २ ॥ ❀ ❀ चातुर्विद्ध्यमेव दर्शयन्नवताराणां नामान्याह—रामेति। रामादिसंज्ञया चतुर्द्धा पुत्रतामगादिति पूर्वेणान्वयः। तस्य श्रीरामस्य सीतापतेरनुचरितं हे राजन् तत्त्वदर्शिभिरवतारयाथात्म्यविद्भिः ऋषिभिः वाल्मीक्यादिभिर्भूरि बहुलं यथा भवति तथा वर्णितं त्वया तन्मुहुः श्रुतम् अतस्तत्र विस्तरतः कथयामः तथापि संग्रहेण कथ्यमानं शृण्वित्यभिप्रायः ॥ ३ ॥ ❀ ❀ इतोऽध्यायद्वयेन श्रीरामचरितं विवर्णयिषुस्तावदेकेन श्लोकेन संगृह्णन् तत्कर्तृकामात्मरक्षां प्रार्थयते—गुर्वर्थ इति। यः श्रीरामः गुर्वर्थं गुरोः पितुरर्थे वचस्सत्यतापालनार्थं त्यक्तं राज्यं येन सः पद्मवदतिसुकुमाराभ्यां पद्भ्यां; तदेवाह—प्रियायाः सीतायाः पाणेः स्पर्शे नास्ति क्षमा ययोस्ताभ्यां प्रतिवनमचरत् हरीन्द्रानुजाभ्यां सुग्रीवलक्ष्मणाभ्यां सृजिता अपनीता पथरुजा मार्गश्रमो यस्य शूर्पणख्याः वैरूप्यात् कर्णनासिकाच्छेदाद्धेतोस्तया प्रलोभितेन रावणेनापहारात् प्रियेण कलत्रेण यो विरहः विश्लेषस्तेन या रुट्तया आरोपितायाः कुटिलीकृताया भ्रुवो विजृम्भेणैव त्रस्तो भीतोऽब्धिः समुद्रो यस्मात् ततस्तद्विज्ञापनेन बद्धः सेतुर्येन ततः खलाः दुरात्मानः रावणादय एव दवो वनं तस्य दहनः स एवम्भूतः कोसलेन्द्रो नोऽस्मानवतात् पातु ॥ ४ ॥ ❀ ❀ एवं सङ्गृहीतं श्रीरामचरितमादित आरभ्य वर्णयति—विश्वामित्रेत्यादिना यावदुत्तराध्यायसमाप्ति। विश्वामित्रस्याध्वरे यज्ञे मारीचाद्याः निशाचराः नैर्ऋतपुङ्गवाः राक्षसश्रेष्ठाः लक्ष्मणस्य पश्यत एव तमप्यनपेक्ष्यैव येन श्रीरामेण हताः यच्छब्दानां स कौसलेन्द्रोऽवतात् इति पूर्वेणैवान्वयः ॥ ५ ॥ ❀ ❀ य इति। हे नृप ! लोके ये वीरास्तेषां समितौ समाजे यः श्रीरामः सीतायाः स्वयम्वरगृहे उग्रं कठिनं गरिष्ठं वा तदेवाह—त्रिशतोपनीतं किङ्कराणां शतत्रयेणानीतमैशं रौद्रं धनुरादाय सज्जीकृतमारोपितं विकृष्य बालगजस्येव लीला यस्य सः इक्षुदण्डमिव मध्ये बभञ्ज भग्नमकरोत् ॥ ६ ॥ ❀ ❀ आत्मनः स्वस्य यानि रूपादीनि तेषामनुरूपाणि रूपादीनि यस्यास्तां सीतासंज्ञां पूर्वमुरसि अधिलब्धो मानो यया तां श्रियं जित्वा धनुर्भङ्गेन स्वाधीनाङ्कृत्वा धनुर्भङ्गमहानादश्रवणक्षुभितस्य भृगुपतेर्भार्गवस्य रामस्य प्ररूढं दर्पं मार्गे व्यनयदपनीतवान् कथंभूतस्य यो भृगुपतिः त्रिरित्युपलक्षणं त्रिस्सप्तकृत्वः अराजबीजां राजबीजशून्यां महीमकरोत् तस्य ॥ ७ ॥ ❀ ❀ इदानीं गुर्वर्थ इति श्लोकं विवृण्वन्नाह—य इति। कदाचित् कैकेय्यास्तुष्टेन दशरथेन तदपेक्षितं वरद्वयं दास्यामीति प्रतिश्रुतं तत्र श्रीरामस्य यौवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य वनवासश्चेति वरद्वयं प्रार्थितं तदा सत्यरूपेण पाशेन परिवीतस्य परिवृतस्य पितुर्दशरथस्य स्त्रैणस्य स्त्रीवश्यस्यापि निदेशमाज्ञां शिरसा जगृहे ततः सभार्यस्यानुजस्य राज्यादीन् त्यक्त्वा वनं ययो दुस्त्यजानामपि राज्यादीनां सहर्षत्यागे दृष्टान्तः मुक्तसङ्गो योगी असून् प्राणानिवेतीति ॥ ८ ॥

विजयध्वजतीर्थकृता पदरत्नावली

ब्रह्ममयः वेदमुख्यार्थभूतः स्वयमंशेन लक्ष्मणादिषु अंशांशेन ॥ १–२ ॥ ❀ ❀ तत्त्वदर्शिभिः ऋषिभिः वर्णितं तस्य सीतापतेर्भूरिफलतो महत्तरमनुचितम् ॥ ३ ॥ ❀ ❀ त्वया पुनःपुनः श्रुतमपि शृणुष्व इत्याशयेनाह—गुर्वर्थ इति।

गुर्वर्थे पित्रर्थे पद्मपादाभ्यां पद्मोपमचरणाभ्यां मृजितपथिरुजः मार्जितमार्गक्लेशः हरीन्द्रानुजाभ्यां सुग्रीवलक्ष्मणाभ्यां वैरूप्यान्नासिकाच्छेदलक्षणात्प्रियायाः सीतायाः विरहोद्भूतरुषा आरोपितभ्रूविजृम्भः उन्नमितभ्रूभङ्गः लङ्कायां हनुमतः आविर्भावं श्रुत्वा खला एव दवः खलदवः तस्य खलदवस्य दाहे दहनेऽग्निः "दवो दावो वनारण्यवह्नयोः" इति यादवः। एवंविधो भगवान् कोसलेन्द्रनाम्ना भुव्यवतीर्ण इत्यन्वयः। अवतान्न इति केचित्पठन्ति ॥ ४ ॥ ❀ ❀ एकपद्येन सूत्रवत्सङ्क्षिप्तरामचरितमादित एव किञ्चित्प्रपञ्चयति—विश्वामित्रेति। येनैव ॥ ५ ॥ ❀ ❀ लोके ये वीरास्तेषां समितौ सभायाम् ईशस्य शिवस्य विद्यमानं त्रिंशतैरनेकैः पुरुषैः उपनेयं समीपम् आनेतुं योग्यं सज्जीकृतं ज्यया सहितं कृतम् ॥ ६ ॥ ❀ ❀ उरसि अभिलब्धमानां प्राप्तमानाम् आत्मनः स्वस्य रूपादिभिरनुरूपा या सीताभिधा श्रीर्लक्ष्मीस्तां जित्वा प्राप्य स्वजित इतिवत् मार्गे व्रजन् रामो हतराजबीजां निर्मूलितक्षत्रसन्ततिं महीं कृतवतो भृगुपतेः परशुरामस्य प्ररूढं दर्पम् उन्नतमदं व्यनदपनीतवानित्यन्वयः ॥ ७ ॥ ❀ ❀ यो रामः सत्त्याख्यपाशेन परिवीतस्य परिवेष्टितस्य पितुर्निदेशमाज्ञां शिरसा पितृसम्भावनार्थं जगृह इत्यन्वयः, "अपिर्जुगुप्सितार्थो वा जुगुप्सायाम्" कि निमित्तमित्यत उक्तं, स्त्रैणस्येति स्त्रीजितस्य सभार्य इत्यनेन तस्या अपि बहुमानातिशयं सूचयति—असूनित्यनेन। राज्यलक्ष्म्यादीनाम् अशक्यत्याज्यतां दर्शयति, मुक्तसङ्ग इत्यनेन। असङ्गो ह्ययं पुरुषः" इति श्रुतिसिद्धनित्यासङ्गतां दर्शयति, अधिवासम् अयोध्याम् ॥ ८ ॥

जीवगोस्वामिकृतः क्रमसन्दर्भः

पथरुजा इत्यनेन पथशब्दोऽकारान्तोऽप्यस्तीति लक्ष्यते ॥ ४-१० ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दशमे रघुनाथस्य जन्मकर्मयशोऽमृतम्। सर्वान् नृन्पाययामास संक्षेपेण महामुनिः ॥ १ ॥

एष त्वया स्वमातृगर्भे दृष्ट इत्यर्थः। अंशांशेन अंशश्च आंशम् अंशसमूहश्च अंशांशं तेन अंशांशेन तस्यापि वासुदेवस्येत्यर्थः ॥ १-३ ॥ ❀ ❀ "कार्त्स्न्यान्न वक्तुं लिखितुं शक्या शेषगणेशयोः। या रामलीलाऽध्यायाभ्यां सा श्लोकेनाऽपि कीर्त्यते। गुरोः पितुः सत्यपालनार्थं त्यक्तराज्यस्सन् पद्मवदतिसुकुमाराभ्यां पद्भ्याम् अनुवनं वने वने व्यचरन् अतिसौकुमार्य्यमेवाह, प्रियायाः पाण्योः परमसुकुमारयोरपि स्पर्शं न क्षमेते इति ताभ्यां हरीन्द्रो हनुमान् सुग्रीवो वा अनुजो लक्ष्मणस्ताभ्यां मृजिताऽपनीता पथरुजो मार्गश्रमो यस्य सः शूर्पणख्या वैरूप्यात् कर्णनासाच्छेदनाद्धेतोः रावणेनापहारात् प्रियेण कलत्रेण यो विरहस्तेन या रुट् वर्त्मनः समुद्रेणाप्रदानात् कोपस्तया आरोपितयोः भ्रुवोः विजृम्भेणैव त्रस्तोऽब्धिर्यस्मात् स खला रावणादयः एव दवो वनं तस्य दहनः ॥ ४ ॥ ❀ ❀ अतिसंक्षेपेण वर्णितं रामचरितमादितः आरभ्य किञ्चित् विस्तरेणाह—विश्वामित्रेत्यादिना अध्यायद्वयेन। निशा मायया चरन्तीति ते नैर्ऋतपुङ्गवाः राक्षसश्रेष्ठाः ॥ ५ ॥ ❀ ❀ लोके ये वीरास्तेषां समितौ समाजे ऐशं माहेशं धनुः इक्षुयष्टिमिव लीलयैवादाय सज्जीकृतं सत् विकृष्य मध्ये बभञ्ज कीदृशं वाहकानां त्रिभिः शतैरुपनीतम् ॥ ६ ॥ ❀ ❀ जित्वा प्राप्य उरसि अभिलब्धो मान आदरः पूर्वमेव यया तां भृगुपतेः परशुरामस्य दर्पं व्यनयत् विगतीचक्रे त्रिः त्रिस्सप्तकृत्वो महीं राजबीजशून्यां चक्रे य इति कदाचित् पूर्वं कैकेय्यां तुष्टेन राज्ञा त्वदपेक्षितं दास्यामीति प्रतिश्रुतं ततः श्रीरामस्य यौवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य च वने वासः प्रार्थितः अतः सत्त्यपाशेन परिवीतस्य पितुः स्त्रैणस्य स्त्रियै कैकेय्यै सत्त्याऽनुरोधवशात् हि तस्य निदेशं सभार्योऽपि जग्राह दुस्त्यजस्यापि सहर्षत्यागे दृष्टान्तः मुक्तसङ्गो योगी असून् प्राणानिवेति ॥ ८ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

अथ खट्वाङ्गवंशेऽवतीर्णस्य श्रीमद्रामचन्द्रस्य भगवतश्चरित्रं वर्णयति—खट्वाङ्गादित्यध्यायद्वयेन ॥ १ ॥ ❀ ❀ तस्य दशरथस्यापि एष अत्र वर्णितः साक्षात् भगवान् षाड्गुण्यपूर्णः ब्रह्ममयः वेदैकवेद्यः अंशांशेन भरतादिरूपेण सह चतुर्धा पुत्रत्वमगादित्यन्वयः ॥ २ ॥ ❀ ❀ ऋषिभिर्वाल्मीकिमुख्यैर्भूरि वर्णितं तस्य श्रीरामस्यानुचरितं त्वया मुहुः श्रुतं तथापि सङ्क्षेपतो मया कथ्यमानं शृण्विति भावः ॥ ३ ॥ ❀ ❀ बहुविस्तृतं रामायणं समाहृत्याध्यायद्वयेन वक्ष्यन् प्रथममेकेन श्लोकेन समस्यति—गुर्वर्थे इति। यः श्रीरामः गुर्वर्थे पितुः सत्यवादित्वपालनार्थं त्यक्तराज्यः पद्मवदतिसुकुमाराभ्यां पद्भ्यां प्रियायाः श्रीसीतायाः पाणिस्पर्शे नास्ति क्षमा ययोस्ताभ्याम् अनुवनं प्रतिवनं व्यचरत् हरीन्द्रानुजाभ्यां कपीन्द्रलक्ष्मणाभ्यां मृजिता अपनीता पथि रुक् मार्गश्रमो यस्य शूर्पणख्याः वैरूप्यात्कर्णनासिकाच्छेदाद्धेतोः प्रियविरहेण शूर्पणखीप्रलोभितरावणकृतेन कलत्रवियोगेन या रुट् तया आरोपितयोः कुटिलीकृतयोर्भ्रुवोर्विजृम्भेणैव त्रस्तो जातभयोऽब्धिर्यस्मात्

तत्प्रार्थनया तदुपरि बद्धः सेतुर्येन ततः खलाः दुर्वृत्ताः रावणादय एव दवो वनं तद्दहनः स कोसलेन्द्रो नोऽस्मान् अवतात् रक्षतु ॥ ४ ॥ ❀ ❀ अथादित आरभ्य विस्तरेणाह—विश्वामित्राध्वर इत्यादिना यावदध्यायद्वयसमाप्ति । पश्यत एव लक्ष्मणस्य तमप्यनपेक्ष्यैव हताः येनेत्यादीनां स कोशलेन्द्रो नोऽवतादिति पूर्वेणैव सम्बन्धः ॥ ५ ॥ ❀ ❀ हे नृप ! बालगजस्येव लीला यस्य स तथाविधो यः लोके तदानीन्तना ये वीरास्तेषां समितौ समाजे ऐशं शैवम् उग्रं कठिनं सीता-स्वयम्वरगृहे त्रिंशतैर्वाहकैः उपनीतं धनुरादाय सज्जीकृतं विकृष्येक्षुदण्डमिव मध्ये बभञ्ज ॥ ६ ॥ ❀ ❀ यश्चानुरूपाणि स्वगुणशीलाद्यनुरूपाणि गुणशीलादीनि यस्याः उरसि अभिलब्धो मानो यया तां प्रियं सीताभिधां जित्वा त्रिरित्युपलक्षणं त्रिःसप्तकृत्वः अराजबीजां महीमकृताऽकरोद्यत्तस्य भृगुपतेर्जामदग्न्यस्य धनुर्भङ्गरवश्रवणविवृद्धमन्योः प्ररूढं दर्पं व्यपनयत् अपनीतवान् ॥ ७ ॥ ❀ ❀ संग्रामे जलार्थिनं दशरथं प्रति कैकेय्या मन्थराख्यया दास्या सहितया पृष्ठतो गत्वा जलमर्पितं तदा च राज्ञोक्तं वरं वरयेति तयोक्तं कल्पान्तरे सति प्रयोजनेऽपेक्षितं वरं स्वीकरिष्यामीति तदनन्तरं श्रीरामस्य यौवराज्याभिषेकसमये मन्थराप्रबोधितया भरतस्य राज्यं रामश्चतुर्दशवर्षाणि वने वसत्विति प्रार्थितम्, तदा सत्यपाशपरिवीतस्य पितुर्निर्देशमाज्ञां शिरसा जगृहे तदा राज्यं श्रियं सम्पदं प्रणयिनः प्रीतिसम्बद्धान् सुहृदश्च असून् प्राणवत् प्रियतमान् त्यक्त्वा सभार्यः वनं ययौ मुक्तसङ्ग इव यथा मुक्तसङ्गस्यैव दुःखदत्वं दर्शितं स तु मुक्तसङ्गः इत्यर्थः ॥ ८ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

खट्व ङ्गस्यान्वये रामप्रादुर्भावोऽनुजैः सह । तच्चरितं च सङ्क्षिप्तं दशमे विनिरूप्यते ॥ १ ॥

खट्वाङ्गाच्च दीर्घबाहुः, तस्मात् पृथुश्रवाः विपुलकीर्तिः रघुः, ततो महाराजः अजः, तस्माद्दशरथोऽभूत् ॥ १ ॥ ❀ ❀ अस्य दशरथस्यापि सुरैर्दैवैः प्रार्थितः सन्नेष भगवान् स्वांशांशेन रामादिसञ्ज्ञया चतुर्धा पुत्रत्वमगादित्यन्वयः । औपचारिक-भगवत्त्वनिरासायाह—साक्षाद्ब्रह्ममय इति । ननु पूर्णानन्दस्य भगवतो देवप्रार्थनयाऽपि कथं मनुष्यपुत्रत्वाङ्गीकारस्तत्राह—हरिरिति । दुःखहरणशीलत्वाद्देवादीनां रावणादिदुःखनिरासार्थम् अयमवतार इत्याशयः ॥ २ ॥ ❀ ❀ अहो भगवच्चरित-श्रोतुस्तव भाग्यमिति सूचयन् सम्बोधयति—राजन्निति । यद्यपि तस्य सीतापतेः श्रीरामस्यानुचरितं तत्त्वदर्शिभिः परमार्थ-ज्ञैर्वाल्मिक्यादिभिर्ऋषिभिः भूरि विस्तृतं यथा भवति तथा वर्णितं त्वया च मुहुः श्रुतमेव । तथापि सङ्ग्रहेण कथयामीति शेषः । हीत्यवधारणे ॥ ३ ॥ ❀ ❀ इदानीमध्यायद्वयेन श्रीरामचरितं विवर्णयिषुस्तावदेकेन श्लोकेन सङ्गृहीतत्कर्मकामात्मरक्षां प्रार्थयते—गुर्वर्थ इति । यः गुर्वर्थे त्यक्तराज्यः गुरुः पिता दशरथस्तस्य वचस्सत्यतापालनार्थे त्यक्तं राज्यं येन तथाभूतः सन् पद्मवदतिसुकुमाराभ्यां पद्भ्याम् अनुवनं प्रतिवनं व्यचरत् । अनेन धर्ममर्यादापालकत्वं दर्शितम् । सुकुमारत्वमेव स्पष्टयति—प्रियायाः सीतायाः पाणिना स्पर्शेऽपि नास्ति क्षमा सहिष्णुता ययोस्ताभ्यां हरीणां वानराणामिन्द्रः सुग्रीवः अनुजो लक्ष्मणः ताभ्यां मृजिता अपनीता पथरुजा मार्गश्रमो यस्य सः । अनेन कृपालुत्वं सूचितम् । शूर्पणख्याः राक्षस्याः वैरूप्यात्कर्णनासिका-च्छेदाद्धेतोस्तया प्रलोभितेन रावणेनापहारात् प्रियेण कलत्रेण यो विरहस्तेन या रुट् तया आरोपितयोः कुटिलीकृतयोर्भ्रुवोः विजृम्भणेनैव त्रस्तो भीतोऽब्धिः समुद्रो यस्मात्सः । ततस्तद्विज्ञापनेन बद्धः समुद्रे सेतुर्येन सः । खला दुरात्मानो रावणादय एव दवो वनं तस्य दहनः स एवम्भूतः कोशलेन्द्रः श्रीरामो नोऽस्मान् अवतात् पातु ॥ ४ ॥ ❀ ❀ एवं सङ्गृहीतं श्रीरामचरित-मादित आरभ्य वर्णयति—विश्वामित्रेत्यादिना यावदुत्तराध्यायसमाप्ति । विश्वामित्रस्याध्वरे यज्ञे येन लक्ष्मणस्य पश्यत एव तमप्यनपेक्ष्यैव निशाचराः निशायामाचरन्तीति तथाभूता नैर्ऋतपुङ्गवाः राक्षसश्रेष्ठा मारीचादयो हताः स कोशलेन्द्रो नोऽवता-दिति पूर्वेणान्वयः । एवमग्रेऽपि यच्छब्दानां पूर्वेणैवान्वयः ॥ ५ ॥ ❀ ❀ इयं च भगवतो राजलीला त्वया सावधानतया श्रोतव्येत्याशयेन सम्बोधयति—नृपेति । यः श्रीरामः सीतायाः स्वयंवरगृहे लोके ये वीरा तेषां समितौ समाजे उग्रं कठिनं गरिष्ठं च अतएव त्रिंशता वाहकानां शतत्रयेणोपनीतम् ऐशं श्रीरुद्रसम्बन्धि धनुः आदाय गृहीत्वा सज्जीकृतमारोपितज्यं विकृष्य इक्षु-दण्डमिव मध्ये बभञ्ज भग्नमकरोत् । अनायासत्वार्थे दृष्टान्तं सूचयन् विशिनष्टि—बालगजलील इति । बालगजस्य लीलेव लीला यस्य सः । गजो यथेक्षुदण्डं भञ्जयति तथेत्याशयः ॥ ६ ॥ ❀ ❀ अनुरूपाणि स्वयोग्यानि गुणशीलादीनि यस्यास्तां सीता-सञ्ज्ञां जित्वा धनुर्भञ्जनेन स्वाधीनां कृत्वा व्रजन् धनुर्भङ्गमहानादश्रवणक्षुभितस्य मार्गे आगतस्य भृगुपतेर्भार्गवमुख्यस्य रामस्य प्ररूढमतिवृद्धं दर्पं गर्वं व्यनयत् अपनीतवानित्यन्वयः । अनुरूपगुणादिमत्त्वे हेतुं सूचयंस्तां विशिनष्टि श्रियमिति । पूर्वं समुद्रमथनात् प्रादुर्भावसमय एव उरसि वक्षसि अभिलब्धो मानः सत्कारो यया तां श्रियं, लक्ष्मीरूपामित्यर्थः । गुणाः स्नेहादयः । शीलं स्वभावः । वयोऽवस्था । अंगं शरीरम् । रूपं सौन्दर्यम् । गर्ववृद्धौ हेतुं सूचयंस्तं विशिनष्टि—य इति । त्रिरित्यु-पलक्षणम् । यो रामः त्रिस्सप्तकृत्वा महीम् अराजबीजां राजबीजशून्यामकृत अकरोत्तस्य ॥ ७ ॥ ❀ ❀ इदानीं गुर्वर्थ इति

श्लोकं विवृण्वन्नाह—य इति। कदाचित् कैकेय्यास्तुष्टेन दशरथेन त्वदपेक्षितं वरद्वयं दास्यामीति प्रतिश्रुतं तत्र श्रीरामस्य यौवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य वनवासश्चेति वरद्वयं प्रार्थितम्, तदा सत्यरूपेण पाशेन परिवीतस्य परिवृतस्य स्नैणस्य स्त्रीवश्यस्यापि पितुर्निदेशं वनवासाज्ञां शिरसा जगृहे बहुमानपुरस्सरं अङ्गीकृतवान्। ततश्च सभार्यः सीतासहितः राज्यं राजाधिकारं श्रियं राजसम्पदं प्रणयिनः प्रेमवतो मात्रादीन् सुहृदो मित्राणि निवासं स्थानमयोध्यां च त्यक्त्वा वनं ययौ। दुस्त्यजस्यापि सहर्षत्यागे दृष्टान्तमाह—असूनिवेति। मुक्तसङ्गो विरक्तो योगी यथाऽसून् प्राणान् त्यजति तद्वदित्यर्थः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

खट्वाङ्गस्यान्वये प्राह दशमे रामसंभवम्। निहत्यारिं चरित्रं च तस्यायोध्यागमावधि ॥ १ ॥

खट्वाङ्गादिति। खट्वाङ्गात्, दीर्घबाहुश्च जज्ञे। तस्माद्दीर्घबाहोः, पृथुश्रवा विपुलकीर्त्तिः रघुः जज्ञे। ततः रघोः, महाराजः अजः, जज्ञे। तस्मादजात् दशरथः, अभवत् संबभूव ॥ १ ॥ ❀ ❀ तस्येति। तस्य दशरथस्य अपि, साक्षात् एषः भगवान्, ब्रह्ममयो ब्रह्मस्वरूपः हरिः, सुरैर्देवैः, प्रार्थितः सन्, अंशांशेन सह, चतुर्द्धा पुत्रत्वम् अगात्। भगवान् ब्रह्ममयः हरिः पुत्रतां प्राप्त इत्यनेन श्रीरामस्य षाड्गुण्यपूर्णत्वमुक्तम्। अंशांशेन सह पुत्रतां प्राप्त इत्यनेन भरतादीनां तदंशावतारत्वमुक्तमेवं च भरतादीनामपि स्वांशावतारत्वात्तैः सह चतुर्द्धा पुत्रतां प्राप्त इत्यर्थः ॥ २ ॥ ❀ ❀ चतुर्विधत्वमेव दर्शयन्नवताराणां नामान्याह। रामेति रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च ते, इतिसंज्ञया एवंभूतया अभिधया, चतुर्द्धा पुत्रतामगादिति पूर्वेणान्वयः। हे राजन! सीतापतेः, तस्य श्रीरामस्य, अनुचरितं तत्त्वदर्शिभिः अवतारयाथात्म्यवेदिभिः, ऋषिभिर्वाल्मीक्यादिभिः, भूरि बहुलं यथा भवति तथा, वर्णितम्। त्वया च तत् मुहुः, श्रुतं हि। अतस्तन्न विस्तरतः कथयामस्तथापि संग्रहेण कथ्यमानं शृण्वित्यभिप्रायः ॥ ३ ॥ ❀ ❀ इतोऽध्यायद्वयेन श्रीरामचरितं विवर्णविषुस्तावदेकेन श्लोकेन संगृणंस्तत्कर्तृकामात्मरक्षां प्रार्थयते। गुर्वर्थ इति। यः श्रीरामः, गुर्वर्थे गुरोः पितुरर्थे गुरुवचः सत्यपालनार्थमित्यर्थः। त्यक्तं राज्यं येन सः, प्रियायाः सीतायाः, पाणिना यः स्पर्शस्तस्मिन्नास्ति क्षमा ययोस्ताभ्यां, संवाहनादिक्रियायां सीतामृदुपाणिस्पर्शमपि सोढुमक्षमाभ्यामित्यर्थः। पद्मपद्भ्यां पद्मवत्सुकुमाराभ्यां चरणाभ्यामित्यर्थः। अनुवनं प्रतिवनं, व्यचरत्। हरीन्द्रः सुग्रीवश्च अनुजो लक्ष्मणश्च ताभ्यां, मृजिता अपनीता पथरुजा मार्गश्रमो यस्य सः, 'रुजा रोगे च भङ्गेऽथ' इति मेदिनी। शूर्पणख्याः शूर्पणखायाः, वैरूप्यात् कर्णनासिकाच्छेदाद्धेतोः, शूर्पणखाप्रलोभितरावणकृतसीतापहारादिति शेषः। प्रियेण कलत्रेण यो विरहो विश्लेषस्तेन या रुट् तया, आरोपितायाः कुटिलीकृतायाः, भ्रुवो विजृम्भणेनैव त्रस्तो भीतोऽब्धिः समुद्रो यस्मात्सः, बद्धस्तद्विज्ञापनेन निबद्धः सेतुर्येन सः, समुद्रविज्ञापनेन समुद्रोपरि निबद्धसेतुरित्यर्थः। खला दुरात्मानो रावणादय एव दवो वनं तस्य दहनः एवंभूतः कोसलेन्द्रः, नोऽस्मान्, अवतात् रक्षतु ॥ ४ ॥ ❀ ❀ एवं संगृहीतं श्रीरामचरित्रमादित आरभ्य वर्णयति विश्वामित्रेत्यादिना यावदुत्तराध्यायसमाप्ति। विश्वामित्रेति। विश्वामित्रस्याध्वरो यज्ञस्तस्मिन् मारीचाद्याः, नैर्ऋतपुङ्गवाः निशाचरा राक्षसाः लक्ष्मणस्य पश्यतः सतः एव लक्ष्मणमनपेक्ष्यैवेत्यर्थः। येन श्रीरामेण हताः, यच्छब्दानां स कोसलेन्द्रोऽवतान्न, इति पूर्वेणान्वयः ॥ ५ ॥ ❀ ❀ य इति। हे नृप, लोके ये वीरास्तेषां समितिः समाजस्तस्यां यः श्रीरामः, सीताया जानक्या यः स्वयंवरः तस्य गृहं तस्मिन्, उग्रं कठिनं गरिष्ठं च, तदेवाह। त्रिशतोपनीतं किंकराणां शतत्रयेणानीतमित्यर्थः। ऐशं शैवं धनुः आदाय सज्जीकृतमारोपितं, ततः विकृष्य तदाकर्षणं विधाय, बालगजस्येव लीला यस्य सः, इक्षुयष्टिम् इव, कलभो लीलयेक्षुदण्डमिवेत्यर्थः। मध्ये बभञ्ज ॥ ६ ॥ ❀ ❀ जित्वेति। यः श्रीरामः अनुरूपाणि स्वयोग्यानि गुणाश्च शीलं च वयश्च अङ्गरूपं शारीरसौन्दर्यं च तानि यस्यास्तां, आत्मरूपेति पाठे आत्मनः स्वस्येव रूपादीनि यस्यास्तां सीताभिधां सीतासंज्ञां, पूर्वम् उरसि अधिलब्धो मानो यया तां, श्रियं रमां जित्वा, धनुर्भङ्गेन स्वाधीनां कृत्वा, धनुर्भङ्गमहानादश्रवणक्षुभितस्येति शेषः। यः त्रिः त्रिःसप्तकृत्व इत्यर्थः। महीं पृथिवीं, अराजबीजां राजबीजशून्यां, अकृत अकरोत्। तस्य, भृगुपतेर्भृगुकुलोत्पन्नस्य रामस्य, प्ररूढदर्पं भूनिःक्षत्रियकरणजातप्रभूतगर्वं, मार्गे व्रजन व्यनयदपनीतवान् ॥ ७ ॥ ❀ ❀ इदानीं गुर्वर्थ इति श्लोकं विवृण्वन्नाह। य इति। कदाचित् कैकेय्यास्तुष्टेन दशरथेन त्वदपेक्षितं वरद्वयं दास्यामीति प्रतिश्रुतं, तत्र श्रीरामस्य यौवराज्याभिषेकसमये, तया भरतस्य राज्यं, रामस्य वनविवासश्चेति वरद्वयं प्रार्थितम्। तदा, सत्यपाशः सत्यरूपा रज्जुस्तेन परिवीतः परिवृतश्चासौ पिता तस्य, तत्रापि स्नैणस्य स्त्रीवशस्य अपि, निदेशमाज्ञां यः शिरसा जगृहे। ततः, सभार्यः चकारात् सानुजः लक्ष्मणसहितः सन्, राज्यं श्रियं, प्रणयिनः सुहृदः निवासं च, दुस्त्यजस्यापि सहर्षत्यागे दृष्टान्तः। मुक्तसङ्गः योगी, असून् प्राणानिव, त्यक्त्वा, वनं ययौ ॥ ८ ॥



भाषानुवादः

भगवान् श्रीरामकी लीलाओंका वर्णन

श्रीशुकदेवजी कहते हैं—परीक्षित् ! खट्वाङ्गके पुत्र दीर्घबाहु और दीर्घबाहुके परम यशस्वी पुत्र रघु हुए। रघुके अज और अजके पुत्र महाराज दशरथ हुए ॥ १ ॥ ❀ ❀ देवताओंकी प्रार्थनासे साक्षात् परब्रह्म परमात्मा भगवान् श्रीहरि ही अपने अंशांशसे चार रूप धारण करके राजा दशरथके पुत्र हुए। उनके नाम थे—राम, लक्ष्मण, भरत और शत्रुघ्न ॥२॥ ❀ ❀ परीक्षित् ! सीतापति भगवान् श्रीरामका चरित्र तो तत्त्वदर्शी ऋषियोंने बहुत कुछ वर्णन किया है और तुमने अनेक बार उसे सुना भी है ॥३॥ भगवान् श्रीरामने अपने पिता राजा दशरथके सत्यकी रक्षाके लिये राजपाट छोड़ दिया और वन-वनमें फिरते रहे। उनके चरणकमल इतने सुकुमार थे कि परम सुकुमारी श्रीजानकीजीके करकमलोंका स्पर्श भी उनसे सहन नहीं होता था। वे ही चरण जब वनमें चलते-चलते थक जाते, तब हनूमान् और लक्ष्मण उन्हें दबा-दबाकर उनकी थकावट मिटाते। शूर्पणखाको नाक-कान काटकर विरूप कर देनेके कारण उन्हें अपनी प्रियतमा श्रीजानकीजीका वियोग भी सहना पड़ा। इस वियोगके कारण क्रोधवश उनकी भौंहें तन गयीं, जिन्हें देखकर समुद्रतक भयभीत हो गया। इसके बाद उन्होंने समुद्रपर पुल बाँधा और लङ्कामें जाकर दुष्ट राक्षसोंके जंगल को दावाग्निके समान दग्ध कर दिया। वे कोसलनरेश हमारी रक्षा करें ॥ ४ ॥ भगवान् श्रीरामने विश्वामित्रके यज्ञमें लक्ष्मणके सामने ही मारीच आदि राक्षसोंको मार डाला। वे सब बड़े-बड़े राक्षसोंकी गीनतीमें थे ॥ ५ ॥ ❀ ❀ परीक्षित् ! जनकपुरमें सीताजीका स्वयंवर हो रहा था। संसारके चुने हुए वीरोंकी सभामें भगवान् शङ्करका वह भयङ्कर धनुष रक्खा हुआ था। वह इतना भारी था कि तीन सौ वीर बड़ी कठिनाईसे उसे स्वयंवरसभामें ला सके थे। भगवान् श्रीरामने उस धनुषको बात-की-बातमें उठाकर उसपर डोरी चढ़ा दी और खींचकर बीचोबीचसे उसके दो टुकड़े कर दिये—ठीक वैसे ही, जैसे हाथीका बच्चा खेलते-खेलते ईख तोड़ डाले ॥ ६ ॥ ❀ ❀ भगवान्ने जिन्हें अपने वक्षःस्थलपर स्थान देकर सम्मानित किया है, वे श्रीलक्ष्मीजी ही सीताके नामसे जनकपुरमें अवतीर्ण हुई थीं। वे गुण, शील, अवस्था, शरीरकी गठन और सौन्दर्यमें सर्वथा भगवान् श्रीरामके अनुरूप थी। भगवान्ने धनुष तोड़कर उन्हें प्राप्त कर लिया। अयोध्याको लौटते समय मार्गमें उन परशुरामजीसे भेंट हुई, जिन्होंने इक्कीस बार पृथ्वीको राजवंशके बीजसे भी रहित कर दिया था। भगवान्ने उनके बढ़े हुए गर्वको नष्ट कर दिया ॥ ७ ॥ ❀ ❀ इसके बाद पिताके वचनको सत्य करनेके लिये उन्होंने वनवास स्वीकार किया। यद्यपि महाराज दशरथने अपनी पत्नीके अधीन होकर ही उसे वैसा वचन दिया था, फिर भी वे सत्यके बन्धनमें बँध गये थे। इसलिये भगवान्ने अपने पिताकी आज्ञा शिरोधार्य की। उन्होंने प्राणोंके समान प्यारे राज्य, लक्ष्मी, प्रेमी, हितैषी मित्र और महलोंको छोड़कर अपनी पत्नीके साथ वनकी यात्रा की; क्योंकि उन्हें किसीके प्रति कोई आसक्ति न थी ॥ ८ ॥

रक्षःखसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदूषणमुख्यबन्धून् ।
जघ्ने चतुर्दशसहस्रमवारणीयकोदण्डपाणिरटमान उवास कृच्छ्रम् ॥ ९ ॥
सीताकथाश्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपते दशकन्धरेण ।
जघ्नेऽद्भुतैणवपुषाऽऽश्रमतोऽपकृष्टो मारीचमाशु विशिखेन यथा कमुग्रः ॥ १० ॥
रक्षोऽधमेन वृकवद् विपिनेऽसमक्षं वैदेहराजदुहितर्यपयापितायाम् ।
भ्राता वने कृपणवत् प्रियया वियुक्तः स्त्रीसङ्गिनां गतिमिति प्रथयंश्चचार ॥ ११ ॥
दग्ध्वाऽऽत्मकृत्यहतकृत्यमहन् कबन्धं सख्यं विधाय कपिभिर्दयितागतिं तैः ।
बुद्ध्वाथ[1] वालिनि हते प्लवगेन्द्र सैन्यैर्वेलामगात् स मनुजोऽजभवार्चिताङ्घ्रिः ॥ १२ ॥
[2]यद्रोषविभ्रमविवृत्तकटाक्षपातसंभ्रान्तनक्रमकरो भयगीर्णघोषः ।
सिन्धुः शिरस्यर्हणं परिगृह्य रूपी पादारविन्दमुपगम्य बभाष एतत् ॥ १३ ॥

---

१. च । २. मकटाक्षविटङ्कपात० ।

न त्वां वयं जडधियो नु विदाम [1]भूमन् कूटस्थमादिपुरुषं जगतामधीशम् ।
यत्सत्त्वतः सुरगणा रजसःप्रजेशा मन्योश्च भूतपतयः स भवान् गुणेशः ॥ १४ ॥
कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीर पत्नीम् ।
बध्नीहि सेतुमिह ते यशसो वितत्यै गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥ १५ ॥
बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपीन्द्रकरकम्पितभूरुहाङ्गैः ।
सुग्रीवनीलहनुमत्प्रमुखैरनीकै[2]र्लङ्कां विभीषणदृशाऽऽविशदग्रदग्धाम् ॥ १६ ॥

कृष्णप्रिया व्याख्या

अन्वयः—अशुद्धबुद्धेः रक्षःस्वसुः रूपं व्यकृत तस्याः चतुर्दशसहस्रं खरत्रिशिरदूषणमुख्यबन्धून् जघ्ने अपारणीयकोदण्डपाणिः अटमानः कृच्छ्रम् उवास ॥ ९ ॥ ❀ ❀ सीताकथाश्रवणदीपितहृच्छयेन दशकन्धरेण सृष्टं मारीचम् अद्भुतैणवपुषा विलोक्य आश्रमतः अपकृष्टः यथा उग्रः कं विशिखेन आशु जघ्ने ॥ १० ॥ ❀ ❀ विपिने रक्षोधमेन वृकवत् वैदेहराजदुहितरि असमक्षम् अपयापितायां प्रियया वियुक्तः स्त्रीसंगिनां गतिम् इति प्रथयन् भ्राता कृपणवत् वने चचार ॥ ११ ॥ ❀ ❀ अजभवार्चिताङ्घ्रिः सः मनुजः आत्मकृत्यहतकृत्यं दग्ध्वा कबन्धम् अहन् अथ कपिभिः सख्यं विधाय वालिनि हते प्लवगेन्द्रसैन्यैः दयितागतिं बुद्ध्वा वेलाम् अगात् ॥ १२ ॥ ❀ ❀ यद्रोषविभ्रमविवृत्तकटाक्षपातसंभ्रान्तनक्रमकरः भयगीर्णघोषः सिंधुः रूपी शिरसि अर्हणं परिगृह्य पादारविन्दम् उपगम्य एतत् बभाषे ॥ १३ ॥ ❀ ❀ भूमन् जडधियः वयं कूटस्थम् आदिपुरुषं जगताम् अधीशं त्वां नु न विदाम यत्सत्त्वतः सुरगणाः रजसः प्रजेशाः मन्योः भूतपतयः स भवान् गुणेशः अस्ति ॥ १४ ॥ ❀ ❀ वीर कामं प्रयाहि विश्रवसः अवमेहं त्रैलोक्यरावणं जहि पत्नीम् अवाप्नुहि इह ते यशसः वितत्यै सेतुं बध्नीहि दिग्विजयिनः भूपाः यम् उपेत्य गायन्ति रघुपतिः उदधौ कपीन्द्रकरकंपितभूरुहाङ्गैः विविधाद्रिकूटैः सेतुं बद्ध्वा सुग्रीवनीलहनुमत्प्रमुखैः अनीकैः अग्रदग्धां लंकां विभीषणदृशा आविशत् ॥ १५–१६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रक्षसो रावणस्य स्वसुः शूर्पणखाया अशुद्धबुद्धेः सीतां जिघृक्षोः कामातुराया इति वा रूपं व्यकृत विकारमनयत् । तस्याः । खरत्रिशिरदूषणमुख्या बंधवो येषु तांश्चतुर्दशसहस्रं जघान । अपारणीयमलंघ्यमसह्यं कोदंडं पाणौ यस्यः सः ॥ ९ ॥ ❀ ❀ सीतायाः कथाश्रवणेन दीपितो हृच्छयो यस्य तेन सीतां हरिष्यता स्वस्माद्गीतेन स्वस्याश्रमादपकर्षणार्थं सृष्टं निसृष्टं मारीचं विलोक्य जघान । कथंभूतम् । अद्भुतैणवपुषा स्वर्णहरिणदेहेनोपलक्षितम् । अत एव प्रलोभनेनाश्रमतस्ते नापकृष्टः सन् कं दक्षं यथा उग्रः श्रीरुद्रः ॥ १० ॥ ❀ ❀ ततश्च रक्षोऽधमेन रावणेनासमक्षमपनीतायाम् । प्रियया वियुक्तो मात्रा लक्ष्मणेन सह कृपणवद्वने चचार । किमभिप्रायः सन् इत्यनेन प्रकारेण स्त्रीसंगिनां दुःखोदर्कां गतिं प्रख्यापयन् ॥ ११ ॥ ❀ ❀ आत्मार्थेन कृत्येन कर्मणा रावणेन सह युद्धेन हतं कृत्यं शास्त्रीयं दहनादिकं यस्य तं जटायुषं पुत्र इव दग्ध्वा कबंधं स्वग्रहणाय प्रसारितबाहुं राक्षसमहन् । अथ वालिनि हते तैः कपिभिर्दयिताया गतिं बुद्ध्वा अजभवाभ्यामर्चितावंघ्री यस्य स मनुजो वेलां समुद्रतीरमगात् ॥ १२ ॥ ❀ ❀ तत्र त्रिरात्रमुपवासेन प्रतीक्षितोऽपि सिंधुर्यदा नोपस्थितस्तदा यस्य रोषविभ्रमेण क्रोधलीलया विवृत्तो यः कटाक्षस्तस्य पातेन संभ्रांता नक्रा मकराश्च यस्मिन् । भयेन गीर्णो ग्रस्तः स्तंभितो घोषो येन स सिंधुरेतद्वक्ष्यमाणं बभाषे । अर्हणमर्घ्यादिकम् । रूपी मूर्तिमान् ॥ १३ ॥ ❀ ❀ भाषणमेवाह । न त्वामिति द्वाभ्याम् । एतावत्पर्यंतं नु निश्चितं त्वां न विदाम न जानीम इत्यर्थः । इदानीं तु ज्ञातोऽसीत्याह । यदिति पृथक् पदम् । यस्येत्यर्थः । यद्वशेभ्यः सत्त्वादिभ्यः सुरगणादयो भवंति स भवान् इति ॥ १४ ॥ ❀ ❀ कामं यथेच्छं जलमाक्रम्यापि प्रयाहि । अवमेहं पुरीषप्रायम् । त्रैलोक्यं रावयत्याक्रंदयतीति तथा तं जहि । हे वीर यद्यपि तव जलं प्रतिबंधकं न भवति तथापीह सेतुं बध्नीहि । तर्हि किमर्थम् । ते यशसो विस्ताराय । तदेवाह । यं सेतुमुपेत्य दुष्करं कर्मावेक्ष्य त्वद्यशो गास्यंति भूपास्तम् ॥ १५ ॥ ❀ ❀ तद्वाक्यमभिनंद्य यत्कृतं तदाह । बद्धेति । विविधैरद्रीणां कूटैः शृंगैः । सेतुं बद्ध्वाऽग्रे सीतान्वेषणे हनुमतैव दग्धां लंकामाविशत् कथंभूतैः शृंगैः । कपींद्राणां करैः कंपितानि भूरुहाणामंगानि शाखादीनि येषु तैः । विभीषणस्य दृशा बुद्ध्या कैः सहाविशत् । सुग्रीवादयः प्रमुखा येषां तैरनीकैः ॥ १६ ॥

---

१. नूनं । २. रनेकै० ।

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

रक्षोधर्मत्वात्सीताग्रहणेनाशुद्धित्वं तद्बुद्धेरित्यत आह—कामातुराया वेति। व्यभिचारेच्छावती घोरशुद्धेत्यर्थः। विकारमंगन्यूनतापादनम्। स रामः। तस्याः शूर्पणख्याः। अटमानो वने विचरन्॥ ९॥ ❀ ❀ कथा सौन्दर्यकथा तस्याः शूर्पणखामुखाच्छ्रवणेन। हृच्छयः कामः। स्वस्माद्रामात्। स्वस्य रामस्य। सर्वात्मत्वाद्रामे स्वशब्दः स्वामिचरणैः प्रयुक्त इति। सृष्टं मृगरूपतया रचितं प्रेरितम् "सृष्टं त्यक्ते प्रेरिते च कृत्रिमे वाच्यलिंगभाक्" इति निरुक्तिः। अत एव हेममृगदेहोपलक्षितत्वादेव। तेन मृगरूपमारीचेन। अपकृष्टो दूरं नीतः। 'उग्रः कपर्दी श्रीकंठः' इत्यमरः। कं ब्रह्माणं सरस्वत्यनुगतम्। यद्वा—उग्रः श्रीनृसिंहः अकं सर्वदुःखदं हिरण्यकशिपुं यथा। "उग्रो जज्ञे वीर्याय स्वधावान्" इति श्रुतेः॥ १०॥ ❀ ❀ ततश्च मारीचमरणोत्तरं च। वृकवद्व्याघ्रवत् स यथानवहितं गृह्णाति तथा। असमक्षम् अप्रत्यक्षम्। वैदेहराजदुहितरि सीतायाम्। अपनीतायां हृतायाम्। कृपणवत् दीनवत्। किमर्थमित्थं चकारेत्यनुयुनक्ति—किमिति। अत्रेति शब्दः प्रकर्षे। तं ग्रंथांतरसंमत्याह—"भो भो वृक्षाः पर्वतस्था गिरिगहनलतावायुना घूर्णमाना रामोऽहं व्याकुलात्मा दशरथतनयः शोकतोऽतीवदग्धः। बिंबोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या हा सीता केन नीता मम हृदयगता कापि केनापि दृष्टा।" इत्याद्युक्तप्रकारेणेत्यर्थः। दुःखोदर्कां दुःखपर्यवसानाम्॥ ११॥ ❀ ❀ कबंधं वक्षोमुखम्। तैः। संख्यस्यापितैः॥ १२॥ तत्र वेलायाम्। विवृतः प्रसृतः। संभ्रांता इतस्ततोनवस्थिताः। मूर्तिमान् करचरणाद्यवयवोपेतः॥ १३॥ ❀ ❀ इत्यर्थ इति। आर्षत्वाद्गुणाभावो वर्तमानार्थता च लोट् इति भावः। जडधियः ज्ञानपूर्वप्रवृत्तिशून्याः। कूटस्थं लयविक्षेपशून्यम्। मन्योस्तमोगुणाच्च कार्येण कारणग्रहात्। भूतपतयो ब्रह्मराक्षसादयः। परब्रह्मत्वेन ज्ञानाभावेपि। त्वदीक्षणवशादेव त्वां गुणनियंतारं यथा कथंचिज्जानीम इत्याह—स भवानिति॥ १४॥ ❀ ❀ पुरीषप्रायं पुरीषसमम्। यथा पुरीषं देहनिर्गतं शुनामुपभोगाय भवति तथायमपि विश्रवसो देहान्निर्गतत्वेनावमेहस्थानीयस्वच्छरनिर्भिन्नदेहः शुनामशनाय भवित्वित्यत उक्तं विश्रवसोऽवमेहम्। परमेशस्य तव जलेशस्यैवाज्ञाकारित्वान्न तदधीनजलस्य प्रतिबंधकत्वमिति सेतुबंधने को लोभ इत्याक्षिपति—तर्हीति। तमेव यशोविस्तारमेव॥ १५॥ ❀ ❀ तद्वाक्यं समुद्रवाक्यम्। "दृग्ज्ञानेक्षणचक्षुषी' इति कोशात्। प्रमुखा अग्रण्यः। 'अनीकं सैन्ययुद्धयोः' इति निरुक्तिः॥ १६॥

अन्वितार्थप्रकाशिका

रक्ष इति। अशुद्धबुद्धेरिति सीतां जिघृक्षोः कामातुरतया सीतायास्तिरस्कारे प्रवृत्ताया वा रक्षःस्वसुः रावणभगिन्याः शूर्पणखाया रूपं व्यकृत कर्णनासाच्छेदनेन विकृतमकरोत्। तस्या रक्षःस्वसुः खरत्रिशिरोदूषणमुख्या बन्धवो येषु ताश्चतुर्दशसहस्रं राक्षसान् जघान। त्रिशिरेत्यार्षम्। तथा अपारणीयमलङ्घ्यमसह्यं कोदण्डं धनुः पाणौ यस्य सः अटमान इतस्ततो वने सञ्चरन्। शानजार्षः चानश् वा। जनशिक्षार्थं कृच्छ्रं कष्टं यथा भवति तथा उवास॥ ९॥ ❀ ❀ सीतेति। हे नृपते! शूर्पणखामुखात् सीतायाः कथाश्रवणेन दीपितो हृच्छयः कामो यस्य तेन दशकन्धरेण रावणेन सीतां जिघृक्षुणा स्वयं तत्र गन्तुं भीतेन सृष्टं प्रेषितं मारीचं विलोक्य अद्भुतं स्वर्णमयमेणस्य हरिणस्येव वपुर्यस्य तेन सीतायाः क्रीडार्थम् अपेक्षितेन मारिचेनाश्रमतोऽपकृष्टः सन् विशिखेन बाणेन तं मारीचमाशु जघ्ने हतवान्। टङार्षः। अद्भुतैणवपुषा उपलक्षितं मारीचमिति वान्वयः। यथा कं दक्षमुग्रो वीरभद्रो जघान तथेत्यर्थः॥ १०॥ ❀ ❀ रक्ष इति। रक्षोऽधमेन रावणेन विपिने वने असमक्षं रामलक्ष्मणयोरसन्निधाने वृकवत् मेषं वृको यथाऽपहरति तद्वत् वैदेहराजदुहितरि सीतायामपयापितायामपहृतायां सत्यां तया प्रियया भार्यया वियुक्तो भ्रात्रा लक्ष्मणेन सहेत्यनेन प्रकारेण स्त्रीसङ्गिनां दुःखोदर्कां गतिं प्रथयन् प्रख्यापयन् कृपणवद्दुःखिवच्चचार वस्तुतः दुःखाभावाद्वतिप्रयोगः॥ ११॥ ❀ ❀ दग्ध्वेति। मनुजाकारोऽप्यजभवाभ्यामर्चिताङ्घ्रिः स रामः आत्मनः स्वस्य कृत्यं प्रयोजनं सीतानिर्मोचनरूपं तदर्थं रावणेन सह युद्धे हतं कृत्यं पौरुषं यस्य तं गृध्रं जटायुषं पुत्र इव दग्ध्वा तस्य पारलौकिकीं दाहादिक्रियां कृत्वा कबन्धं स्वग्रहणाय प्रसारितबाहुं राक्षसमहन्। ततः कपिभिः सह सख्यं विधायाथानन्तरं वालिनि हते सति तैः कपिभिः दयितायाः सीतायाः गतिं बुद्ध्वा सह श्रीरामः प्लवगेन्द्राणां वानरश्रेष्ठानां सैन्यैः सह वेलां समुद्रस्य तीरमगात्॥ १२॥ ❀ ❀ यदिति। त्रिरात्रमुपवासेन प्रतीक्षणेऽपि लङ्कामार्गस्याप्रदानात् यस्य रामस्य रोषविभ्रमेण क्रोधलीलया विवृत्तो यः कटाक्षस्तस्य पातेन सम्भ्रान्ता नक्रा मकराश्च यस्मिन् सः अतो भयेन गीर्णः स्तम्भितो घोषो येन सः सिन्धुः रूपी मूर्तिमान् सन्नर्हणमर्घादिपूजोपहारं स्वशिरसि परिगृह्य निधाय तत्पादारविन्दमुपगम्य शरणमागत्य एतद्वक्ष्यमाणं बभाषे॥ १३॥ ❀ ❀ नेति। हे भूमन्! जडा मोहिता धीर्येषां ते वयं कूटस्थं निर्विकारम् आदिपुरुषं जगतामधीशं त्वां नानुविदाम न जानीमः। आर्षः प्रयोगः। यदिति लुप्तषष्ठ्यन्तं पृथक् पदम्। यस्य तवाधीनात्सत्त्वतः

सत्त्वगुणात् सुरगणा जाताः । रजसो गुणात् प्रजेशाः प्रजापतयो जाताः । मन्योस्तमोगुणात् भूतपतयो रुद्रादयो जाताः । स गुणेशः सत्त्वादिगुणानामीशो नियन्ता भवानेव ॥ १४ ॥ ❀ ❀ काममिति । हे वीर ! कामं यथेष्टं जलमाक्रम्यापि प्रयाहि गच्छ । विश्रवसः प्रजापतेरवमेहं पुरोषतुल्यं त्रैलोक्यं रावयत्याक्रन्दयतीति तथा तं दशकन्धरं जहि पत्नीं सीतामवाप्नुहि । यद्यपि मदीयं जलं तव प्रतिबन्धकं न भवति तथापि ते तव यशसो वितत्यै विस्तारायेह जले सेतुं बध्नीहि बधान । शानजभाव आर्षः । तं सेतुमुपेत्य दुष्करं त्वत्कर्म दिग्विजयिनो भूपास्त्वद्यशो गायन्ति गास्यन्ति ॥ १५ ॥ ❀ ❀ बद्ध्वेति । कपीन्द्राणां कूटैः शिखरैः उदधौ सेतुं बद्ध्वा रघुपतिः श्रीरामः सुग्रीवादयः प्रमुखाः मुख्या येषु तैरनीकैः सैन्यैः सह अग्रे सीतान्वेषणसमये हनुमतैव दग्धां लङ्कां बिभीषणदृशा तत्प्रदर्शितमार्गेण आविशत् प्रविवेश ॥ १६ ॥

वीरराघवव्याख्या

रक्ष इति । रक्षसो रावणस्य स्वसुर्भगिन्याः शूर्पणख्याः अशुद्धबुद्धेः सीताक्षिघृक्षोः कामातुराया वा रूपं व्यकृत विकृतमकरोत् तस्याः शूर्पणख्याः खरादिप्रमुखाः बन्धवो येषु तान् चतुर्दशसहस्रं सहस्राणि बन्धूनित्यत्र लिङ्गव्यत्ययः सहस्रमित्यत्र वचनव्यत्ययश्चार्षः जघान हतवान् आर्षत्वात् सापेक्षस्यापि बन्धुशब्दस्य वृत्तिः नित्यसापेक्षत्वाद्वा तथाचोक्तं हरिणा "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते" इति कथम्भूतः ? अवारणीयमलङ्घ्यमसह्यं कोदण्डं धनुः पाणौ यस्य तथाभूतः ततः इतस्ततो वनं सञ्चरन् कृच्छ्रमुवास वनवासस्य दुःखरूपत्वप्रदर्शनाय कृच्छ्रमिवोवासेत्युक्तिः नित्यानन्दरूपस्य तस्य दुःखाभावात् ॥ ९ ॥ सीतेति । सीतायाः कथाश्रवणेन दीपितः हृच्छयः कामो यस्य तेन दशकन्धरेण रावणेन सीतां जिघृक्षुणा स्वयं तत्र गन्तुं भीतेन सृष्टं प्रेषितं मारीचं विलोक्य हे नृपते ! अद्भुतमेणस्यैव वपुर्यस्य तेन सीतया क्रीडार्थमपेक्षितेन मारीचेनाश्रमतः स्वाश्रमादपकृष्टः प्रलोभनपूर्वकमाश्रमतोऽपकृष्टः सन् आशु विशिखेन बाणेन तं मारीच जघ्ने हतवान् यथा कं दक्षमुग्रो रुद्रस्तद्वत् ॥ १० ॥ रक्ष इति । तदा रक्षोऽधमेन रावणेनाश्रमक्षं रामलक्ष्मणयोरिति शेषः । मृगानयनार्थं रामस्य तद्वृत्तान्ताज्ञानार्थं लक्ष्मणस्य च प्रेषितत्वात् तयोरसान्निध्ये सति वने वृकवत् वृकेणेव वैदेहराजदुहितरि सीतायामपयापितायामपहृत्य लङ्कां प्रति प्रापितायां सत्यां प्रियया वियुक्तो भ्रात्रा लक्ष्मणेन सह कृपणवत् दुःखीव वने चचार, किङ्कुर्वन् ? इति अनेन प्रकारेण स्त्रीसङ्गिनां दुःखोदर्कां गतिं प्रथयन् प्रख्यापयन् ॥ ११ ॥ ❀ ❀ दग्ध्वेति । आत्मनः श्रीरामस्य यत्कृत्यं प्रयोजनं सीतानिर्मोचनरूपं तेन निमित्तेन हतं रावणेन सह युद्धे हतं गृध्रं जटायुषं दग्ध्वा कबन्धम् अहन् जघान ततः कपिभिर्वानरैः सह सख्यं विधाय कृत्वा अथ वालिनि हते सति तैः कपिभिर्दयितायास्सीताया गतिं बुद्धवा अजभवाभ्यां ब्रह्मरुद्राभ्यामर्चितावङ्घ्री यस्य तथाभूतोऽपि स श्रीरामः मनुजावतारूपत्वात् प्लवगेन्द्राणां कपीन्द्राणां सैन्यैः सह वेलां तीरं समुद्रस्येति शेषः अगात् जगाम ॥ १२ ॥ ❀ ❀ यदिति तत्र त्रिरात्रमुपवासेनापि प्रतीक्षितः सिन्धुर्यदा नोपस्थितस्तदा यस्य रोषविभ्रमेण क्रोधलीलया विवृत्तो यः कटाक्षस्तस्य पातेन सभ्रान्ताः नक्रा मकराश्च यस्मिन् भयेन गीर्णस्तम्भितो घोषो येन स सिन्धुरर्हणमर्घ्यादिद्रव्यं शिरसि परिगृह्य निधाय रूपी मूर्तिमान् पादारविन्दमुपगम्य शरणं गत्वा एतद्वक्ष्यमाणं बभाषे ॥ १३ ॥ ❀ ❀ भाषणमेवाह—न त्वमिति द्वाभ्याम् । हे भूमन ! तं प्रायोपविष्टं त्वामेतावत्पर्य्यन्तं जडधियो वयं कूटस्थं निर्विकारं जगतामधीशमादिपुरुषं न विदामः न जानीमः । इदानीं तु ज्ञातोसीत्याह, यदिति । यदिति पृथक्पदं लुप्तषष्ठ्यन्तं यस्य तव नियाम्यात्सत्त्वतः सत्त्वगुणात्सुरगणा इति शेषः । रजसो गुणात्प्रजेशाः प्रजापतयः मन्योस्तमसः भूतपतयो रुद्रादयः स भगवान् गुणेशः सत्वादिगुणानां नियन्तेत्यधुनाऽहं मन्य इत्यर्थः ॥ १४ ॥ ❀ ❀ काममिति । कामं यथेच्छं जलमाक्रम्यापि प्रयाहि गच्छ विश्रवसः प्रजापतेरवमेहं पुरोषप्रायं त्रैलोक्यं रावयत्याक्रन्दयतीति तथा तं दशकन्धरं जहि हे वीर ! पत्नीं सीतामवाप्नुहि यद्यपि तव मदीयं जलं न प्रतिबन्धकं भवति तथापि सेतुं बध्नीहि किमर्थमित्यत्राह—ते तव यशसो विभूत्यै विस्ताराय तथाहि दिग्विजयिनो भूपाः यं सेतुमुपेत्य दुष्करं त्वत्कर्मावेक्ष्य त्वद्यशो गास्यन्ति ॥ १५ ॥ ❀ ❀ तद्वाक्यमभिनन्द्य यत्कृतं तदाह—बद्ध्वेति । कपीन्द्राणां करैः कम्पितानि भूरुहाणामङ्गानि शाखादीनि येषु तैर्विविधानामद्रीणां कूटैः शिखरैरुदधौ सेतुं बद्ध्वा रघुपतिः सुग्रीवादयः प्रमुखा येषां तैरनीकैः कपिभिः सह अनीकैरिति पाठे सैन्यैः सहेत्यर्थः । अग्रे सीतान्वेषणसमये हनुमतैव दग्धां लङ्कां विभीषणदृशा बुद्ध्वा तत्प्रदर्शितमार्गेणेतिभावः आविवेश ॥ १६ ॥

विजयध्वजतीर्थकृता पदरत्नावली

रक्षस्स्वसुः शूर्पणख्याः रूपं व्यकृत कर्णनासिकाच्छेदनलक्षणविकारं कारितवान् अटमानः वन इति शेषः ॥ ९ ॥ शूर्पणखीमुखात्सीतायाः सौन्दर्यादिविषयकथायाः श्रवणेन दीपितः प्रज्वलितो हृच्छयः कामो यस्य स तथा तेन दशकन्धरेण रावणेन सृष्टं प्रतिपाद्य प्रेषितम् "उत्सर्जनविसर्जनेन विश्राणनं वितरणं स्वर्शनं प्रतिपादनम्" इत्यभिधानम् । कृतैणवपुषा

विरचितमृगाकारेणाश्रमतः समीपे विचरन्तं विलोक्य सीतया प्रकृष्टः उल्लिखितो मेदितो वशीकृत इति यावत् आश्रमतोऽपकृष्टः दूरं नीतो रामो विशिखेन मारीचम् आशु जघ्ने इत्यन्वयः। उग्रो नरसिंहो हिरण्यकशिपुनामानम् अरिं "उग्रो जज्ञे वीर्याय स्वधावान्" इति श्रुतिः। रुद्रोन्धकाख्यं रिपुं वा "उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्" इत्यभिधानम् ॥ १० ॥ निऋत्यादिराक्षसविवक्षया रक्षोधमेन रावणेन विपिने वृकवत्स्थितेन वृणोत्यावृणोत्यात्मानमिति वेषान्तरेण स्थितेनेत्यर्थः। असमक्षमप्रत्यक्षं रामस्येति शेषः। वैदेहराजदुहितरि सीतायामपयापितायामपनीतायाम् अवने नियुंक्तेन भ्रात्रा लक्ष्मणेन रहितायामिति शेषः। प्रियया सीतया वियुक्तः लोकदृष्टयेति शेषः। स्त्रीसङ्गिनां रतिमितीत्थं प्रथयन् प्रख्यापयन् चचार अनेन विटजनशिक्षणार्थमेवं दर्शितमिति ज्ञायते प्रथयन्नित्युक्तेः। किमर्थमेवं कल्पना ? तत्स्वभावानुभवादिकं न स्यादिति चेन्न।—

"नित्यपूर्णसुखज्ञानस्वरूपोऽसौ यतो विभुः। ततोऽस्य राम इत्याख्या तस्य दुःखं कुतोऽण्वपि ॥
तथापि लोकशिक्षार्थमदुःखो दुःखवर्तिवत्। अन्तर्हितां लोकदृष्टया सीतामासीत्स्मरन्निव" ॥

इति स्मृतिविरोधात् प्रियया वियुक्तत्वदर्शनमपि लोकदृष्ट्यपेक्षयेति ज्ञातव्यम्। तत्कुतोवगतमिति चेत्—"ज्ञानार्थं पुनर्नित्यसम्बन्धः स्वात्मनः श्रिया। अयोध्याया विनिर्गच्छन् सर्वलोकस्य चेश्वरः। प्रत्यक्षं तु श्रिया सार्धं जगामानादिरव्ययः ॥" इति स्मृत्या ज्ञातव्यम्। एवमन्यत्रापि प्रमाणसामर्थ्यात्सर्वत्राप्यनुसन्धेयोऽन्यार्थ इति विशदं समस्तम् ॥ ११-१२ ॥ ❀ ❀ इतोपि श्रीरामः साक्षान्नारायणावतार एव न देवदत्ताद्यन्यतमः तस्य प्रियावियोगादिना दुःखप्रकटनमसुरजनमोहनाय मानुषावतारदेवताजनशिक्षणाय चेत्येतदन्यैः श्लोकैरेव ज्ञातुं सुशकमित्याशयेन तन्माहात्म्यं प्रकटयति—यद्रोषेति। यस्य रामस्य रोषेण तीव्रश्च परिवृत्तश्च कटाक्षः यद्रोषतीव्रपरिवृत्तकटाक्षस्तस्य पातेन लक्ष्यवेधवद्विषयीकरणेन सम्भ्रान्ता इतस्ततोऽनवस्थिता नक्राश्च मकराश्च यस्मिन् स तथा भयेन गीर्णा नष्टो घोषो यस्मिन् स तथा अत एव तूष्णीं स्थित इत्यर्थः। अर्हणमर्घ्यपाद्यादि पूजासाधनम् रूपी करचरणादिविशिष्टावयवोपेतः ॥ १३ ॥ ❀ ❀ जडवदचेतनवद्धीर्येषां ते तथा ज्ञानपूर्वप्रवृत्तिशून्या इत्यर्थः जडाधारा इत्यर्थोपि ग्राह्यः अनेन तावदेवास्मत्तः प्रयोजनमिति सूचयति—वेदान्ते जगत्कारणस्य ब्रह्मत्वं निरणायि रामस्य तदभावात्तत्त्वं कथमिति चेत्तदस्याप्यस्तीत्याह—त्वमिति। यस्त्वं सत्त्वगुणात्सुरगणान् असृक्षीः रजोगुणात् प्रजेशान् मनुष्यानसृजः मन्योस्तमोगुणाच्च भूतपतयः भूतपतीन् ब्रह्मराक्षसादिलक्षणासुरान् उदभावयः स परमाण्वादिमहत्तत्त्वांतजगतः कर्ता भवान्नान्यः गुणैः प्रवर्त्तमानस्य गुणनिमित्ताभिभवो नाशङ्कनीयः गुणानां तदधीनत्वादित्याशयेनाह—गुणेश इति क्रोधस्य तमःकार्यत्वात्तेन तल्लक्षयति ॥ १४ ॥ ❀ ❀ यथाऽग्निमेहो विष्ठा शरीरान्निर्गता शुनामुपभोगाय भवति तथाऽयमपि विश्रवसो देहान्निर्गतत्वेनाग्निमेहस्थानीयस्वच्छरनिर्भिन्नहृदयः शुनामशनाय स्यादित्यतो विश्रवसोऽग्निमेहमित्युक्तं त्रैलोक्यस्य रोदनकरणत्वात् त्रैलोक्यरावणम् हे वीर ! इह मयि वितत्यै विस्ताराय यं सेतुम् ॥ १५ ॥ ❀ ❀ विविधाद्रिकूटैर्नानाविधपर्वतशृङ्गैः कपीन्द्राणां करैः कम्पितानि भूरुहाणां वृक्षाणाम् अङ्गानि शाखोपशाखालक्षणानि येषु तानि तथा तैः ॥ १६ ॥

जीवगोस्वामिकृतः क्रमसन्दर्भः

इति अनेन प्रकारेण परमभक्तानुकम्पोद्दीपनप्रकारेण स्त्रीसङ्गिनां या गतिश्चेष्टा विलापाद्या तामेव प्रथयन् विस्तारयन् चचार इतस्ततो बभ्राम इदमेवोक्तं प्रिययेति वक्ष्यते च दयितेत्यादि ॥ ११ ॥ ❀ ❀ सङ्गतोऽनुजः श्रीलक्ष्मणो यत्र तादृशः ॥ १२-२९ ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

रक्षसो रावणस्य स्वसुः शूर्पणखायाः रूपं व्यकृत कर्णनासाच्छेदेन विकारमनयत् जघ्ने जघान अपारणीयम् अन्यैरसह्यं कोदण्डं पाणौ यस्य सः ततश्च अटमानः वने भ्रमन् कृच्छ्रं सकष्टमुवास ॥ ९ ॥ ❀ ❀ ततश्च शूर्पणखामुखात् श्रुत्वा सीतां हरिष्यता रावणेन स्वस्माद्गीतेन स्वस्याश्रमादपकर्षणार्थं सृष्टं विसृष्टं प्रेषितं मारीचं विलोक्य जघान, कथम्भूतम् ? अद्भुतैणवपुषा स्वर्णहरिणशरीरेणोपलक्षितं स्वयं कथम्भूतः ? आश्रमतोऽपकृष्टः दूरं गतः कं दक्षं यथा उग्रः श्रीरुद्रः ॥ १० ॥ रक्षोधमेन रावणेन वृकवत् वृकेणेव असमक्षं परोक्षत एवापयापितायाम् अपहृतायां सत्यां प्रियया प्रेमवत्या सीतया वियुक्तः विप्रलम्भशृङ्गाररसाश्रयलम्बनीभूतः। प्रेमाणमेव विप्रलम्भरसमयीभूतमास्वादयन् तदनुभावसात्त्विकसञ्चार्यादिकं विलापमूर्च्छोन्मादादिकं प्रकटयन्नेव चचार कथम्भूतः ? इतीत्यनेनैव प्रकारेण स्त्रीसङ्गिनां गतिं विलापादिदुःखोदर्कां प्रथयन् बहिर्दर्शिनो जनान् प्रख्यापयन् अन्तर्दर्शिनस्तु गतिं प्रख्यापयन् इति प्रथामात्रमेवेत्तन्न तु वस्तुत इत्यर्थः, "चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हरौ" इति रामतापनीश्रुत्यादिप्रमाणेन चिदानन्दमयमनोबुद्धीन्द्रियशरीरस्य परब्रह्मणस्तस्य दुःखसम्भा-

वनापि शास्त्रयुक्तिप्रतिकूलेति पञ्चमस्कन्धीयकिंपुरुषवर्षरामप्रसङ्गव्याख्यानयुक्त्या जानन्त्येव ॥ ११ ॥ ❀ ❀ आत्मार्थेन कृत्येन कर्मणा रावणेन सह युद्धेन हतं कृत्यं शास्त्रीयं दहनादिकं यस्य जटायुषं पुत्र इव दग्ध्वा कबन्धं स्वग्रहणाय प्रसारितबाहुं राक्षसमहन् अथ बालिनिहते सति तैः कपिभिर्दयितागतिं बुद्ध्वा वेलां समुद्रतीरं मनुजो रामः ॥ १२ ॥ ❀ ❀ तत्र त्रिरात्रोपवासेन प्रतीक्षितोऽपि सिन्धुर्यदा नोपतस्थे तदा स्वैर्यर्यं सस्मारेत्याह—यस्य रोषविभ्रमेण क्रोधविलासेन विवृत्तो विकटो यः कटाक्षपातस्तेन सम्भ्रान्ता विपन्ना नक्रा मकराश्च यस्य सः भयेन गीर्णः ग्रस्तः स्तम्भितो घोषो येन सः अर्हणमर्घ्यादि-पूजोपहारम् ॥ १३ ॥ ❀ ❀ जडधियो जलधित्वादज्ञाः स्वशास्तिमप्राप्य त्वां न विदामः। पशवो हि लकुडप्रहार-मनवाप्य मनुष्यं यथा न गणयन्ति तथेति भावः। नन्वधुना परिचितोऽस्मि न वा तत्राह—यदिति। पृथक्पदं यस्येत्यर्थः। मन्योस्तमसः तस्य गुणस्य गुणरूपप्रधानस्य ईशः नियन्ता ॥ १४ ॥ ❀ ❀ विश्रवसोऽवमेहं मूत्रतुल्यं त्रैलोक्यं रावयति क्रन्दयतीति तथा तं यं सेतुमुपेत्य गायन्ति त्वद्यशो गास्यन्ति ॥ १५ ॥ ❀ ❀ अद्रिशृङ्गैः कोद्दशैः कपीन्द्राणां करैः कम्पितानि भूरुहाणामङ्गानि शाखादीनि येषु तैः विभीषणस्य दृशा बुद्ध्या ॥ १६ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

रक्षसः रावणस्य स्वसुः अशुद्धबुद्धेः भगवत्प्रियां जिघृक्षोः रूपं व्यकृत विकारमनयत् तस्याः खरत्रिशिरोदूषणमुख्या ये बन्धवस्तान् चतुर्दशसहस्रं जघ्ने जघान हतवान् अपारणीयम् असह्यं कोदण्डं धनुः पाणौ यस्य तथाभूतः अटमानः सञ्चरन् कृच्छ्रं यथा तथा उवास संसारिणां दुःखदत्वं द्योतयितुं कृच्छ्रमुवासेत्युक्तं परमेश्वरस्य दुःखाभावात् ॥ ९ ॥ ❀ ❀ हे नृपते ! सीताकथाश्रवणेन दीपितो हृच्छयो यस्य तेन सृष्टं नियुक्तम् अद्भुतैणवपुषापलक्षितं मारीचं तेनैवाऽऽश्रमतोऽपकृष्टः विलोक्य आशु जघ्ने जघान यथा कं दक्षम् उग्रो वीरभद्रः ॥ १० ॥ ❀ ❀ तदा रक्षोऽधमेन रावणेन वृकवत् वृकेणेव असमक्षं चौर्येण वैदेहराजदुहितरि अपयापितायाम् एवं प्रियया वियुक्तः भ्रात्रा सह वने चचार, किं कुर्वन्? इति अनेन प्रकारेण स्त्रीसङ्गिनां दुःखोदर्कां गतिं प्रथयन् प्रख्यापयन् ॥ ११ ॥ ❀ ❀ आत्मार्थेन श्रीरामार्थेन कृतेन सीतानिर्मोचन-प्रयत्नेन हतानि कृत्यानि संसारप्रापकानि कर्माणि यस्य तं जटायुषं तच्छरीरं दग्ध्वेत्यर्थः। जटायुर्मुक्तोऽभूदिति भावः। कबन्धं राक्षसं च अहन् जघान ततः कपिभिः सुग्रीवादिभिः सह सख्यं विधाय अथ वालिनि सुग्रीवविरोधिभूते हते तैः कपिभिः दयितागतिं बुद्ध्वा अजभवाभ्यामर्चितावङ्घ्री यस्य तथाभूतः सः श्रीरामः मनुजः मनुवंशे आविर्भूतः प्लवगेन्द्रसैन्यैः सह वेलां समुद्रतीरमगात् ॥ १२ ॥ ❀ ❀ लङ्कां जिगमिषुः श्रीरामः समुद्रतीरे त्रिरात्रमुपवासं कृतवान् तदाप्यनागतं समुद्रं प्रति रोषं चकार तदा यस्य श्रीरामस्य रोषविभ्रमेण क्रोधलीलया विवृत्तस्य प्रस्फुरितस्य कटाक्षस्य पातेन सम्भ्रान्ताः नक्रा मकराश्च यस्मिन् भयेन गीर्णस्तम्भितो घोषो येन सः सिन्धुः रूपी मूर्तिमान सन् अर्हणम् अर्घ्यादिकं शिरसि परिगृह्य पादारविन्दमुपगम्य एतद्वक्ष्यमाणं बभाषे ॥ १३ ॥ ❀ ❀ हे भूमन्! जडधियः वयम् अत एव त्रिरात्रमिह वसन्तं कूटस्थं निर्विकारमादिपुरुषं जगतामधीशं नु निश्चितं न विदाम इदानीं तु जानीमः यदिति पृथक्पदं यस्य सत्त्वादितः सुरगणादयः सगुणेशत्वादिगुणनियन्ता भवानिति ॥ १४ ॥ ❀ ❀ कामं यथेष्टं सेतुं विनैव जलमाक्रम्यापि प्रयाहि विश्रवसः अवमेहं पुत्रापसदं त्रैलोक्यं रावयत्याक्रन्दयतीति तथापि दशकन्धरं जहि हे वीर! तथापि दिग्विजयिनो भूपाः यमुपेत्य तव यशो गायन्ति गास्यन्ति तम् इह मयि ते यशसो वितत्यै बध्नीहि ॥ १५ ॥ ❀ ❀ एवं समुद्रेणोक्तो रघुपतिः कपीन्द्राणां करैः कम्पितानि भूरुहाणां द्रुमाणामग्राणि येषु तैर्विविधाद्रिकूटैः उदधौ सेतुं बद्ध्वा अग्रे हनुमता दग्धां लङ्कां विभीषणदृशा विभीषणानुमत्या सुग्रीवादिभिः सह अविशत् ॥ १६ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

रक्षसो रावणस्य स्वसुर्भगिन्याः शूर्पणखायाः रूपं व्यकृत नासादिच्छेदनेन विकृतम् अकरोत्। तथाकरणे हेतुमाह—अशुद्धबुद्धेरिति, कामातुरतया सीतायास्तिरस्कारे प्रवृत्ताया इत्यर्थः। ततस्तया प्रेरितान् तस्याः शूर्पणखायाः खरत्रिशिरोदूषण-मुख्या बन्धवो येषु तांश्चतुर्दशसहस्रं राक्षसान जघान। तत्र साधनं दर्शयन् विशिनष्टि—अपारणीयं अलङ्घ्यम् असह्यं कोदण्डं धनुः पाणौ यस्य सः अटमान इतस्ततो वने सञ्चरन् जनशिक्षार्थं कृच्छ्रं कष्टं यथा भवति तथा उवास ॥ ९ ॥ ❀ ❀ ततश्च शूर्पणख्या मुखात् सीतायाः कथाश्रवणेन दीपितो हृच्छयः कामो यस्य तेन दशकन्धरेण रावणेन सीतां जिघृक्षुणा स्वयं तत्र गन्तुं भीतेन सृष्टं प्रेषितं मारीचं विलोक्य अद्भुतं स्वर्णमयमेणस्य हरिणस्येव वपुर्यस्य तेन सीतया क्रीडार्थम् अपेक्षितेन मारीचेना-श्रमतोऽपकृष्टः सन् विशिखेन बाणेन तं मारीचमाशु जघ्ने हतवान्। तत्र दृष्टान्तमाह—यथेति। यथा कं दक्षमुग्रो वीरभद्रो जघान तथेत्यर्थः। भवत इव तस्यापि सा मृगयाऽनर्थकरी जातेति सूचयन् सम्बोधयति—नृपते इति ॥ १० ॥ ❀ ❀

तदेव दर्शयति—रक्ष इति। रक्षोधमेन रावणेन असमक्षं मृगानयनार्थं रामस्य तद्वृत्तज्ञानार्थं च लक्ष्मणस्य प्रेषितत्वात् तयोरसन्निधाने वैदेहराजदुहितरि सीतायां अपयापितायां अपहृत्य लङ्कां प्रति प्रापितायां सत्यां तया प्रियया भार्यया वियुक्तो भ्राता लक्ष्मणेन सह इत्यनेन प्रकारेण स्त्रीसङ्गिनां दुःखोदर्कां गतिं प्रथयन् प्रख्यापयन् कृपणवत् दुःखिवच्चचारेत्यन्वयः। नित्यानन्दविग्रहस्य दुःखित्वाद्यसम्भवात् वतिप्रयोगः। रावणस्याधमत्वमुपपादयन् दृष्टान्तमाह—वृकवदिति। विपिने रक्षकहीनं मेषं यथा वृको हरति तद्वदित्यर्थः॥ ११॥ ❀ ❀ आत्मनः स्वस्य कृत्यं प्रयोजनं सीतानिर्मोचनरूपं तदर्थं रावणेन सह युद्धे हतं कृत्यं पौरुषं यस्य तं गृध्रं जटायुषं दग्ध्वा तस्य पारलौकिकीं दाहादिक्रियां कृत्वा कबन्धं स्वग्रहणाय प्रसारितबाहुं राक्षसमहन्। ततः कपिभिः सह सख्यं विधाय अथानन्तरं वालिनि हते सति तैः कपिभिः दयितायाः सीतायाः गतिं बुद्ध्वा स श्रीरामः सर्वगेन्द्राणां वानरश्रेष्ठानां सैन्यैः सह वेलां समुद्रस्य तीरमगात्। ननु वानरसहायस्य तस्य कथमीश्वरत्वमित्यत आह—अजेति। अजभवाभ्यां ब्रह्मरुद्राभ्याम् अर्चितावङ्घ्री यस्य सः। तर्हि किमर्थं वानरान् सहायीकृतवांस्तत्राह—मनुज इति, मनुष्यनाट्यस्वीकारादित्यर्थः॥ १२॥ ❀ ❀ तत्र त्रिरात्रमुपवासपूर्वकं प्रतीक्षतोऽपि सिन्धुर्यदा नोपस्थितः आत्मानमवज्ञाय स्थितस्तदा यस्य रोषविभ्रमेण क्रोधलीलया विवृत्तो यः कटाक्षस्तस्य पातेन सम्भ्रान्ता नक्रा मकराश्च यस्मिन् सः अतो भयेन गीर्णः स्तम्भितो घोषो येन सः सिन्धू रूपी मूर्तिमान् सन् अर्हणमर्घादिपूजोपहारं स्वशिरसि परिगृह्य निधाय तत्पादारविन्दमुपगम्य शरणमागत्य एतद्वक्ष्यमाणं बभाषे इत्यन्वयः॥ १३॥ ❀ ❀ तव ज्ञानं तु निर्मलान्तःकरणानामपि दुर्लभं जडधियां तथात्वे किं वक्तव्यमित्याशयेन सम्बोधयति—भूमन्निति। जडा मोहिता धीर्येषां ते वयमेतावत्कालपर्यन्तं त्वां नानुविदामः न जानीम इत्यन्वयः। इदानीं कथम्भूतं ज्ञातवानसीत्यपेक्षायामाह—जगतामधीशं नियन्तारमिति। तत्र हेतुमाह—आदिपुरुषमिति, सर्वकारणमित्यर्थः। तर्हि विकारित्वं स्यादित्याशङ्क्याह—कूटस्थमिति, निर्विकारमित्यर्थः। सर्वकारणस्य कथं निर्विकारित्वमित्याशङ्क्याह—यदिति लुप्तषष्ठ्यन्तं पृथक्पदम्। यस्य तव नियमात्सत्त्वतः सत्त्वगुणात् सुरगणा जाताः, रजसो गुणात् प्रजेशाः प्रजापतयो जाताः, मन्योस्तमोगुणात् भूतपतयो रुद्रादयो जाताः, स गुणेशः सत्त्वादिगुणानामीशो नियन्ता भवान्, अतो न तव विकारित्वमित्याशयः॥ १४॥ ❀ ❀ तव तु न किमप्यशक्यमिति सूचयन् सम्बाधयति—हे वीरेति। कामं यथेष्टं जलमाक्रम्यापि प्रयाहि गच्छ, विश्रवसः प्रजापतेरवमेहं पुरीषतुल्यं त्रैलोक्यं रावयत्याक्रन्दयतीति तथा तं दशकन्धरं जहि पत्नीं सीतां अवाप्नुहि। यद्यपि मदीयं जलं तव प्रतिबन्धकं न भवति तथापि ते तव यशसो वितत्यै विस्ताराय इह जले सेतुं बध्नीहि। सेतुमुपेत्य दुष्करत्वं कर्मावेद्य दिग्विजयिनो भूपाश्चद्यशो गास्यन्ति॥ १५॥ ❀ ❀ तद्वाक्यमभिनन्द्य यत्कृतं तदाह—बद्ध्वेति। कपीन्द्राणां करैः कम्पितानि भूरुहाणामङ्गानि शाखादीनि येषु तैर्विविधानामद्रीणां कूटैः शिखरैः उदधौ सेतुं बद्ध्वा रघुपतिः श्रीरामः सुग्रीवादयः प्रमुखाः मुख्याः येषु तैरनीकैः सैन्यैः सह अग्रे सीतान्वेषणसमये हनुमतैव दग्धां लङ्कां विभीषणदृशा तत्प्रदर्शितमार्गेण आविशत् प्रविवेश॥ १६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

रक्ष इति। रक्षःस्वसुः रावणस्य भगिन्याः, अशुद्धबुद्धेः सीतां जिघृक्षोः, कामातुरायाः वा, यस्याः शूर्पणखायाः रूपं व्यकृत नासादिच्छेदनेन विकृतम् अकरोत्। तस्याः शूर्पणखायाः, चतुर्दशसहस्रं चतुर्दशसहस्रपरिमितान् खरत्रिशिरदूषणमुख्यबन्धून्, आर्षत्वात्सापेक्षस्यापि बन्धुशब्दस्य वृत्तिः। नित्यसापेक्षत्वाद्वा। तथाचोक्तं हरिणा। 'संबन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते' इति। अपारणीयमलङ्घ्यमसह्यं वा, कोदण्डं धनुः पाणौ यस्य स एवंभूतः सन्, जघ्ने। अटमानः इतस्ततो वने संचरन् सन्, कृच्छ्रम् उवाह। वनवासस्य दुःखरूपत्वप्रदर्शनाय कृच्छ्रमिवोवासेत्यर्थः। नित्यानन्दरूपस्य तस्य दुःखाभावादिति भावः॥ ९॥ ❀ ❀ सीतेति। सीताया या कथा तस्याः श्रवणेन दीपितो हृच्छयः कामो यस्य तेन दशकंधरेण रावणेन, सृष्टां, सीतां जिघृक्षुणा स्वयं तत्र गन्तुं भीतेन रावणे स्वर्णवर्णमृगरूपेण सृष्ट्वा तत्र प्रेषितमित्यर्थः। मारीच, विलोक्य श्रीरामो दृष्ट्वा, हे नृपते, अद्भुतं स्वर्णवर्णत्वादाश्चर्यरूपमेतस्य वपुर्यस्य तेन, सीतया क्रीडार्थमपेक्षितेन मारीचेनेत्यर्थः। आश्रमतः स्वाश्रमात् अपकृष्टः प्रलोभनपूर्वकमाश्रमतोऽपकृष्टः सन्, आशु विशिखेन बाणेन, कं दक्षं, उग्रः रुद्रः, यथा तथा, तं मारीचं, जघ्ने हतवान्॥ १०॥ ❀ ❀ रक्षोऽधमेनेति। तदा रक्षोऽधमेन रावणेन, असमक्षं रामलक्ष्मणयोरिति शेषः। मृगानयनार्थं गतस्य रामस्य तद्वृत्तज्ञानार्थं गतस्य लक्ष्मणस्य चासांनिध्ये सतीत्यर्थः। विपिने वने, वृकवद्वृकेनेवेत्यर्थः। वैदेहराजदुहितरि सीतायां, अपयापितायामपहृत्य लङ्कां प्रति प्रापितायां सत्यां, प्रियया वियुक्तः, भ्रात्रा लक्ष्मणेन सह, कृपणवत् दुःखी इव स्त्रीसङ्गिनां, गतिं दुःखोदर्कामिति शेषः। इति प्रथयन् प्रख्यापयन्, वने चचार॥ ११॥ ❀ ❀ दग्ध्वेति। आत्मनः श्रीरामस्य यत् कृत्यं प्रयोजनं सीतानिर्मोचनरूपं तेन निमित्तेन हतः रावणेन सह युद्धे हतो यो गृध्रो जटायुस्तं, दग्ध्वा, कबन्धं स्वग्रहणाय प्रसारितकरं राक्षसं, अहन् संजघान। ततः, कपिभिर्वानरैः सह, सख्यं विधाय, अथ वालिनि हते सति,

तैः कपिभिः, दयितागतिं, बुद्ध्वा, अजभवाभ्यां ब्रह्मरुद्राभ्यामर्चितावङ्घ्री पादौ यस्य सः। एवंभूतः सन्नपि, मनुजः लौकिक-मनुष्यवत्प्रतीयमानः, सः श्रीरामः, प्लवगेन्द्राणां कपीन्द्राणां, सैन्यानि तैः सह, वेलां तीरं, समुद्रस्येति शेषः। अगाद्ध्रगाम ॥१२॥ यदिति। यद्यदा तत्र त्रिरात्रमुपवासेनापि प्रतीक्षितः सिन्धुर्नोपस्थितस्तदेति शेषः। यस्य श्रीरामस्य, रोषविभ्रमः कोपविभ्रमः क्रोधलीला इति यावत्। तेन विवृत्तः प्रसृतो यः कटाक्षस्तस्य पातेन संभ्रान्ता नक्रा मकराश्च यस्मिन् सः, भयेन शीर्णस्तम्भितो घोषो येन सः, गीर्ण इति पाठेऽप्ययमेवार्थः। सिन्धुः, अर्हणमर्घ्यद्रव्यं, पूजोपहारमिति यावत्। शिरसि, परिगृह्य निधाय, रूपी मूर्त्तिमान् सन्, पादारविन्दम् उपगम्य शरणं गत्वा, एतद्वक्ष्यमाणं, बभाषे ॥१३॥ ❀ ❀ भाषणमेवाह तमिति द्वाभ्याम्। तमिति। हे भूमन्, जडधियो मूढमतयः वयं, कूटस्थं निर्विकारं, जगताम् अधीशम् आदिपुरुषं तं प्रायोपविष्टं, त्वा त्वां, एतावत्पर्यन्तमिति शेषः। न विदामो न जानीमः। इदानीं तु ज्ञातोऽसीत्याह। यदिति पृथक् पदं लुप्तषष्ठ्यन्तम्। यस्य तव, सत्त्वतः त्वन्नियम्यात् सत्त्वगुणादित्यर्थः। सुरगणा देवगणाः, जज्ञिरे इति शेषः। रजसस्त्वन्नियम्याद्रजोगुणादित्यर्थः। प्रजेशाः प्रजापतयः, जज्ञिरे। मन्योस्त्वन्नियम्यात्तमसो गुणादित्यर्थः। भूतपतयः रुद्रादयश्च जज्ञिरे। सः भवान्, गुणेशः सत्त्वादिगुणानां नियन्ता, इति अहमधुना मन्ये इत्यर्थः ॥ १४ ॥ ❀ ❀ काममिति। कामं यथेच्छं, जलमाक्रम्यापीत्यर्थः प्रयाहि गच्छ। विश्रवसः प्रजापतेः, अवमेहं पुरीषप्रायं, त्रैलोक्यरावणं त्रैलोक्यात्याक्रन्दकरं दशकंधरं, जहि मारय। हे वीर, पत्नीं सीतां, अवाप्नुहि। यद्यपि तव मदीयं जलं न प्रतिबन्धकं भवति, तथापीति शेषः। इहास्मिन् मयि, ते तव, यशसः विभूत्यै विस्ताराय, सेतुं बध्नीहि। यं सेतुं, उपेत्य, दिग्विजयिनः भूपाः, गायन्ति। दुष्करं त्वत्कर्मावेक्ष्य त्वद्यशो गास्यन्तीत्यर्थः ॥ १५ ॥ ❀ ❀ तद्वाक्यमभिनन्द्य यत् कृतं तदाह। बद्ध्वेति। कपीन्द्राणां वानरेन्द्राणां, करैः कम्पितानि भूरुहाणां द्रुमाणामङ्गानि शाखादीनि येषु तैः। विविधानामद्रीणां कूटानि शिखराणि तैः, उदधौ सेतुं, बद्ध्वा, रघुपतिः सुग्रीवश्च नीलश्च हनुमांश्च ते प्रमुखा येषां तैः। अनेकैः कपिभिः, अनीकैरिति पाठे सैन्यैः सहेत्यर्थः। अग्रदग्धां सीतान्वेषणसमये हनुमता प्रथमत एव दग्धां लङ्कां, विभीषणस्य दृशा बुद्ध्या, विभीषणप्रदर्शितमार्गेणेति भावः। अविशत् प्रविवेश ॥ १६ ॥

भाषानुवादः

वनमें पहुँचकर भगवान्‌ने राक्षसराज रावणकी बहिन शूर्पणखाको विरूप कर दिया। क्योंकि उसकी बुद्धि बहुत ही कलुषित, कामवासनाके कारण अशुद्ध थी। उसके पक्षपाती खर, दूषण, त्रिशिरा आदि प्रधान-प्रधान भाइयोंको—जो संख्यामें चौदह हजार थे—हाथमें महान् धनुष लेकर भगवान् श्रीरामने नष्ट कर डाला; और अनेक प्रकारकी कठिनाइयोंसे परिपूर्ण वनमें वे इधर-उधर विचरते हुए निवास करते रहे ॥ ९ ॥ ❀ ❀ परीक्षित्! जब रावणने सीताजीके रूप, गुण, सौन्दर्य आदिकी बात सुनी तो उसका हृदय काम-वासनासे आतुर हो गया। उसने अद्भुत हरिनके वेषमें मारीचको उनकी पर्णकुटीके पास भेजा। वह धीरे-धीरे भगवान्‌को वहाँसे दूर ले गया। अन्तमें भगवान्‌ने अपने बाणसे उसे बात-की-बातमें वैसे ही मार डाला, जैसे दक्षप्रजापतिको वीरभद्रने मारा था ॥ १० ॥ ❀ ❀ जब भगवान् श्रीराम जंगलमें दूर निकल गये तब (लक्ष्मणकी अनुपस्थितिमें) नीच राक्षस रावणने भेड़ियेके समान विदेहनन्दिनी सुकुमारी श्रीसीताजी को हर लिया। तदनन्तर वे अपनी प्राणप्रिया सीताजीसे बिछुड़कर अपने भाई लक्ष्मणके साथ वन-वनमें दीनकी भाँति घूमने लगे। और इस प्रकार उन्होंने यह शिक्षा दी कि जो स्त्रियोंमें आसक्ति रखते हैं, उनकी यही गति होती है ॥ ११ ॥ ❀ ❀ इसके बाद भगवान्‌ने उस जटायुका दाह-संस्कार किया, जिसके सारे कर्मबन्धन भगवत्सेवारूप कर्मसे पहले ही भस्म हो चुके थे। फिर भगवान्‌ने कबन्धका संहार किया और इसके अनन्तर सुग्रीव आदि वानरोंसे मित्रता करके बालिका वध किया, तदनन्तर वानरोंके द्वारा अपनी प्राणप्रियाका पता लगवाया। ब्रह्मा और शङ्कर जिनके चरणोंकी वन्दना करते हैं, वे भगवान् श्रीराम मनुष्यकीसी लीला करते हुए बंदरोंकी सेनाके साथ समुद्रतटपर पहुँचे ॥१२॥ ❀ ❀ (वहाँ उपवास और प्रार्थनासे जब समुद्रपर कोई प्रभाव न पड़ा तब) भगवान्‌ने क्रोधकी लीला करते हुए अपनी उग्र एवं टेढ़ी नजर समुद्रपर डाली। उसी समय समुद्रके बड़े-बड़े मगर और कच्छ खलबला उठे। डर जानेके कारण समुद्रकी सारी गर्जना शान्त हो गयी। तब समुद्र शरीरधारी बनकर और अपने सिरपर बहुत सी भेंटें लेकर भगवान्‌के चरणकमलोंकी शरणमें आया और इस प्रकार कहने लगा ॥ १३ ॥ अनन्त! हम मूर्ख हैं, इसलिये आपके वास्तविक स्वरूपको नहीं जानते। जानें भी कैसे? आप समस्त जगत्‌के एकमात्र स्वामी, आदिकारण एवं जगत्‌के समस्त परिवर्तनोंमें एकरस रहनेवाले हैं। आप समस्त गुणोंके स्वामी हैं। इसलिये जब आप सत्त्वगुणको स्वीकार कर लेते हैं तब देवताओंकी, रजोगुणको स्वीकार कर लेते हैं तब प्रजापतियोंकी और तमोगुणको स्वीकार कर लेते हैं तब आपके क्रोधसे रुद्रगणकी उत्पत्ति होती है ॥ १४ ॥ ❀ ❀ वीरशिरोमणे! आप अपनी इच्छाके अनुसार मुझे पार कर जाइये और त्रिलोकीको रुलानेवाले विश्रवाके कुपूत रावणको मारकर अपनी पत्नीको फिरसे प्राप्त कीजिये। परन्तु

आपसे मेरी एक प्रार्थना है। आप यहाँ मुझपर एक पुल बाँध दीजिये। इससे आपके यशका विस्तार होगा और आगे चलकर जब बड़े-बड़े नरपति दिग्विजय करते हुए यहाँ आयेंगे, तब वे आपके यशका गान करेंगे ॥ १५ ॥ ❀ ❀ भगवान् श्रीरामजीने अनेकानेक पर्वतोंके शिखरोंसे समुद्रपर पुल बाँधा। जब बड़े-बड़े बंदर अपने हाथोंसे पर्वत उठा-उठाकर लाते थे, तब उनके वृक्ष और बड़ी-बड़ी चट्टानें थर-थर काँपने लगती थीं। इसके बाद विभीषणकी सलाहसे भगवान्‌ने सुग्रीव, नील, हनूमान् आदि प्रमुख वीरों और वानरीसेनाके साथ लङ्कामें प्रवेश किया। वह तो श्रीहनूमानजीके द्वारा पहले ही जलायी जा चुकी थी ॥ १६ ॥

सा वानरेन्द्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटङ्का ।
निर्भज्यमानधिषणध्वजहेमकुम्भशृङ्गाटका गजकुलैर्ह्रदिनीव घूर्णा ॥ १७ ॥
रक्षःपतिस्तदवलोक्य निकुम्भकुम्भधूम्राक्षदुर्मुखसुरान्तनरान्तकादीन् ।
पुत्रं प्रहस्तमतिकायविकम्पनादीन् सर्वानुगान् समहिनोदथ कुम्भकर्णम् ॥ १८ ॥
तां यातुधानपृतनामसिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गाम् ।
सुग्रीवलक्ष्मणमरुत्सुतगन्धमादनीलाङ्गदर्क्षपनसादिभिरन्वितोऽगात् ॥ १९ ॥
तेऽनीकपा रघुपतेरभिपत्य सर्वे द्वन्द्वं वरूथमिभपत्तिरथाश्वयोधैः ।
जघ्नुर्द्रुमैर्गिरिगदेषुभिरङ्गदाद्याः सीताभिमर्शहतमङ्गलरावणेशान् ॥ २० ॥
रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिससार रामम् ।
स्यन्दने द्युमति मातलिनोपनीते विभ्राजमानमहनन्निशितैः क्षुरप्रैः ॥ २१ ॥
रामस्तमाह पुरुषादपुरीष यन्नः कान्तासमक्षमसतापहृता श्ववत् ते ।
त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि काल इव कर्तुरलङ्घ्यवीर्यः ॥ २२ ॥
एवं क्षिपन् धनुषि संधितमुत्ससर्ज बाणं स वज्रमिव तद्धृदयं बिभेद ।
सोऽसृग् वमन् दशमुखैर्न्यपतद् विमानाद्धाहेति जल्पति जने सुकृतीव रिक्तः ॥ २३ ॥
ततो निष्क्रम्य लङ्काया यातुधान्यः सहस्रशः । मन्दोदर्या समं तस्मिन् प्ररुदत्य उपाद्रवन् ॥ २४ ॥

कृष्णप्रिया व्याख्या

अन्वयः—वानरेन्द्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटङ्का निर्भज्यमानधिषणध्वजहेमकुम्भशृङ्गाटका सा गजकुलैः ह्रादिनी इव घूर्णा ॥ १७ ॥ ❀ ❀ रक्षःपतिः तत अवलोक्य निकुंभकुंभधूम्राक्षदुर्मुखसुरान्तनरान्तकादीन् पुत्रं प्रहस्तम् अतिकायविकंपनादीन् सर्वानुगान् अथ कुंभकर्णं समहिनोत् ॥ १८ ॥ ❀ ❀ सुग्रीवलक्ष्मणमरुत्सुतगंधमादनीलांगदर्क्षपनसादिभिः अन्वितः असिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गां तां यातुधानपृतनाम् अगात् ॥ १९ ॥ ❀ ❀ ते सर्वे रघुपतेः अङ्गदाद्याः अनीकपाः इभपत्तिरथाश्वयोधैः वरूथं द्वंद्वम् अभिपत्य द्रुमैः गिरिगदेषुभिः सीताभिमर्शहितमंगलरावणेशान् जघ्नुः ॥ २० ॥ ❀ ❀ अथ स्वबलनष्टिम् अवेक्ष्य रुष्टः रक्षःपतिः यानकम् आरुह्य रामम् अभिससार मातलिना उपनीते द्युमति स्वःस्यन्दने विभ्राजमानं निशितैः क्षुरप्रैः अहनत् ॥ २१ ॥ ❀ ❀ रामः तम् आह पुरुषादपुरीष यत् असता श्ववत् नः कांता असमक्षम् अपहृता अलङ्घ्यवीर्यः कालः इव त्यक्तत्रपस्य जुगुप्सितस्य कर्तुः ते अद्य फलम् इच्छामि ॥ २२ ॥ ❀ ❀ एवं क्षिपन् सः धनुषि संधितं बाणम् उत्ससर्ज सः वज्रम् इव तद्धृदयं बिभेद सः दशमुखैः असृक् वमन् जने 'हा हा' इति जल्पति रिक्तः सुकृती इव विमानात् न्यपतत् ॥ २३ ॥ ❀ ❀ ततः सहस्रशः यातुधान्यः मंदोदर्या समं लंकायाः निष्क्रम्य प्ररुदत्यः तस्मिन् उपाद्रवन् ॥ २४ ॥

---

१. कोष० । २. पालक० । ३. महति । ४. स्वयन्ते । ५. रुदत्यस्ता० ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततश्च सा लंका घूर्णा प्रचलिता बभूव । कथंभूता वानरेंद्राणां बलै रुद्धा विहारादयो यस्याम् । निर्भज्यमाना धिषणादयो यस्यां सा । तत्र विहारः क्रीडास्थानम् । कोष्ठं धान्यागारादि । श्रीः कोशः । द्वारं गृहादीनाम् । गोपुरं पुरद्वारम् । सदः सभा । वलभी प्रासादादिपुरोभागच्छादिनी । विटंकः कपोतपालिका । धिषणं वेदिकादि । शृंगाटकं चतुष्पथम् ॥ १७ ॥ ❀ ❀ रक्षःपती रावणः । पुत्रमिंद्रजितं प्रहस्तादींश्च समहिनोत्पायुंक्त ॥ १८ ॥ ❀ ❀ असिशूलादिभिर्दुर्गमां तां यातुधानपृतनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात् । मरुत्सुतो हनूमान् । ऋक्षो जांबवान् ॥ १९ ॥ ❀ ❀ ते रघुपतेरनीकपा अंगदाद्याः सर्वे रावणस्येभादिभिर्यद्वरूथं सैन्यं तत्र द्वंद्वं यथा भवति तथाऽभिपत्य संगम्य द्रुमादिभिर्जघ्नुः । कान् । सीताया अभिमर्शेन हतं मंगलं यस्य सः रावण ईशो येषां तान् ॥ २० ॥ ❀ ❀ स्वबलस्य नष्टिं नाशमवेक्ष्य रुष्टः क्रुद्धः सन्यानकं पुष्पकं विमानं रथं वाऽऽरुह्य श्रीराममभिससार । अथ तं स्वः स्यंदने स्वर्गस्थे इंद्रस्य रथे मातलिनेंद्रसारथिनोपनीते द्युमति दीप्तियुक्ते विभ्राजमानमहनदहन् ॥ २१ ॥ ❀ ❀ हे पुरुषादपुरीष राक्षसपुरीषप्राय । यद्यस्मादपहृता । श्ववत् श्वा यथाऽसमक्षं गृहं प्रविश्य किमपि हरति तद्वत् । तस्माज्जुगुप्सितस्य कर्मणः कर्तुस्तेऽद्य काल इवालंध्यवीर्योऽहं फलं यच्छामि । अधर्मकर्तुः पुंसः कालो यथा यच्छतीति वा ॥ २२ ॥ ❀ ❀ रिक्तः क्षीणपुण्यः सुकृती विमानादिव । विमानात्पुष्पकान्न्यपतदिति वा ॥ २३ ॥ राक्षसस्त्रीणां विलापमाह तत इति पंचभिः । मंदं स्वल्पमुदरं यस्यास्तया रावणभार्यया सह ॥ २४-२५ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः सैन्यप्रवेशात् । तत्र तेषु ॥ १७ ॥ ❀ ❀ तत् वानरेंद्रसेनाकृतं कर्म । प्रहस्तं सेनापतिम् । अथ निकुंभादिसर्वमरणानंतरम् ॥ १८ ॥ ❀ ❀ प्रासः कुंतः । तोमरं लोहफालं काष्टदंडम् ॥ १९-२० ॥ ❀ ❀ यानकमिह कप्रत्ययस्य स्वार्थिकत्वात्सामान्ययानमाहात आह—रथं वेति । अथ रामसंमुखागमनोत्तरम् । तं रामम् । विषमयुद्धं विलोक्येंद्रप्रेरितेन मातलिना । अहनत् अडत्षार्षः । क्षुरप्रैः 'अर्द्धचंद्रः क्षुरप्रः स्यात्' इत्यभिधानात् । अर्द्धचंद्राकारैर्बाणैः ॥ २१ ॥ ❀ ❀ "पुरीषमपकृष्टं स्याद्विष्ठानिष्ठ्यूतमप्युत" इति तीर्थः । पुरुषाद पुरीषप्रायपुरुषादाधमेत्यर्थः । असताऽप्रशस्तकर्मणा ॥ २२ ॥ क्षिपन् धिक्कुर्वन् । स बाणः । तद्धृदयं रावणहृदयम् । स रावणः । दार्ष्टांतिकम् उपलब्धं दृष्टांतेन योज्यमिति न्यायादाह—पुष्पकादिति ॥ २३ ॥ ❀ ❀ ततो रावणपतनोत्तरम् समं सह ॥ २४ ॥

अन्वितार्थप्रकाशिका

सेति । वानरेन्द्राणां बलैः सैन्यैः रुद्धा विहारादयो यस्यां सा तत्र विहारः क्रीडास्थानं कोष्ठं धान्यागारादि श्रीः कोशः द्वारं गृहादीनां गोपुरं पुरद्वारं सदः सभा वलभी प्रासादादिपुरोभागाच्छादिनी विटङ्कः कपोतपालिका निर्भज्यमाना धिषणादयो यस्याः सा तत्र धिषणं वेदिकादिस्थानं शृङ्गाटकं चतुष्पथं सा ससैन्येन श्रीरामचन्द्रेण प्रविष्टा लङ्का यथा गजकुलैर्विलोडिता हृदिनी नदी संक्षोभिता भवति तथा प्रचलिता पूर्णा व्याकुला जाता ॥ १७ ॥ ❀ ❀ रक्ष इति । रक्षःपतिः रावणः रक्षस्पतिरिति सत्त्ववान् पाठस्तु प्रामादिक आर्षो वा । तद्वानरैर्लङ्काविनाशं विलोक्य निकुम्भादीन् पुत्रमिन्द्रजितं प्रहस्तादींश्च सर्वाननुगान् भृत्यान् समहिनोत् प्रायुङ्क्त । अथ तेषां मरणानन्तरं कुम्भकर्णं च समहिनोत् ॥ १८ ॥ ❀ ❀ तामिति । तामसिशूलादिभिर्दुर्गां दुर्गमां यातुधानानां पृतनां सेनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात् । मरुत्सुतो हनुमान् ऋक्षो जाम्बवान ॥ १९ ॥ ❀ ❀ ते इति । ते सर्वे रघुपतेरनीकपाः सेनापतयोऽङ्गदाद्या इभादिभिर्यद्वरूथं रावणसैन्यं तद्द्वन्द्वं यथा भवति तथाऽभिपत्य सङ्गम्य सीताया अभिमर्शः स्पर्शस्तेन हतं मङ्गलं यस्य स रावण ईशो येषां तान् राक्षसान् द्रुमैर्गिरिभिर्गदाभिरिषुभिश्च जघ्नुः ॥ २० ॥ ❀ ❀ रक्ष इति । रक्षस्पती रावणः । सत्त्ववान् पाठः प्राग्वत् । स्वबलस्य नष्टिं विनाशमवेक्ष्य रुष्टः क्रुद्धः सन् यानकं पुष्पकाख्यं विमानमारुह्य श्रीराममभिससार योद्धुमाजगाम । अथ मातलिना इन्द्रसारथिना उपनीते समानीते द्युमति दीप्तियुते स्वःस्यन्दने इन्द्ररथे विभ्राजमानं श्रीरामं क्षुरप्रैः क्षुरधारातुल्याग्रैः निशितैः शरैरहनत् अहन् । शव्लुगभावश्छान्दसः ॥ २१ ॥ ❀ ❀ राम इति । तमेवं प्रहरन्तं रावणं श्रीराम आह स्म । तदर्शयति । हे पुरुषादपुरीष पुरुषादा राक्षसास्तेषां पुरीषतुल्य । नोऽस्माकमसमक्षम् असता दुरात्मना त्वया श्ववत् शुना यथा असमक्षं गृहं प्रविश्य वस्तु ह्रियते तद्वत् यत्कान्ता अपहृता तस्य जुगुप्सितस्य कर्मणः फलमद्यैव त्यक्तत्रपस्य निर्लज्जस्य तव यच्छामि ददामि । यथा अधर्मकर्तुः पुंसः तत्फलम् अलङ्घ्यवीर्यः कालो यच्छति तथेत्यर्थः ॥ २२ ॥ ❀ ❀ एवमिति । एवमधिक्षिपन् धनुषि सन्धितं सन्धा सन्धानं सास्य सञ्जाता तम् । इतच् । बाणमुत्ससर्ज प्रायुङ्क्त । स च बाणो वज्रमिव तस्य रावणस्य हृदयं

विभेद । स रावणो दशभिर्मुखैरसृक् रुधिरं वमन् तत्रत्ये जने हा हेति जल्पति सति विमानात् पुष्पकादपतत् । यथा रिक्तः क्षीणपुण्यः सुकृती स्वर्लोकात्पतति तद्वदित्यर्थः ॥ २३ ॥ ❀ ❀ तत इति । ततो मन्दोदर्या रावणभार्यया सह प्ररुदन्त्यः । नुमार्षः । सहस्रशो यातुधान्यो लङ्कायाः निष्क्रम्य यत्र रावणः पतितस्तस्मिन् देश उपाद्रवन् आजग्मुः ॥ २४ ॥

वीरराघवव्याख्या

सेति । सा श्रीरामेण सकपिसैन्येन प्रविष्टा लङ्का गजकुलैः ह्रादिनी यथा घूर्णा भवति तद्वत् घूर्णा बभूव, कथम्भूता ? वानरेन्द्राणां बलैरुद्धा विहारादयो यस्यां निर्भज्यमाना धिषणादयो यस्यां सा तत्र विहारः क्रीडास्थानं कोष्ठं धान्यागारादि श्रीकोशः द्वारं गृहादीनां, गोपुरं पुरद्वारं सदः सभाः वलभी प्रासादादिपुरोभागच्छादिनी विटङ्कः कपोतपालिका धिषणं वेदिकादि ध्वजहेमकुम्भौ प्रसिद्धौ शृङ्गाटकश्चतुष्पथः ॥ १७ ॥ ❀ ❀ रक्ष इति । रक्षःपती रावणः तद्विघूर्णनं दृष्ट्वा निकुम्भादीन एकैकशः स्वस्वबलसहितान् पुत्रमिन्द्रजितं प्रहस्तादींश्च सर्वानुगान् भृत्यान् समहिनोत् प्रायुंक्त अथ कुम्भकर्णं च समहिनोत् ॥ १८ ॥ ❀ ❀ तामिति । तामसिशूलादिभिर्दुर्गमां यातुधानानां पृतनां सेनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात् तत्र मरुत्सुतो हनुमान् ऋक्षो जाम्बवान् ॥ १९ ॥ ❀ ❀ त इति । ते रघुपतेरनीकपाः सर्वे अङ्गदाद्याः रावणस्येभादीनां गजादीनां यूथैर्यद्वद्रूथं सैन्यं तद्द्वद्वं यथा भवति तथा अभिपद्य सङ्गम्य द्विमैर्गिरिभिर्गदादिभिरिषुभिश्च सीताया अभिमर्शनेन हतं मङ्गलं यस्य स रावण ईशो येषां तान् निकुम्भादीन् जघ्निरे ॥ २० ॥ ❀ ❀ रक्ष इति । अथ रक्षःपती रावणः स्वबलस्य नष्टिं नाशमवेक्ष्य रुष्टः क्रुद्धस्सन् यानकं विमानमारुह्य श्रीराममभ्यपतत् अथ स्वस्स्यन्दने इन्द्रस्य रथे मातलिना इन्द्रसारथिना उपनीते समानीते द्युमति दीप्तियुक्ते विभ्राजमानं श्रीरामं क्षुरप्रैः क्षुरधारातुल्यैर्विशिखैर्बाणैरहनत् ततान तनादित्वादेव सिद्धे कृञ्ग्रहणेन गणकार्यस्यानित्यत्वादार्षत्वाद्वा शपो लुक् अभावः ॥ २१ ॥ ❀ ❀ तमेवं ताडयन्तं रावणं श्रीराम आह—किमिति । हे पुरुषादपुरीष ! राक्षसेषु तेषां वा पुरीषप्रायो यस्मान्नोऽस्माकमसमक्षं कान्ता ह्रसता दुरात्मना त्वया शुनेवापहृता शुना यथा असमक्षं गृहं प्रविष्टेन किमपि वस्त्वपह्रियते तद्वदिति दृष्टान्तार्थः, तस्मात् जुगुप्सितस्य, कर्मणः इति शेषः । कर्तुस्ते निर्लज्जस्य तवाद्य कालो मृत्युरिवालंध्यवीर्योऽहं फलं यच्छामीति ॥ २२ ॥ ❀ ❀ एवमित्थमधिक्षिपन् धनुषि सन्धितं बाणमुत्ससर्ज प्रायुक्त स बाणो वज्रमिव तस्य रावणस्य हृदयं बिभेद स रक्षो रावणः दशभिर्मुखैरसृक् रुधिरं वमन् जने पश्यति जने हाहेति वादिनि सति विमानात् पुष्पकादपतत् यथा सुकृती क्षीणपुण्यः स्वर्लोकात् पतति तद्वत् ॥ २३ ॥ ❀ ❀ तत इति । ततो यातुधान्यः राक्षस्यो मन्दोदर्या सह लङ्कायाः निष्क्रम्य प्ररुदन्त्यस्तत्र रावणसमीपे उपाद्रवन् आजग्मुः ॥ २४ ॥

विजयध्वजतीर्थकृता पदरत्नावली

यदा सा लङ्का रामेणाविष्टा तदा गजकुलैर्घूर्णा ह्रदिनीव घूर्णाऽभूदिति शेषः । विहरन्त्यस्मिन्निति विहारं क्रीडास्थानं कोष्ठमन्तर्गृहं सद्द्वारं सभाद्वारं प्रशस्तसाधारणद्वारं वा गोपुरं पुरद्वारं सदः सभास्थानं वलभी गृहाच्छादनान्तर्नाली दारुभिः परितो निर्मिता गोपानसीति कीर्त्यते विटङ्कः पक्षिपट्टिका वानरेन्द्राणां बलेन सेनया रुद्धा आवारिताः विहारादयो यस्याः सा तथा "आच्छादनं स्याद्वलभीगृहाणां गोपानसी दारुषु वक्रसंस्था । निम्नं वलीकं पटलान्तमाहुः कपोतपाली च विटङ्कसज्ञाम् ॥" इति हलायुधः—"गोपानसी तु वलभीच्छादने वक्रदारुणि । कपोतपालिकायान्तु विटङ्कं पुन्नपुंसकम् ।" इत्यमरः । निर्भज्यमाना वानरेन्द्रबलेन निर्भिद्यमाना धिषणध्वजाः गृहालङ्कारहेतवः हेमकुम्भाः सुवर्णकलशाः शृङ्गाटकाः गृहमुखाग्रतोन्नतत्रिशूलाङ्कग्रहैकदेशाः यस्यां सा तथा ध्वजोपरिस्थहेमकुम्भैर्युक्ताः शृङ्गाटकाः चतुष्पथा वा ॥ १७ ॥ ❀ ❀ तद्वानरेन्द्रबलकृतं कर्म समहिनोदपातयत् ॥ १८ ॥ ❀ ❀ या रावणेन प्रेरिता तां यातुधानपृतनां राक्षससेनाम् ॥ १९ ॥ रघुपतेस्ते अनीकपाः सेनानायकाः वरूथं रथगुप्तिमभिपत्य प्राप्य इभाश्च पत्तयश्च रथाश्चाश्वाश्च योधाश्च यस्मिन् तदिभपत्तिरथाश्वयोधं द्वन्द्वं द्वाभ्याम् द्वाभ्याम् इभादिभ्यां क्रियमाणं युद्धम् अभ्युपगम्य राक्षसबलं जघ्नुरित्यन्वयः "रथगुप्तिर्वरूथो ना कूबरो ना युगन्धरः" इति यादवः । कीदृशं बलं सीताभिमर्शेन सीतापरामर्शेन सीताया अपहारेणेत्यर्थः । हतं नष्टं मङ्गलं पुण्यं यस्य स तथा स चासौ रावणः सीताभिमर्शहतमङ्गलरावणः स एवेशो यस्य तत्तथा तत् ॥ २० ॥ ❀ ❀ द्युमति तेजोवति स्वः स्वर्गादवतीर्णे स्यन्दने रथे विभ्राजमानं क्षुरप्रैरर्धचन्द्रैः "अर्द्धचन्द्रः क्षुरप्रः स्यात्" इति । प्रासः कुन्तः ऋष्टिः प्रसिद्धा शक्तिः शतमारणी तोमरः लोहमयद्विफलः निस्त्रिंशः खड्गः पट्टिशः लोहदण्ड इत्यर्थः । शतघ्नी चतुस्साला लोहकण्टकसंचिता केचित् शतघ्नीमयःकण्टकसंछन्नां महाशिलां वदन्ति भुशुण्डी वृत्तायःकलसञ्चिता दारुमयी हस्तिवरो गजत्रासहेतुरुष्टमुनयः देवदण्डोऽश्वत्रासकरोऽरत्निमात्रः द्रुघणो मुद्गरः तत्र शक्त्याद्यस्त्रं हस्तमुक्तं शरादिकं पत्रमुक्तं शरादिकं पत्रमुक्तं मुक्तामुक्तं

नागपाशादिकम् अमुक्तं छुरिकादिकमिति चतुर्विधमायुधं प्रसङ्गात्कथितम् ॥ २१ ॥ ❀ ❀ हे पुरुषादपुरीष ! राक्षसाधम ! "अपकृष्टं पुरीषं स्यात् विष्ठयजिष्कममप्युत" इति असता अप्रशस्तकर्मणा त्वया कान्ता सीता नः अस्माकमसमक्षम् अस्मान्वञ्चयित्वाऽपहृतेति यत्तस्मादद्य त्यक्तत्रपस्य निर्लज्जस्य रक्षस्त्वेन जुगुप्सितस्य ते तव तस्य कर्मणः फलं कर्तुमनेकार्थत्वाद्धातूनां दातुमिच्छामि तवाधुना तल्लङ्घनमशक्यमित्याशयेनाह—काल इति । कालोऽन्तकः "कालो मृत्यौ यमे" इति यादवः "वायं पराक्रमे रेतस्यन्नमाहात्म्ययोरपि" इति रावणः ॥ २२ ॥ ❀ ❀ सुकृती भुक्तपुण्यः स्वर्गादिव ॥ २३-२४ ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वानरेन्द्राणां बलैरुद्धा विहारादयो यस्या विहारः क्रीणास्थानं कोष्ठं धान्यागारादि श्रीः कोशः द्वारं गृह द्वारं गोपुरं पुरद्वारं सदः सभा वलभी प्रासादोर्द्ध्वशिखरगृहं विटङ्कः कपोतपालिका ततश्च निर्भज्यमाना धिषणाद्या यस्यां धिषणं वेदिकादि शृङ्गाटकं चतुष्पथं घूर्णा घूर्णिता ॥ १७ ॥ ❀ ❀ पुत्रमिन्द्रजितं समहिनोत् युद्धार्थं प्रायुङ्क्त ॥ १८ ॥ ❀ ❀ अन्वितः श्रीरामः ॥ १९ ॥ ❀ ❀ ते रघुपतेरनीकपा अङ्गदाद्याः सर्वे रावणस्य इभादिभिर्यद्वरूथं सैन्यं तत्र द्वंद्वं यथा भवति तथाऽभिपत्य सङ्गम्य द्रुमादिभिर्जघ्नुः कान् ? सीताया अभिमर्शेन हरणेन हतं मङ्गलं यस्य तथाभूता रावण एव ईशो येषां तान् ॥ २० ॥ ❀ ❀ यानकं पुष्पकं विमानं रथं वा स्वस्यन्दने स्वर्गीयरथे दीप्तिमति मातलिना इन्द्रसारथिना उपनीते भ्राजमानं रामम् अहनत् अहन् क्षुरप्रैः शरैः ॥ २१ ॥ ❀ ❀ हे पुरुषादपुरीष ! राक्षसानां पुरीषतुल्य ! यद्यस्मादपहृता श्वयत् शुना यथा असमक्षमेव गृहं प्रविश्य व्रतमपह्नियते तद्वत् अद्य जुगुप्सितस्य कर्मणः कर्तुः कालो यम इव अहं ते फलं यच्छामि ॥ २२ ॥ ❀ ❀ स बाणः तस्य रावणस्य स रावणः रिक्तः क्षीणपुण्यः सुकृती विमानादिव न्यपतत् ॥ २३ ॥ मन्दोदर्य्या रावणभार्य्यया ॥ २४-२७ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

यां श्रीरामः अविशत् सा लङ्का गजकुलैः हृदिनीव घूर्णा घर्षिता वानरैरिति शेषः । एतदेवाह वानरेन्द्रबलैः रुद्धा विहारादयो यस्यां सा तत्र विहाराः क्रीडाभूमयः कोष्ठानि धान्यादीनाम् श्रियः नानाविभूतयः द्वाराणि गृहादीनाम् यद्वा श्रीयुक्तानि द्वाराणि गोपुराणि पुरद्वाराणि सदःशब्देन सभाः वलभ्यः प्रासादादिपुरोभागाच्छादिन्यः विटङ्का कपोतपालिकाः पुनः कथंभूता निर्भज्यमानाः धिषणाद्यो यस्याः सा तत्र धिषणानि वेदिकादीनि ध्वजाः हेममयाः कुम्भाः शृङ्गाटकाः चतुष्पथाः ॥ १७ ॥ ❀ ❀ रक्षःपतिः रावणः तत् लङ्कायाः धर्षणं दृष्ट्वा निकुम्भादीन् पुत्रमवलोक्य इन्द्रजितं प्रहस्तादींश्च समहिनोत् प्रायुङ्क्त ॥ १८ ॥ ❀ ❀ सुग्रीवादिभिरन्वितः श्रीरामः अस्यादिभिर्दुर्गां तां यातुधानपृतनामगात् ॥ १९ ॥ तदा ये अङ्गदाद्याः रघुपतेः अनीकपाः ते सर्वे रावणस्येभादिभिर्यद्वरूथं सैन्यं तद् द्वन्द्वं यथा भवति तथाऽभिपत्य सङ्गम्य सीतायाः अभिमर्शेन हतं मङ्गलं यस्य स रावण ईशो येषां तान् द्रुमादिभिर्जघ्नुः ॥ २० ॥ ❀ ❀ स्वबलनष्टिं स्वकीयसैन्यनाशम् अवेक्ष्य यानकं पुष्पकमारुह्य रामम् अभिससार अभ्यपतत् अथ द्युमति सप्रभे स्वःस्यन्दने स्वर्गस्यन्दने इन्द्ररथे मातलिना इन्द्रसारथितोपनीते विभ्राजमानं क्षुरप्रैः क्षुरधारातुल्याग्रैः निशितैरुज्ज्वलितैर्बाणैः अहनत् अहन् ॥ २१ ॥ ❀ ❀ हे पुरुषादपुरीष रक्षःपुरीषप्राय ! यद्यस्मात् श्वा यथा कस्यचित् किञ्चिदसमक्षमपहरति तथा ते त्वया नः कान्ता अपहृता तस्मात् अलङ्घ्यवीर्यः अनतिक्रमणीयप्रभावोऽहम् कालः जुगुप्सितस्य कर्मणः कर्तुर्यथा फलं प्रयच्छति तद्वत् जुगुप्सितस्य अद्य यच्छामि ॥ २२ ॥ ❀ ❀ विमानात् पुष्पकात् सः न्यपतत् यथा रिक्तः क्षीणपुण्यसुकृती न्यपतति तद्वत् ॥ २३ ॥ मन्दोदर्या समं सह ॥ २४-२७ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

सा ससैन्येन श्रीरामचन्द्रेण प्रविष्टा लङ्का यथा गजकुलैर्ह्रदिनी विलोडिता व्याकुला भवति तथा तैर्विघूर्णिता व्याकुला जातेत्यन्वयः । वानरेन्द्राणां बलैः सैन्यैः रुद्धाः विहारादयो यस्यां सा । तत्र विहारः क्रीडास्थानम् । कोष्ठं धान्यागारादि । श्रीः कोशः । द्वारं गृहादीनाम् । गोपुरं पुरद्वारम् । सदः सभा । वलभी प्रासादादिपुरोभागाच्छादिनी । विटङ्कः कपोतपालिका । निर्भज्यमाना धिषणादयो यस्याः सा । तत्र धिषणं वेदिकादिस्थानम् । शृङ्गाटकश्चतुष्पथः ॥ १७ ॥ ❀ ❀ रक्षःपतिः रावणस्तत् वानरैर्लङ्काविनाशं विलोक्य निकुम्भादीन् पुत्रमिन्द्रजितं प्रहस्तादींश्च सर्वाननुगान् भृत्यान् समहिनोत प्रायुंक्त । अथ तेषां मरणानन्तरं कुम्भकर्णं च समहिनोत् ॥ १८ ॥ ❀ ❀ तामसिशूलादिभिर्दुर्गां यातुधानानां पृतनां सेनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात् । मरुत्सुतो हनुमान् । ऋक्षो जाम्बवान् ॥ १९ ॥ ❀ ❀ ते सर्वे रघुपतेरनीकपाः सेनापतयोऽङ्गदाद्या-

इभादिभिर्यद्वरूथं रावणसैन्यं तद्द्वन्द्वं यथा भवति तथाऽभिपत्य सङ्गम्य सीताया अभिमर्शः स्पर्शस्तेन हृतं मङ्गलं यस्य स रावण ईशो येषां तान् राक्षसान् द्रुमैर्गिरिभिर्गदाभिरिषुभिश्च जघ्नुरित्यन्वयः ॥ २० ॥ ❀ ❀ अथ रक्षःपती रावणः स्वबलस्य नष्टिं विनाशमवेक्ष्य रुष्टः क्रुद्धः सन् यानकं पुष्पकाख्यविमानमारुह्य श्रीराममभिससार योद्धुमाजगाम । अथ स्वस्यन्दने इन्द्ररथे मातलिना इन्द्रसारथिना उपनीते समानीते द्युमति दीप्तियुते तस्मिन् विभ्राजमानं श्रीरामं क्षुरप्रैः क्षुरधारातुल्याग्रैः निशितैः शरैरहनत् । आर्षः अहन्नित्यर्थः ॥ २१ ॥ ❀ ❀ तमेवं ताडयन्तं रावणं श्रीराम आह । तदर्शयति—हे पुरुषादपुरीष पुरुषादा राक्षसास्तेषां पुरीषतुल्य, नोऽस्माकमसमक्षं असता दुरात्मना त्वया यत्कान्ता हृता तस्य जुगुप्सितस्य कर्मणः फलमद्यैव त्यक्तत्रपस्य निर्लज्जस्य तव यच्छामि ददामीत्यन्वयः । सीताहरणस्य जुगुप्सितत्वं दृष्टान्तेन स्पष्टयति—श्ववदिति । श्वा यथा असमक्षं गृहं प्रविश्य वस्तु हरति तद्वदित्यर्थः । फलदाने दृष्टान्तमाह—काल इति । अधर्मकर्तुः पुंसः तत्फलं यथा कालो यच्छति तथेत्यर्थः । तदाने स्वसामर्थ्यमाह—अलङ्घ्यवीर्य इति ॥ २२ ॥ ❀ ❀ एवमधिक्षिपन् धनुषि सन्धितं बाणमुत्ससर्ज प्रायुङ्क्त । स च बाणो वज्रमिव तस्य रावणस्य हृदयं विभेद । स रावणो दशभिर्मुखैरसृक् रुधिरं वमन् तत्रत्ये जने हा हेति जल्पति सति विमानात् पुष्पकादपतत् । अत्र दृष्टान्तमाह—सुकृती यथा रिक्तः क्षीणपुण्यः स्वर्लोकात् पतति तद्वदित्यर्थः ॥ २३ ॥ ततस्तदनन्तरं मन्दोदर्या रावणभार्यया सह प्ररुदन्त्यः सहस्रशो यातुधान्यो लङ्कायाः निष्क्रम्य यत्र रावणः पतितस्तस्मिन् देशे उपाद्रवन् आजग्मुः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सेति । सा । श्रीरामेण कपिसैन्येन सह प्रविष्टा लङ्का, वानरेन्द्राणां बलैः रुद्धाः विहास्कोष्ठश्रीद्वारगोपुरसदोबलभीविटङ्काः यस्यां सा, तत्र विहारः क्रीडास्थानं, कोष्ठं धान्यागारादि, श्रीः कोशः द्वारं गृहादीनां, गोपुरं पुरद्वारं, सदः सभा, बलभी प्रासादादिपुरोभागच्छादिनी, विटङ्कः कपोतपालिका, निर्भज्यमानाः धिषणध्वजहेमकुम्भशृङ्गाटकाः यस्याः सा, तत्र धिषणं वेदिकादिः, ध्वजहेमकुम्भौ प्रसिद्धौ, शृङ्गाटकश्चतुष्पथः, एवंभूता सती, गजकुलैः हस्तिवृन्दैः, ह्रदिनी नदी इव, घूर्णा बभूव ॥ १७ ॥ ❀ ❀ रक्षःपतिरिति । रक्षःपती रावणः, तद्वानरेन्द्रबलकृतं कर्म, अवलोक्य दृष्ट्वा, निकुम्भश्च कुम्भश्च धूम्राक्षश्च दुर्मुखश्च सुरान्तश्च नरान्तकश्च ते आदयो येषां तान्, अतिकायश्च विकम्पनश्च तावादी येषां तान्, सर्वानुगान्, सर्वाननुगान्, अत्र निकुम्भादय एकैकशः स्वस्वबलसहिताः, पुत्रमिन्द्रजितं, प्रहस्तं, अथ, कुम्भकर्णं, समहिनोत् प्रायुङ्क्त ॥ १८ ॥ ❀ ❀ तामिति । असयः खड्गाश्च शूलानि च चापा धनूंषि च प्रासाश्च ऋष्टयश्च शक्तयश्च शराश्च तोमराश्च खड्गा असिभेदाश्च तैः, दुर्गा दुर्गमा तां, तां रावणप्रेरितां, यातुधानपृतनां राक्षससेनां प्रति, सुग्रीवश्च लक्ष्मणश्च मरुत्सुतो हनुमांश्च गन्धमादश्च नीलश्चाङ्गदश्च ऋक्षो जाम्बवांश्च पनसश्च ते आदयो येषां तैः, अन्वितः युक्तः श्रीरामः, आगात् अभ्यगात् ॥ १९ ॥ ❀ ❀ ते इति । ते पूर्वोक्ताः सर्वे, रघुपतेः श्रीरामस्य, अङ्गदाद्याः अनीकपाः, इभाश्च पत्तयश्च रथाश्च अश्वयोधाश्च तैः युतम्, वरूथं रावणसैन्यं, द्वन्द्वं यथा भवति तथा, अभिपद्य संगम्य, द्रुमैः, गिरयश्च गदाश्च इषवश्च तैः, सीताया अभिमर्शस्तेन हृतं मङ्गलं यस्य तथाभूतो रावण ईशः स्वामी येषां तान्, निकुम्भादीन्, जघ्नुः जघ्निरे ॥ २० ॥ ❀ ❀ रक्षःपतिरिति । अथ रक्षःपती रावणः, स्वबलनष्टिं स्वकीयसेनाविनाशं, अवेक्ष्य, रुष्टः क्रुद्धः सन्, यानकं स्वेन हठादानीतं पुष्पकाख्यं कुबेरविमानम् आरुह्य, रामं, अभिससार श्रीराममभ्यपतत् । अथ, मातलिनेन्द्रसारथिना, उपनीते समीपमानीते, द्युमति दीप्तियुक्ते, स्वःस्यन्दने इन्द्रस्य रथे, विभ्राजमानं श्रीरामं, क्षुरप्रैः क्षुरधारातुल्याग्रैः, विशिखैर्बाणैः, अहनदहन् ततोडेति यावत् । गणकार्यस्यानित्यत्यत्वादार्षत्वाद्वा शपो लुगभावः ॥ २१ ॥ ❀ ❀ राम इति । तं ताडयन्तं रावणं, रामः श्रीरघुपतिः, आह । हे पुरुषादपुरीष, राक्षसेषु मध्ये तेषां पुरीषप्राय, यद्यस्मात्, नोऽस्माकं, कान्ता पत्नी, असमक्षमेव, असता दुरात्मना, ते त्वया, श्ववद्धृषकवत्, अपहृता । यथा शुना गृह्यऽसमक्षं गृहं प्रविष्टेन सता किमप्यपह्रियते, तद्वदस्मत्कान्त कान्ता त्वयाऽपहृतेत्यर्थः । तस्मात्, त्यक्तत्रपस्य परित्यक्तलज्जस्य तव, जुगुप्सितस्य कर्मण इति शेषः । फलं, अद्य अलङ्घ्यं वीर्यं यस्य सः, अहं, कालः मृत्युः, कर्तुरसत्कर्म कर्तुः, तत्फलमिव, यच्छामि ॥ २२ ॥ ❀ ❀ एवमिति । एवमित्थं, क्षिपन्नधिक्षिपन्, धनुषि स्वकोदण्डे, संधितं, बाणं, उत्ससर्ज प्रायुङ्क्त । स बाणः वज्रम् इव, तस्य रावणस्य, हृदयं, विभेद । स रक्षो रावणः, दशमुखैः असृक रुधिरं वमन् उद्गिरन् सन्, जने हा हेति जल्पति वादिनि सति, विमानात् पुष्पकात्, सुकृती, रिक्तः क्षीणपुण्यः सन्, स्वर्गलोकादिति शेषः । इव, अपतत् ॥ २३ ॥ ❀ ❀ तत इति । ततः सहस्रशः यातुधान्यो राक्षस्यः, मन्दोदर्या रावणपत्न्या, समं सह, लङ्कायाः सकाशात् निष्क्रम्य, प्ररुदन्त्यः सत्यः, तस्मिन् यत्र रावणः पतितोऽस्ति तत्र स्थाने, उपाद्रवन्नाजग्मुः ॥ २४ ॥

भाषानुवादः

उस समय वानरराजकी सेनाने लङ्काके सैर करने और खेलनेके स्थान, अन्नके गोदाम, खजाने, दरवाजे, फाटक, सभाभवन, छज्जे और पक्षियोंके रहनेके स्थानतकको घेर लिया। उन्होंने वहाँकी वेदी ध्वजाएँ, सोनेके कलश और चौराहे तोड़-फोड़ डाले। उस समय लङ्का ऐसी मालूम पड़ रही थी, जैसे झुण्ड-के-झुण्ड हाथियोंने किसी नदीको मथ डाला हो ॥ १७ ॥ ❀ ❀ यह देखकर राक्षसराज रावणने निकुम्भ, कुम्भ, धूम्राक्ष, दुर्मुख, सुरान्तक, नरान्तक, प्रहस्त, अतिकाय, विकम्पन आदि अपने सब अनुचरों, पुत्र, मेघनाद और अन्तमें भाई कुम्भकर्णको भी युद्ध करनेके लिये भेजा ॥ १८ ॥ ❀ ❀ राक्षसोंकी वह विशाल सेना तलवार, त्रिशूल, धनुष, प्रास, ऋष्टि, शक्ति, बाण, भाले, खड्ग आदि शस्त्र-अस्त्रोंसे सुरक्षित और अत्यन्त दुर्गम थी। भगवान् श्रीरामने सुग्रीव, लक्ष्मण, हनूमान्, गन्धमादन, नील, अङ्गद, जाम्बवान् और पनस आदि वीरोंको अपने साथ लेकर राक्षसोंकी सेनाका सामना किया ॥ १९ ॥ ❀ ❀ रघुवंश-शिरोमणि भगवान् श्रीरामके अङ्गद आदि सब सेनापति राक्षसोंकी चतुरङ्गिणी सेना—हाथी, रथ, घुड़सवार और पैदलोंके साथ द्वन्द्वयुद्धकी रीतिसे भिड़ गये और राक्षसोंको वृक्ष, पर्वतशिखर, गदा और बाणोंसे मारने लगे। उनका मारा जाना तो स्वाभाविक ही था। क्योंकि वे उसी रावणके अनुचर थे, जिसका मङ्गल श्रीसीताजीको स्पर्श करनेके कारण पहले ही नष्ट हो चुका था ॥ २० ॥ ❀ ❀ जब राक्षसराज रावणने देखा कि मेरी सेनाका तो नाश हुआ जा रहा है, तब वह क्रोधमें भरकर पुष्पक विमानपर आरूढ़ हो भगवान् श्रीरामके सामने आया। उस समय इन्द्रका सारथि मातलि बड़ा ही तेजस्वी दिव्य रथ लेकर आया और उसपर भगवान् श्रीरामजी विराजमान हुए। रावण अपने तीखे बाणोंसे उनपर प्रहार करने लगा ॥ २१ ॥ ❀ ❀ भगवान् श्रीरामजीने रावणसे कहा—'नीच राक्षस ! तुम कुत्तेकी तरह हमारी अनुपस्थितिमें हमारी प्राणप्रिया पत्नीको हर लाये ! तुमने दुष्टताकी हद कर दी ! तुम्हारे-जैसा निर्लज्ज तथा निन्दनीय और कौन होगा। जैसे कालको कोई टाल नहीं सकता—कर्तापनके अभिमानीको वह फल दिये बिना रह नहीं सकता, वैसे ही आज मैं तुम्हें तुम्हारी करनीका फल चखाता हूँ' ॥ २२ ॥ ❀ ❀ इस प्रकार रावणको फटकारते हुए भगवान् श्रीरामने अपने धनुषपर चढ़ाया हुआ बाण उसपर छोड़ा। उस बाणने वज्रके समान उसके हृदयको विदीर्ण कर दिया। वह अपने दसों मुखोंसे खून उगलता हुआ विमानसे गिर पड़ा—ठीक वैसे ही, जैसे पुण्यात्मालोग भोग समाप्त होनेपर स्वर्गसे गिर पड़ते हैं। उस समय उसके पुरजन-परिजन 'हाय-हाय' करके चिल्लाने लगे ॥ २३ ॥ ❀ ❀ तदनन्तर हजारों राक्षसियाँ मन्दोदरीके साथ रोती हुई लङ्कासे निकल पड़ीं और रणभूमिमें आयीं ॥ २४ ॥

स्वान् स्वान् बन्धून् परिष्वज्य लक्ष्मणेषुभिरर्दितान् । रुरुदुः सुस्वरं दीना घ्नन्त्य आत्मानमात्मना ॥ २५ ॥
हा हताः स्म वयं नाथ लोकरावण रावण । कं यायाच्छरणं लङ्का त्वद्विहीना पराऽर्दिता ॥ २६ ॥
नैवं वेद महाभाग भगवान् कामवशं गतः । तेजोऽनुभावं सीताया येन नीतो दशामिमाम् ॥ २७ ॥
कृतैषा विधवा लङ्का वयं च कुलनन्दन । देहः कृतोऽन्नं गृध्राणामात्मा नरकहेतवे ॥ २८ ॥

श्रीशुक उवाच

स्वानां विभीषणश्चक्रे कोसलेन्द्रानुमोदितः । पितृमेधविधानेन यदुक्तं साम्परायिकम् ॥ २९ ॥
ततो ददर्श भगवानशोकवनिकाश्रमे[1] । क्षामां स्वविरहव्याधिं शिंशपामूलमाश्रिताम् ॥ ३० ॥
रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकम्पत । आत्मसंदर्शनाह्लादविकसन्मुखपङ्कजाम् ॥ ३१ ॥
आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः । विभीषणाय भगवान् दत्त्वा रक्षोगणेशताम् ॥ ३२ ॥

कृष्णप्रिया व्याख्या

अन्वयः—आत्मना आत्मानं घ्नन्त्यः दीनाः लक्ष्मणेषुभिः अर्दितान् स्वान् स्वान् बन्धून् परिष्वज्य सुस्वरं रुरुदुः ॥२५॥ नाथ लोकरावण रावण हा वयं हताः स्म त्वद्विहीना पराऽर्दिता लङ्का कं शरणं यायात् ॥ २६ ॥ ❀ ❀ महाभाग

---

१. कावते ।

कामवशं गतः भवान् सीतायाः एवं तेजोनुभावं न वेद येन इमां दशां नीतः ॥ २७ ॥ ❀ ❀ कुलनन्दन एषा लंका विधवा कृता अयं च विधवाः देहः गृध्राणाम् अन्नं कृतः आत्मा नरकहेतवे ॥ २८ ॥ ❀ ❀ कोशलेन्द्रानुमोदितः विभीषणः स्वानां यत् उक्तं सांपरायिकं पितृमेधविधानेन चक्रे ॥ २९ ॥ ❀ ❀ ततः भगवान् अशोकावनिकाश्रमे शिंशपामूलम् आस्थितां स्वविरहव्याधि क्षामां ददर्श ॥ ३० ॥ ❀ ❀ रामः प्रियतमां भार्यां दीनां वीक्ष्य अन्वकम्पतः आत्मसंदर्शनाह्लादविकसन्मुखपङ्कजाम् यानम् आरोप्य भ्रातृभ्यां सह हनुमद्युतः आरुरुहे विभीषणाय रक्षोगणेशतां दत्त्वा ३१-३२

श्रीधरस्वामिविरचिता भावार्थदीपिका

परैरर्दिता पीडिता ॥ २६-२७ ॥ ❀ ❀ गृध्राणामन्नं भक्ष्यः । नरकहेतवे नरकभोगाय ॥ २८ ॥ ❀ ❀ सांपरायिकमौर्ध्वदैहिकम् ॥ २९-३० ॥ ❀ ❀ आत्मनः स्वस्य संदर्शनेन य आह्लादस्तेन विकसन्मुखपंकजं यस्यास्ताम् ॥ ३१ ॥ यानं पुष्पकम् । भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्याम् ॥ ३२ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

अर्दितान् हिंसितान् आत्मानमुदरम् । आत्मना करेण अवयवावयविनोरभेदोपचारात् । करेणेत्यकत्वं सामान्याभिप्रायम् । 'भ्रंत्यः कराभ्यामुर उच्चकैरपि' इत्यन्यत्रोक्तेः ॥ २५ ॥ ❀ ❀ अर्दिता पीडिता ॥ २६ ॥ ❀ ❀ येन सीतातेजोनुभावेन । तं न वेद ॥ २७ ॥ ❀ ❀ गृध्रप्राणरक्षणेन पुण्यं स्यादिति चेदाह—नरकेति । यद्यपि श्रीरामहस्तस्य "ये ये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन । ते ते गता विष्णुपुरं नरेन्द्राः क्रोधोऽपि देवस्य वरेण तुल्यः" । इत्याद्युक्तेः "स्वर्गं प्रयांतु रिपवोऽपि हि शस्त्रपूताः" इत्युक्तेश्च रावणस्य नरको न संभावी तथापि व्यभिचारिणां तदवश्यंभावद्योतनायेयमुक्तिः । यद्वा—रामचंद्रहतस्यापि ते परदारप्रवृत्तत्वेन मोक्षो न भविष्यति किं तु नरक इव परिणामदुःखदो भोगिकुलजन्मैव भविष्यतीत्यर्थः ॥ २८ ॥ ❀ ❀ पितृमेधस्य पितृयागस्य वितानं विधानम् शवदाहादारभ्य सपिंडनांतं तेन । यदुक्तं श्रुतिस्मृतिभ्यां विहितम् । और्ध्वदेहिकं भाविदेहप्राप्यम् । "संपरायः परे लोके युद्धापत्त्यायतिष्वपि" इति कोशात् । कोशलेंद्रो रामः ॥ २९ ॥ ❀ ❀ ततः पितृमेधवितानोक्तरावणादिदाहानंतरम् । "क्रीडा यत्र वने स्त्रीभिरशोकवनिका तु सा" इति कोशात् । सैवाश्रमोऽशोकवनिकाश्रमस्तत्र । क्षामां कृशाम् । स्वस्य विरह एव व्याधिर्यस्यास्ताम् । शिंशपा स्निग्धपत्रो वृक्षविशेषः ॥ ३०-३२ ॥

अन्वितार्थप्रकाशिका

स्वानिति । तत्र लक्ष्मणस्येषुभिरर्दितान् हतान् स्वान् स्वान् बन्धून् पतीन् परिष्वज्य आत्मना स्वेनैव आत्मानं देहं घ्नन्त्योः । नुमार्षः । दीनाः दुःखिताः सुस्वरं रुरुदुः ॥ २५ ॥ ❀ ❀ हा इति । हे नाथ ! लोकानां रावण आक्रन्दनकारक रावण ! वयं हा हताः स्म परैः शत्रुभिरर्दिता पीडिता त्वद्विहीना त्वया रहिता लङ्का लङ्कास्थो जनः कं शरणं यायात् ॥ २६ ॥ नेति । हे महाभाग ! कामवशं गता भवान् सीतायास्तेजसः अनुभावं प्रभावं नैव वेद नैव ज्ञातवान् । येन तेजोऽनुभावेनेमां दशां मरणावस्थां नीतः प्राप्तोऽसि ॥ २७ ॥ ❀ ❀ कृतेति । हे कुलनन्दन ! एषा लंका त्वया प्राणत्यागेन विधवा कृता तथा वयं च विधवाः कृता इति वचनविपरिणामः । स्वदेहो गृध्राणामन्नं भक्ष्यः कृतः । आत्मा जीवस्तु नरकहेतवे नरकभोगाय कृतः ॥ २८ ॥ ❀ ❀ स्वानामिति । कोशलेन्द्रेण श्रीरामेणानुमोदितः आज्ञप्तो विभीषणः स्वानां मृतानां रावणादीनां पितृमेधविधानेन साम्परायिकमौर्ध्वदैहिकं यत्कर्मोक्तं तच्चक्रे ॥ २९ ॥ तत इति युग्मम् । ततो भगवान् श्रीरामः अशोकवने य आश्रमस्तस्मिन् शिंशपावृक्षस्य मूलमाश्रितां मूले स्थितां स्वस्य श्रीरामस्य विरहो विश्लेष एव व्याधिर्यस्याः ताम् अत एव क्षामां कृशां पारवश्येन दीनामात्मनः स्वस्य सन्दर्शनेन य आह्लादः तेन विकसन्मुखं पङ्कजमिव यस्यास्तां प्रियतमां भार्यां सीतां ददर्श । वीक्ष्य चान्वकम्पत कृपां कृतवान् ॥ ३०-३१ ॥ ❀ ❀ आरोप्येति सार्द्धम् । ततश्च तां यानं पुष्करमारोप्य भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां सह सख्युरपि भ्रातृत्वात् हनुमता च युतः रामः स्वयमपि यानमारुरुहे । तदार्षः । चक्रवर्ती तु सीतामारोप्य भ्रातृभ्यां रामलक्ष्मणाभ्यामारुरुहे हनुमद्युतः हनुमता सह युतः साहित्यं प्राप्य "युमिश्रणे" भावकिबन्तात् । "ल्यब्लोपे पञ्चमी" इति व्याख्यातवान् । तन्मते कर्मणि लिट् । विभीषणायेति । ततश्च चीर्णव्रतः चरितचतुर्दशवर्षवनवासव्रतः भगवान् रामः विभीषणाय रक्षोगणानामीशतां लङ्कां कल्पान्तपर्यन्तमायुश्च दत्त्वा पुरीमयोध्यां ययौ प्रतस्थे इत्यर्थः ॥ ३२ ॥

वीरराघवव्याख्या

तत्रेति । तत्र लक्ष्मणस्य बाणैरर्दितान् हतान् स्वान् स्वान बन्धून् परिष्वज्य आत्मना आत्मानं घ्नन्त्यः दीनाः दुःखिताः सुस्वरं रुरुदुः ॥ २५ ॥ ❀ ❀ रोदनप्रकारमेवाह—हाहेति त्रिभिः । हेति खेदद्योतकमव्ययं हे नाथ ! हे लोकरावण ! वयं हताः स्म हतप्राया बभूविम अधुना परैः शत्रुभिरर्दिता पीडिता त्वया हीना रहिता लङ्का लङ्कास्थो जनः कं शरणं यायात् ॥ २६ ॥ ❀ ❀ न वा इति । हे महाभाग ! भवान् कामवशङ्गतः सीतायास्तेजसः प्रभावं तेजोरूपं वा प्रभावं न वै वेद न ज्ञातवान् येन तेजोऽनुभावेनेमां दशां नीतः प्राप्तवानसि ॥ २७ ॥ ❀ ❀ कृतेति । हे कुलनन्दन ! वयमेषा लङ्का च विधवा कृता येनेत्यनुषङ्गः । अयं शयानः त्वद्देहः गृध्राणां कृतः, भक्ष्य इति शेषः । आत्मा तु नरकहेतवे नरकभोगाय कृतः ॥ २८ ॥ ❀ ❀ स्वेति । ततः कोसलेन्द्रेण श्रीरामेणानुमोदितो विभीषणः पितृमेधविधानेन पितृमेधविधिना यदुक्तं विहितं तत्साम्परायिकं प्रेतकर्म स्वानां रावणादीनां चक्रे ॥ २९ ॥ ❀ ❀ तत इति । ततो भगवान् श्रीरामः अशोकवने य आश्रमस्तस्मिन् शिंशुपाया मूलमाश्रितां मूले स्थितां स्वस्य विश्लेष एव व्याधिर्यस्यास्तामत एव क्षामां कृशाम् ॥ ३० ॥ ❀ ❀ प्रियतमां भार्यामवलोक्यानुकम्पितवान् आत्मनः स्वस्य सन्दर्शनेन य आह्लादस्तेन विकसन्मुखं पङ्कजमिव यस्यास्तां सीताम् ॥ ३१ ॥ ❀ ❀ यानं पुष्पकमारोप्य भ्रातृभ्यां वालिरावणभ्रातृभ्यां सुग्रीवविभीषणाभ्यां सह हनुमता युक्तो यानमारुरोह रक्षोगणाधिपत्यम् आकल्पान्तमायुर्लङ्कां च विभीषणाय दत्त्वा ॥ ३२ ॥

विजयध्वजतीर्थकृता पदरत्नावली

अर्दितान् हिंसितान् "अर्द हिंसायाम्" आत्मानं देहम् उदरमिति यावत् आत्मना देहेन हस्तेन ॥ २५-२६ ॥ नीतो येन तं नैव वेद ॥ २७ ॥ ❀ ❀ वयं च विधवाः कृताः देहः गृध्राणाम्, आत्मा जीवो जीवनाय कृतः गृध्रप्राणरक्षणेनापि पुण्यं स्यादिति तत्राह—नरकहेतव इति, नरकदुःखानुभवार्थं भवति ॥ २८ ॥ ❀ ❀ पितृमेधविधानेन शवदाहादिविधिना साम्परायिकं परलोकसुखसाधनम् ॥ २९ ॥ ❀ ❀ क्षामामित्यादिकमसुरमोहनार्थम् ॥ ३०-३१ ॥ भ्रातृभ्यां लक्ष्मणविभीषणाभ्यां विभीषणस्य भ्रातृत्वमुपचारः ॥ ३२ ॥

जीवगोस्वामिकृतः क्रमसन्दर्भः

ततो ददर्श सीतामिति शेषः ॥ ३०-४२ ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्नं भक्ष्यं नरकहेतवे नरकभोगाय ॥ २८ ॥ ❀ ❀ साम्परायिकमौर्द्धदेहिकम् ॥ २९-३१ ॥ ❀ ❀ सीताम् आरोप्य भ्रातृभ्यां सुग्रीवलक्ष्मणाभ्याम् आरुरुहे यानं पुष्पकं हनुमद्युतः हनुमता सह युत् साहित्यं प्राप्य "यु मिश्रणे" भावकिबन्तालल्यब्लोपे पञ्चमी ॥ ३२-३३ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

नरकहेतवे नरकभोगाय कृतः ॥ २८ ॥ ❀ ❀ साम्परायिकम् औद्‌र्ध्वदेहिकं स्वानां रावणादीनां चक्रे ॥ २९ ॥ स्वस्य विरहेन वियोगेन व्याधिर्यस्याः अत एव क्षामां कृशाम् ॥ ३० ॥ ❀ ❀ दीनां वीक्ष्य अन्वकम्पत तदनन्तरम् आत्मसन्दर्शनेन य आह्लादस्तेन विकसत् प्रमुदितं मुखपङ्कजम् यस्यास्ताम् ॥ ३१ ॥ ❀ ❀ यानं पुष्पकम् आरोप्य पश्चात्स्वयं हनुमद्युतः भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां सह आरुरुहे सुग्रीवस्य श्रीरामभ्रातृत्वं सख्यं विधाय कपिभिरित्यनेनोक्तं रक्षोगणेशतामाकल्पमायुः लङ्कां च विभीषणाय दत्त्वा विभीषणेन सहैव पुरीं ययौ पादुके भरतोऽगृह्णात् चामरव्यजनोत्तमे विभीषणः स सुग्रीव इति वक्ष्यमाणात् कथंभूतः चीर्णव्रतः चीर्णवनवासलक्षणं व्रतं येन सः ॥ ३२-३३ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

तत्र लक्ष्मणस्येषुभिरर्दितान् हतान् स्वान्स्वान् बन्धून् नृपतीन् परिष्वज्य आत्मना स्वेनैव आत्मानं देहं घ्नन्त्यो दीनाः दुःखिताः सुस्वरं रुरुदुरित्यन्वयः ॥ २५ ॥ ❀ ❀ रोदनप्रकारं दर्शयति—हा हता इति । हे रावण वयं लङ्कावासिनः सर्वे हताः स्म । हेति खेदं द्योतयन्ति । कथमित्यपेक्षायामाह—कमिति । परैः शत्रुभिरर्दिता पीडिता त्वद्विहीना त्वया रहिता

लङ्का लङ्कास्थो जनः कं शरणं यायादित्यन्वयः। मद्राहित्येऽपि किमित्याशङ्क्य रक्षकाभावादित्याशयेन सम्बोधयन्ति—नाथेति। अन्यः कश्चित् रक्षकः प्रकल्पनीय इत्याशङ्क्य तत्र तवैव समर्थत्वादित्याशयेन पुनः सम्बोधयन्ति—लोकरावणेति, लोकान् जनान् रावयतीति तथा ॥ २६ ॥ ❀ ❀ भाग्यवशात् बह्वीषु स्त्रीषु सतीष्वप्येवं सीतायामासक्तिर्न युक्तेति सूचयन्त्यः सम्बोधयति—महाभागेति। कामवशं गतो भवान् सीतायास्तेजसः प्रभावं नैव वेद नैव ज्ञातवान्, येन तेजोऽनुभावेनेमां दशां मरणावस्थां नीतः प्राप्तोऽसि ॥ २७ ॥ ❀ ❀ कुलमुख्यस्यैतदत्यन्तमनुचितमित्याशयेन सम्बोधयन्ति—कुलनन्दनेति। वयमेषा लङ्का च त्वया सीतापहारपूर्वकप्राणत्यागेन विधवा कृता। तथा स्वदेहो गृध्राणामन्नं भक्ष्यः कृतः। आत्मा जीवस्तु नरकहेतवे नरकभोगाय कृतः ॥ २८ ॥ ❀ ❀ ततश्च कोशलेन्द्रेण श्रीरामेणानुमोदितः आज्ञप्तो विभीषणः स्वानां मृतानां रावणादीनां पितृमेधविधानेन यत्सांपरायिकमौर्ध्वदेहिकं यत्कर्मोक्तं तच्चक्रे इत्यन्वयः ॥ २९ ॥ ❀ ❀ ततस्तदनन्तरं भगवान् श्रीरामः अशोकवने य आश्रमस्तस्मिन् शिंशपावृक्षस्य मूलमाश्रितां मूले स्थितां स्वस्य विरहेण विश्लेषेण व्याधिर्यस्याः ताम् अतएव क्षामां कृशां सीतां ददर्शेत्यन्वयः ॥ ३० ॥ ❀ ❀ पारवश्येन दीनां आत्मनः स्वस्य सन्दर्शनेन य आह्लादः तेन विकसन्मुखं पङ्कजमिव यस्यास्तां प्रियतमां भार्यां सीतां वीक्ष्यान्वकम्पत कृपां कृतवान् ॥ ३१ ॥ ❀ ❀ ततश्च तां यानं पुष्पकमारोप्य भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां सह हनुमता च युतः स्वयमपि यानमारुरुहे। ततश्च रक्षोगणाधिपत्यमाकल्पान्तमायुर्लङ्कां च विभीषणाय दत्त्वा चीर्णमनुष्ठितं व्रतं पितुरनुशासनरूपं येन स भगवान् रामः पुरीमयोध्यां ययौ प्रतस्थे इत्यर्थः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वानिति। तत्र लक्ष्मणेषुभिर्लक्ष्मणस्य बाणैः, अर्दितान् स्वान् स्वान् बन्धून् पतीन्, परिष्वज्य, आत्मना आत्मानं, भृत्यः, दीनाः दुःखिताः सत्यः, सुस्वरं यथा तथा, रुरुदुः ॥ २५ ॥ ❀ ❀ रोदनप्रकारमेवाह। हेति। हेति खेदद्योतकमव्ययम्। हे नाथ, हे लोकरावण, हे रावण, वयं, हताः स्म हतप्राया बभूविम। अधुना परैः शत्रुभिः, अर्दिता संपीडिता, त्वया हीना रहिता, लङ्का लङ्कास्थो जनः, कं शरणं यायात् ॥ २६ ॥ ❀ ❀ नैवेति। हे महाभाग, भवान् कामवशं गतः सन्, सीतायाः, तेजोऽनुभावं जानक्यास्तेजसः प्रभावं, नैव वेद न ज्ञातवानसि। येन सीतातेजोऽनुभावेन, इमां दशां, नीतः प्राप्तवान् असि ॥ २७ ॥ ❀ ❀ कृतेति। हे कुलनन्दन, वयं विधवाः कृताः। एषा लङ्का च, विधवा कृता। येनेति शेषः। अयं शयानः, देहस्त्वत्कलेवरं, गृध्राणां कृतः। भक्ष्य इति शेषः। 'देहः कृतोऽन्नं गृध्राणाम्' इति पाठे अयमिति शेषः। आत्मा तु, नरकहेतवे नरकपाताय नारकयातनाभोगायेत्यर्थः। कृतः ॥ २८ ॥ ❀ ❀ स्वानामिति। ततः, कोसलेन्द्रेण श्रीरामेण अनुमोदितः, विभीषणः स्वानां रावणादीनां, पितृमेधविधानेन, पितृमेधविधिना, यदुक्तं विहितं, तत्सांपरायिकं, प्रेतकर्म, चक्रे ॥ २९ ॥ ❀ ❀ तत इति। ततः, भगवान् श्रीरामः, अशोकवनमेवाशोकवनिका तस्यां य आश्रमस्तस्मिन्, शिंशपामूलम् आश्रितां, शिंशपातरुमूलमाश्रित्य स्थितां, स्वस्य विरहो विश्लेष एव व्याधिर्यस्यास्तां, अत एव, क्षामां कृशां, सीतां, ददर्श ॥ ३० ॥ ❀ ❀ राम इति। रामः प्रियतमां, भार्यां, दीनां वीक्ष्य, अन्वकम्पत अनुकम्पितवान्। आत्मनः स्वस्य संदर्शनेन य आह्लादस्तेन विकसत् मुखं पङ्कजमिव यस्यास्तां, सीतां, यानं पुष्पकं, आरोप्य, भ्रातृभ्यां वालिरावणभ्रातृभ्यां सुग्रीवविभीषणाभ्यामित्यर्थः। सह, हनुमता युतः संश्च, आरुरुहे ॥ ३१ ॥ ❀ ❀ विभीषणायेति। विभीषणाय, रक्षोगणेशतां रक्षोगणाधिपत्यं, कल्पान्तम् आयुः, लङ्कां च, दत्त्वा, चीर्णमनुष्ठितं व्रतं पितुरनुशासनरूपं येन सः, भगवान् श्रीरामः, पुरीमयोध्यां, ययौ विभीषणेन सहैव प्रतस्थे ॥ ३२ ॥

भाषानुवादः

उन्होंने देखा कि उनके स्वजन-सम्बन्धी लक्ष्मणजीके बाणोंसे छिन्न-भिन्न होकर पड़े हुए हैं। वे अपने हाथों अपनी छाती पीट-पीटकर और अपने सगे-सम्बन्धियोंको हृदयसे लगा-लगाकर ऊँचे स्वरसे विलाप करने लगीं ॥ २५ ॥ हाय हाय ! स्वामी ! आज हम सब बेमौत मारी गयीं। एक दिन वह था, जब आपके भयसे समस्त लोकोंमें त्राहि-त्राहि मच जाती थी। आज वह दिन आ पहुँचा कि आपके न रहनेसे हमारे शत्रु लङ्काकी दुर्दशा कर रहे हैं और यह प्रश्न उठ रहा है कि अब लङ्का किसके अधीन रहेगी ॥ २६ ॥ ❀ ❀ आप सब प्रकारसे सम्पन्न थे, किसी भी बातकी कमी न थी। परन्तु आप कामके वश हो गये और यह नहीं सोचा कि सीताजी कितनी तेजस्विनी हैं और उनका कितना प्रभाव है। आपकी यही भूल आपकी इस दुर्दशाका कारण बन गयी ॥ २७ ॥ ❀ ❀ कभी आपके कामोंसे हम सब और समस्त राक्षसवंश आनन्दित होता था और आज हम सब तथा यह सारी लङ्का नगरी विधवा हो गयी। आपका

वह शरीर, जिसके लिये आपने सब कुछ कर डाला, आज गीधोंका आहार बन रहा है और अपने आत्माको आपने नरकका अधिकारी बना डाला। यह सब आपकी ही नासमझी और कामुकताका फल है ॥ २८ ॥ ❀ ❀ श्रीशुकदेवजी कहते हैं—परीक्षित्! कोसलाधीश भगवान् श्रीरामचन्द्रजीकी आज्ञासे विभीषणने अपने स्वजन-सम्बन्धियोंका पितृयज्ञकी विधिसे शास्त्रके अनुसार अन्त्येष्टिकर्म किया ॥ २९ ॥ ❀ ❀ इसके बाद भगवान् श्रीरामने अशोकवाटिकाके आश्रममें अशोक वृक्षके नीचे बैठी हुई श्रीसीताजीको देखा। वे उन्हींके विरहकी व्याधिसे पीड़ित एवं अत्यन्त दुर्बल हो रही थीं ॥ ३० ॥ ❀ ❀ अपनी प्राणप्रिया अर्धाङ्गिनी श्रीसीताजीको अत्यन्त दीन अवस्थामें देखकर श्रीरामका हृदय प्रेम और कृपासे भर आया। इधर भगवान्‌का दर्शन पाकर सीताजीका हृदय प्रेम और आनन्दसे परिपूर्ण हो गया, उनका मुखकमल खिल उठा ॥ ३१ ॥ ❀ ❀ भगवान्‌ने विभीषणको राक्षसोंका स्वामित्व, लङ्कापुरीका राज्य और एक कल्पकी आयु दी और इसके बाद पहले सीताजीको विमानपर बैठाकर अपने दोनों भाई लक्ष्मण तथा सुग्रीव एवं सेवक हनूमानजीके साथ स्वयं भी विमानपर सवार हुए ॥ ३२ ॥

लङ्कामायुश्च कल्पान्तं ययौ चीर्णव्रतः पुरीम् । अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥ ३३ ॥
उपगीयमानचरितः शतधृत्यादिभिर्मुदा । गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलाम्बरम् ॥ ३४ ॥
महाकारुणिकोऽतप्यज्जटिलं स्थण्डिलेशयम् । भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥ ३५ ॥
पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम्[1] । नन्दिग्रामात् स्वशिबिराद् गीतवादित्रनिःस्वनैः ॥ ३६ ॥
ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः[2] । स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजै रथैः ॥ ३७ ॥
सदश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः । श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः ॥ ३८ ॥
पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च[3] । पादयोर्न्यपतत् प्रेम्णा प्रक्लिन्नहृदयेक्षणः ॥ ३९ ॥
पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्पलोचनः । तमाश्लिष्य चिरं दोर्भ्यां स्नापयन् नेत्रजैर्जलैः ॥ ४० ॥

कृष्णप्रिया व्याख्या

अन्वयः—लंकां कल्पान्तम् आयुः च दत्त्वा चीर्णव्रतः भगवान् पथि लोकपालार्पितैः कुसुमैः अवकीर्यमाणः पुरीं ययौ ॥ ३३ ॥ ❀ ❀ शतधृत्यादिभिः मुदा उपगीयमानचरितः महाकारुणिकः भ्रातरं गोमूत्रयावकं वल्कलाम्बरं जटिलं स्थंडिलेशयं श्रुत्वा अतप्यत् प्राप्तम् आकर्ण्य पौरामात्यपुरोहितैः पादुके शिरसि न्यस्य गीतवादित्रनिःस्वनैः नंदिग्रामात् स्वशिविरात् अग्रजं रामं भरतः प्रत्युद्यतः ॥ ३४–३६ ॥ ❀ ❀ मुहुः ब्रह्मघोषेण पठद्भिः ब्रह्मवादिभिः स्वर्णकक्षपताकाभिः हेमैः चित्रध्वजैः सदश्वैः रुक्मसन्नाहैः रथैः पुरटवर्मभिः भटैः श्रेणीभिः वारमुख्याभिः पदानुगैः भृत्यैः च एव पारमेष्ठ्यानि उच्चावचानि पण्यानि उपादाय पुरतः पादुके न्यस्य प्रेम्णा प्रक्लिन्नहृदयेक्षणः प्राञ्जलिः बाष्पलोचनः पादयोः न्यपतत् तं चिरं दोर्भ्यां आश्लिष्य नेत्रजैः जलैः स्नापयन् ॥ ३७–४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आयुश्च दत्त्वा तेनापि सहैव ययौ ॥ ३३ ॥ ❀ ❀ गोमूत्रपक्वयवान्नभोजिनं भ्रातरं भरतम् ॥ ३४–३६ ॥ ❀ ❀ स्वशिबिराद्रामं विनाऽयोध्यामप्रविशन् स्वस्य वासं यत्र निर्मितवांस्तस्मात्सकाशाद्गीतादिभिर्युक्तो रामं प्रत्युद्यतोऽभिमुखं ययौ ब्रह्मघोषेण महता घोषेण पठद्भिः स्वर्णरसाक्ताः कक्षाः प्रांता यासां ताभिः पताकाभिः हैमैरिति चत्वारि रथविशेषणानि ॥ ३७–३८ ॥ ❀ ❀ पारमेष्ठ्यानि राजार्हाणि छत्रचामरादीनि ॥ ३९ ॥ ❀ ❀ प्रेम्णा प्रक्लिन्नं हृदयमीक्षणे च नेत्रे यस्य ॥ ४० ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

कल्पांतं यावत्कल्पम्। 'स कल्पो यत्र मनवश्चतुर्दश विशांपते' इत्युक्तेर्ब्रह्मैकदिनजीविनं चकारेत्यर्थः। चीर्णव्रतः पूर्णप्रतिज्ञातवनवाससंकल्पः। पुरीमयोध्याम् ॥ ३३ ॥ ❀ ❀ गोमूत्रयावकमस्ति भोज्यत्वेनास्येति मत्वर्थीयोच्। भ्रातरं

१. प्रत्युद्गतो २. शंसद्भि० । ३. तन्मूर्ध्नां ।

भरतम्। स्थंडिलेशयं मृन्निर्मितवेदिकाशय्यम् ॥ ३४ ॥ ❀ ❀ पादुके चित्रकूटस्थरामानयनगतभरतप्रार्थितश्रीरामदत्तकाष्ठमयपादरक्षके ॥ ३५ ॥ ❀ ❀ नंदिग्रामोऽयोध्याप्रांतग्रामविशेषः ॥ ३६ ॥ ❀ ❀ स्वर्णकक्षाः स्वर्णसूत्रसंबद्धाः पताकाः ॥ ३७ ॥ ❀ ❀ रुक्मसन्नाहैः स्वर्णसूत्रसंबद्धकौशेयरज्जुबंधनैरश्वैः। पुरटवर्ममिः स्वर्णकवचैर्भटैः योध्यभिः। पुरटं स्वर्णम् 'पुरोगे पुरटः प्रोक्तः सुवर्णे प्राग्दिशि स्थिते' इति कोशात्। श्रेणीभिस्सजातीयशिल्पिसंघैः। 'श्रेणी स्त्रीपुंसयोः पंक्तौ समानशिल्पिसंहतौ' इति मेदिनी ॥ ३८-३९ ॥ ❀ ❀ तं भरतम् ॥ ४०-४१ ॥

अन्वितार्थप्रकाशिका

अथेति। ततः पथि लोकपालैरिन्द्रादिभिरर्पितैः कुसुमैरवकीर्यमाणः आच्छाद्यमानः तथा शतधृत्यादिभिर्ब्रह्मादिभिर्मुदा हर्षेण उपगीयमानं चरितं यस्य तथाभूतो बभूव। यद्वा। अयं श्लोको रामविशेषणतया पूर्वश्लोक एव योज्यः ॥ ३३ ॥ ❀ ❀ गोमूत्रेति। भ्रातरं भरतं गोमूत्रयावकं गोमूत्रपक्वयवान्नभोजिनं वल्कलमेवाम्बरं यस्य तं जटिलं जटाधरं तथा स्थण्डिले दर्भैरास्तीर्णे भूतले शेत इति तथाभूतं श्रुत्वा महाकारुणिकः श्रीरामः अतप्यत् ॥ ३४ ॥ ❀ ❀ भरत इति चतुष्कम्। भरतः अग्रजं ज्येष्ठभ्रातरं श्रीरामं प्राप्तं पुरीमागच्छन्तमाकर्ण्य तत्पादुके स्वशिरसि न्यस्य निधाय स्वशिबिरात् नन्दिग्रामात् भरतो हि रामं विना अयोध्यामप्रविशन् नन्दिग्रामे वासमकल्पयत्। तस्मादेव स्वसैन्यनिवेशस्थानात् पौरादिभिः सहितः सन् तथा गीतैर्वादित्राणां मृदङ्गादीनां निस्वनैः शब्दैः ब्रह्म वेदं घोषेण उच्चस्वरेण मुहुः पठद्भिर्ब्रह्मवादिभिश्च सह स्वर्णरसाक्ताः कक्षाः प्रान्ताः यासां ताभिः पताकाभिर्हैमैः स्वर्णरचितैः चित्रा ध्वजा येषु तैः सन्तोऽश्वा येषु तैः रुक्मनिर्मिताः सन्नाहाः आच्छादनानि येषु तैर्विशेषणचतुष्टयोपेतै रथैः पुरटवर्ममिः स्वर्णकवचधारिभिर्भटैश्च सह। श्रेणीभिः ताम्बूलिकादिभिः तत्तद्वस्तुविक्रयपरैः वराणां समूहो वारः स एव मुख्यो जीविकासाधनं यासां ताभिर्वैश्याभिः पदानुगैः पादचारिभिः भृत्यैश्च सह पारमेष्ठ्यानि महाराजार्हाणि छत्रचामरादीनि उच्चावचानि पण्यानि बहुमूल्यानि रत्नादीन्युपायनानि चादाय प्रत्युद्यतः अभिमुखः ययौ ॥ ३५-३८ ॥ पादयोरिति। रामं प्राप्य प्रेम्णा प्रक्लिन्नमार्द्रीभूतं हृदयमीक्षणे नेत्रे च यस्य सः भरतः पुरतः पादुके न्यस्य निधाय पादयोर्न्यपतत्। ततः प्राञ्जलिः बाष्पलोचनश्च सन्नग्रे तस्थाविति शेषः ॥ ३९ ॥ ❀ ❀ तमिति सार्द्धम्। श्रीरामस्तं भरतं चिरं यथा भवति तथा आश्लिष्य नेत्रजैर्जलैरानन्दबिन्दुभिश्च स्नापयन् लक्ष्मणसीताभ्यां सह विप्रेभ्यो ये चार्हत्तमा नमस्कार्याः कुलवृद्धास्तेभ्यश्च स्वयं नमश्चक्रे प्रजाभिश्च स्वयं नमस्कृतो बभूव ॥ ४० ॥

वीरराघवव्याख्या

चीर्णमनुष्ठितं व्रतं पितुरनुशासनरूपं येन स भगवान् श्रीरामः पुरीमयोध्यां विभीषणेन सहैव ययौ, कथम्भूतः? पथि लोकपालैरिन्द्रादिभिरर्पितानि यानि कुसुमानि तैरवकीर्यमाणः ॥ ३३ ॥ ❀ ❀ शतधृत्यादिभिर्ब्रह्मादिभिः मुदा हर्षेण उपगीयमानं चरितं यस्य तथाभूतः पुरीं ययावित्यन्वयः। गोमुत्रपक्वयवान्नभोजनं वल्कलमम्बरं यस्य जटा अस्य सन्तीति तथा स्थण्डिले दर्भैरास्तीर्णे भूप्रदेशे शेत इति तथाभूतं भ्रातरं भरतं श्रुत्वा महाकारुणिको भगवान् अतप्यत परितताप भरतः प्राप्तं पुरीमागच्छन्तं तं श्रीराममाकर्ण्य पादुके स्वशिरसि निधाय पौरैरमात्यैः पुरोहितैः गीतैः वाद्यानां निस्स्वनैः ॥ ३४-३६ ॥ ब्रह्मवेदं मुहुर्मुहुःघोषेण उच्चैस्स्वरेण पठद्भिः ब्रह्मवादिभिः स्वर्णासक्ताः कक्ष्याः प्रान्ताः यासां ताभिः पताकाभिः रथैः स्वर्णकवचधारिभिर्भटैः श्रेणीभिस्ताम्बूलिकैः वाराङ्गनाश्रेष्ठाभिरुपायनोद्यतैरुपायनधारिभिर्भृत्यैश्च सहाग्रजं श्रीरामं स्वशिबिरान्नन्दिग्रामात् प्रत्युद्यतः अभिमुखं ययावित्यन्वयः। रामं विनाऽयोध्यामप्रविशन् भरतो नन्दिग्रामे स्वस्य वासं निर्मितवान् तस्मात् शिबिरात् ययावित्यर्थः। कथम्भूतैः रथैर्हैमैः स्वर्णमयैः चित्रा ध्वजा येषु सन्तः समीचीना अश्वाः येषां रुक्ममयाः सन्नाहाः बन्धना येषु तैः ॥ ३७-३८ ॥ ❀ ❀ पारमेष्ठ्यानि महाराजार्हाणि नानाविधानि छत्रचामरादीनि उपादाय प्रत्युद्यत इति पूर्वेणान्वयः। प्रेम्णा प्रक्लिन्नमार्द्रीभूतं हृदयमीक्षणे च यस्य सः ॥ ३९ ॥ ❀ ❀ प्रीत्या पादुके पुरतो निधाय पादयोरपतत् ततः प्राञ्जलिः बाष्पलोचनस्तस्थाविति शेषः। ततः श्रीरामः तं भरतं दृढं गाढं यथा तथा दोर्भ्यामालिङ्ग्य नेत्रजैर्हर्षाब्बिन्दुभिः स्नापयन् ॥ ४० ॥

विजयध्वजतीर्थकृता पदरत्नावली

चीर्णव्रतः पूर्णवनवासव्रतः ॥ ३३ ॥ ❀ ❀ शतधृत्यादिभिः ब्रह्मादिभिः गोमूत्रेण सह पक्वयावकाहारं भ्रातरं भरतम् ॥ ३४-३६ ॥ ❀ ❀ स्वर्णकक्ष्यैः सुवर्णमयीः कक्ष्याः उदरबन्धो येषां ते तथा तैर्हैमैर्हेमालङ्कृतैश्चित्रा नानावर्णा ध्वजाः येषां तैः ॥ ३७ ॥ ❀ ❀ रुक्मसन्नाहैः स्वर्णनिर्मिताः सन्नाहाः कवचानि येषां तैः पुरटं सुवर्णं श्रेणीभिरङ्गरक्षकैर्भृत्यैर्दासैः पारमेष्ठ्यान्यनर्घत्वेन प्रशस्तानि भाण्डानि अश्वाभरणानि पिठराद्युपकरणानि च ॥ ३८-४० ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गोमूत्रयावकं गोमूत्रपक्वयवान्नभोजिनम् ॥ ३४-३५ ॥ ❀ ❀ स्वशिबिरात् स्वीयसैन्यस्थानात् गीतादिभिर्युक्तः पठतां ब्रह्मवादिनां वेदघोषेण च स्वर्णरसाक्ताः कक्षाः प्रान्ता यासां ताभिः पताकाभिः पुरटवर्मभिः स्वर्णकवचयुक्तैः पारमेष्ठ्यानि छत्रचामरादिराजचिह्नानि पण्यानि बहुमूल्यानि रत्नादीनि च ॥ ३६-४१ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

गोमूत्रपक्वयवान्नभोजिनं वल्कलमम्बरं यस्य तम् ॥ ३४ ॥ ❀ ❀ जटाः अस्य सन्तीति जटिलस्तं भ्रातरं तं श्रुत्वा अतप्यत् ॥ ३५ ॥ ❀ ❀ भरतः अग्रजं प्राप्तमाकर्ण्य पादुके शिरसि न्यस्य गीतादिभिस्सह नन्दिग्रामात् प्रत्युद्ययौ अभिमुखं ययावित्यन्वयः । रामं विना अयोध्यामप्रविशन् स्वस्य वासं यत्र निर्मितवान् तस्मात् स्वशिबिरात् गीतैर्वाद्यानां निस्स्वनैश्च ॥ ३६ ॥ ❀ ❀ ब्रह्मघोषेण महता घोषेण पठद्भिर्ब्रह्मवादिभिश्च सह स्वर्णमयाः कक्षाः प्रान्ताः यासां ताभिः पताकाभिः हैमैरिति चत्वारि रथविशेषणानि हैमैः स्वर्णमयैः चित्रा ध्वजा येषु ॥ ३७ ॥ ❀ ❀ सन्तः अश्वा येषां रुक्मम-याः सन्नाहा येषु तैः ॥ ३८ ॥ ❀ ❀ पारमेष्ठ्यानि राजार्हाणि छत्रचामरादीनि प्रक्लिन्नं हृदयम् ईक्षणे नयने च यस्य सः ॥ ३९ ॥ ❀ ❀ पादुके पुरतो न्यस्य पादयोर्निपतन रामोपि तं भरतं नेत्रजैर्जलैः स्नापयन् आश्लिष्य ॥ ४० ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

व्रजन्तं वर्णयति—पथि लोकपालैरिन्द्रादिभिः अर्पितः कुसुमैरवकीर्यमाणः आच्छाद्यमानः तथा शतवृत्यादिभिः ब्रह्मादिभिः मुदा हर्षेण उपगीयमानं चरितं यस्य तथाभूतः पुरीं ययावित्यन्वयः ॥ ३३ ॥ ❀ ❀ एवं त्वरया गमने हेतुं सूचयन्नाह—गोमूत्रयावकमिति । गोमूत्रपक्वयवान्नभोजिनं वल्कलमेवाम्बरं यस्य तं जटिलं जटाधरं तथा स्थण्डिले दर्भैरास्तीर्णे भूतले भूप्रदेशे शेते इति तथाभूतं भ्रातरं भरतं श्रुत्वा अतप्यत् परितताप । तत्र हेतुमाह—महाकारुणिक इति ॥ ३४ ॥ ❀ ❀ भरतः अग्रजं ज्येष्ठभ्रातरं श्रीरामं प्राप्तं पुरीमागच्छन्तमाकर्ण्य श्रुत्वा तत्पादुके स्वशिरसि निधाय पौरादिभिः सहितः स्वशिबिरात् रामं विनाऽयोध्यां न प्रवेक्ष्यामि इति सङ्कल्प्य यत्र स्वनिवासं निर्मितवांस्तस्मान्नन्दिग्रामाख्यात्, प्रत्युद्यतोऽभिमुखं ययावित्यन्वयः ॥ ३५ ॥ ❀ ❀ गीतैः वादित्राणां मृदङ्गादीनां निस्स्वनैः शब्दैः ब्रह्म वेदं घोषेण उच्चस्वरेण मुहुः पठद्भिर्ब्रह्म-वादिभिश्च सह ॥ ३६ ॥ ❀ ❀ स्वर्णरसाक्ताः कक्षाः प्रान्ताः यासां ताः ताभिः पताकाभिर्हैमैः स्वर्णरचितैः चित्रा ध्वजा येषु तैः सन्तोऽश्वा येषु तैः रुक्मनिर्मिताः सन्नाहाः आच्छादनानि येषु तैर्विशेषणचतुष्टयोपेतैः रथैः पुरटवर्मभिः स्वर्णकवच-धारिभिर्भटैश्च सह ॥ ३६ ॥ ❀ ❀ श्रेणीभिः ताम्बूलिकादिभिः तत्तद्वस्तुविक्रयपरैः वराणां समूहो वारः स एव मुख्यो जीविकासाधनं यासां ताभिर्वेश्याभिः पदानुगैः पादचारिभिः भृत्यैश्च सह पारमेष्ठ्यानि महाराजार्हाणि च्छत्रचामरादीनि उच्चावचानि पण्यानि उपायनानि चादाय ॥ ३८ ॥ ❀ ❀ प्रेम्णा प्रक्लिन्नं आर्द्रीभूतं हृदयमीक्षणे नेत्रे च यस्य सः भरतः पादुके न्यस्य निधाय पादयोर्न्यपतत् । ततः प्राञ्जलिः संयोजिताञ्जलिर्बाष्पलोचनश्च सन्नग्रे तस्थाविति शेषेणान्वयः ॥ ३९ ॥ ततश्च श्रीरामस्तं भरतं चिरं यथा भवति तथा आश्लिष्य आलिङ्ग्य नेत्रजैर्जलैरानन्दबिन्दुभिश्च स्नापयन् लक्ष्मणसीताभ्यां सह विप्रेभ्यो ये चार्हसत्तमा नमस्कार्याः कुलवृद्धास्तेभ्यश्च स्वयं नमश्चक्रे, प्रजाभिश्च स्वयं नमस्कृतो बभूवेत्यन्वयः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कथंभूतः । अवेति । पथि, लोकपालैरिन्द्रादिभिरर्पितैः, कुसुमैः, अवकीर्यमाणः । गन्धर्वादिभिरिति शेषः । शतवृत्या-दिभिर्ब्रह्मादिभिः, मुदा हर्षेण, उपगीयमानं चरितं यस्य तथाभूतः, पुरीं ययावित्यन्वयः ॥ ३३ ॥ ❀ ❀ गोमूत्रेति । गोमूत्र-यावकं गोमूत्रपक्वयवान्नभोजिनं, वल्कलमेवाम्बरं यस्य तं, जटिलं जटाधरं, स्थण्डिले दर्भैरास्तीर्णे भूप्रदेशे शेते इति स्थण्डिलेशयस्तं, भ्रातरं भरतं, श्रुत्वा, महाकारुणिकः श्रीरामः, अतप्यत् परितताप ॥ ३४ ॥ ❀ ❀ भरत इति । नन्दिग्रामादिति च । भरतः, प्राप्तं पुरीमगच्छन्तमित्यर्थः । रामम् आकर्ण्य, पादुके शिरसि न्यस्य निधाय, पौराः पुरलोकाश्च अमात्याश्च पुरोहिताश्च तैः सह, गीतानि च वादित्राणि च तेषां स्वनास्तैः, घोषेणोच्चस्वरेण, ब्रह्म वेदं मुहुः पठद्भिः ब्रह्मवादिभिश्च सह, स्वशिबिरात् नन्दिग्रामात्, अग्रजं प्रत्युद्यतः ॥ ३५-३६ ॥ ❀ ❀ पुनः कैः सह प्रत्युद्यतस्तत्राह । स्वर्णेति । स्वर्णरसाक्ताः कक्षाः प्रान्ता यासां ताभिः पताकाभिः, हैमैः स्वर्णमयैः, चित्रा ध्वजा येषु तैः, सन्तोऽश्वा येषु तैः, रुक्मस्य स्वर्णस्य संनाहा बन्धनानि येषु तैः, रथैः सह, पुरटवर्मभिः स्वर्णकवचैः भटैश्च सह ॥ ३७ ॥ ❀ ❀ पुनः कैः सहेत्यत्राह । श्रेणीभिरिति । श्रेणीभिस्ता

म्बूलिकादिभिः, वारमुख्याभिः श्रेष्ठाभिर्वाराङ्गनाभिः, उपायनोद्यतैः, भृत्यैश्च सह, क्वचित्तु 'भृत्यैश्चैव पदानुगैः' इत्यपि पाठः। किं कृत्वा प्रत्युद्यतस्तत्राह। उच्चावचानि पण्यानि, पारमेष्ठ्यानि राजार्हाणि छत्रचामरादीनि च, उपादाय, प्रत्युद्यत इति संबन्धः ॥ ३८ ॥ ❀ ❀ पादयोरिति। प्रेम्णा, प्रक्लिन्नमार्द्रीभूतं हृदयमीक्षणे च यस्य सः, भरतः पुरतः, पादुके न्यस्य, पादयोः, न्यपतत्। ततः प्राञ्जलिः बाष्पलोचनः तस्थाविति शेषः ॥ ३९ ॥ ❀ ❀ तमिति। ततः, रामः, तं भरतं, दृढं गाढं यथा तथा, चिरमिति पाठे बहुवेलमित्यर्थः। दोर्भ्यां भुजाभ्यां, आश्लिष्यालिङ्ग्य, नेत्रजैः जलैः हर्षाश्रुबिन्दुभिः स्नापयन् सन्, लक्ष्मणश्च सीता च ताभ्यां सह, विप्रेभ्यो ब्राह्मणेभ्यः, ये अर्हसत्तमाः नमस्कार्याः कुलवृद्धाः, तेभ्यश्च, स्वयं नमः चक्रे। प्रजाभिः नमस्कृतश्च ॥ ४० ॥

भाषानुवादः

इस प्रकार चौदह वर्षका व्रत पूरा हो जानेपर उन्होंने अपने नगरकी यात्रा की। उस समय मार्गमें ब्रह्मा आदि लोकपालगण उनपर बड़े प्रेमसे पुष्पोंकी वर्षा कर रहे थे ॥ ३३ ॥ ❀ ❀ इधर तो ब्रह्मा आदि बड़े आनन्दसे भगवानकी लीलाओंका गान कर रहे थे और उधर जब भगवान्‌को यह मालूम हुआ कि भरतजी केवल गोमूत्रमें पकाया हुआ जौका दलिया खाते हैं, वल्कल पहनते हैं और पृथ्वीपर डाभ बिछाकर सोते हैं, एवं उन्होंने जटाएँ बढ़ा रक्खी हैं तब वे बहुत दुःखी हुए। उनकी दशाका स्मरण कर परम करुणाशील भगवान्‌का हृदय भर आया। जब भरतको मालूम हुआ कि मेरे बड़े भाई भगवान श्रीरामजी आ रहे हैं तब वे पुरवासी, मन्त्री और पुरोहितोंको साथ लेकर एवं भगवान्‌की पादुकाएँ सिरपर रखकर उनकी अगवानीके लिये चले। जब भरतजी अपने रहनेके स्थान नन्दिग्रामसे चले, तब लोग उनके साथ-साथ मङ्गलगान करते, बाजे बजाते चलने लगे। वेदवादी ब्राह्मण बार-बार वेदमन्त्रोंका उच्चारण करने लगे और उसकी ध्वनि चारों ओर गूँजने लगी। सुनहरी कामदार पताकाएँ फहराने लगीं। सोनेसे मढ़े हुए तथा रंग बिरंगी ध्वजाओंसे सजे हुए रथ, सुनहले साजसे सजाये हुए सुन्दर घोड़े तथा सोनेके कवच पहने हुए सैनिक उनके साथ-साथ चलने लगे। सेठ-साहूकार, श्रेष्ठ वाराङ्गनाएँ पैदल चलनेवाले सेवक और महाराजाओंके योग्य छोटी-बड़ी सभी वस्तुएँ उनके साथ चल रही थीं। भगवान्‌को देखते ही प्रेमके उद्रेकसे भरतजीका हृदय गद्गद हो गया, नेत्रोंमें आँसू छलक आये, वे भगवान्‌के चरणोंपर गिर पड़े ॥ ३४–३९ ॥ ❀ ❀ उन्होंने प्रभुके सामने उनकी पादुकाएँ रख दीं और हाथ जोड़कर खड़े हो गये। नेत्रोंसे आँसूकी धारा बहती जा रही थी भगवान्‌ने अपने दोनों हाथोंसे पकड़कर बहुत देरतक भरतजीको हृदयसे लगाये रक्खा। भगवान्‌के नेत्रजलसे भरतजीका स्नान हो गया ॥ ४० ॥

रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः। तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥ ४१ ॥
धुन्वन्त उत्तरासङ्गान् पतिं वीक्ष्य चिरागतम्। उत्तराः कोशला माल्यैः किरन्तो ननृतुर्मुदा ॥ ४२ ॥
पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे। विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ॥ ४३ ॥
धनुर्निषङ्गाञ्छत्रुघ्नः सीता तीर्थकमण्डलुम्। अबिभ्रदङ्गदः खड्गं हैमं चर्मर्क्षराण् नृप ॥ ४४ ॥
पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च बन्दिभिः। विरेजे भगवान् राजन् ग्रहैश्चन्द्र इवोदितः ॥ ४५ ॥
भ्रातृभिर्नन्दितः सोऽपि सोत्सवां प्राविशत् पुरीम्। प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम् ॥ ४६ ॥
गुरून् वयस्यावरजान् पूजितः प्रत्यपूजयत्। वैदेही लक्ष्मणश्चैव यथावत् समुपेयतुः ॥ ४७ ॥
पुत्रान् स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः। आरोप्याङ्केऽभिषिञ्चन्त्यो बाष्पौघैर्विजहुः शुचः ॥ ४८ ॥

कृष्णप्रिया व्याख्या

अन्वयः—रामः लक्ष्मणसीताभ्यां ये अर्हसत्तमाः तेभ्यः विप्रेभ्यः स्वयं नमः चक्रे प्रजाभिः च नमस्कृतः ॥ ४१ ॥ चिरागतं पतिं वीक्ष्य उत्तरासंगान् धुन्वन्तः उत्तराः कोशलाः माल्यैः किरन्तः मुदा ननृतुः ॥ ४२ ॥ ❀ ❀ भरतः पादुके अगृह्णात् ससुग्रीवः विभीषणः चामरव्यजने मरुत्सुतः श्वेतच्छत्रम् ॥ ४३ ॥ ❀ ❀ नृप शत्रुघ्नः धनुर्निषङ्गान् सीता तीर्थ-

१. ङ्गं शत्रु०। २. स्थो वृतः। ३. पत्नीं।

कमण्डलुम् अंगदः खड्गम् ऋक्षराट् हैमं चर्म ॥ ४४ ॥ ❀ ❀ राजन पुष्पकस्थः स्त्रीभिः अन्वितः बन्दिभिः स्तूयमानः भगवान् ग्रहैः उदितः चंद्रः इव विरेजे ॥ ४५ ॥ ❀ ❀ भातृभिः नंदितः सः अपि सोत्सवां पुरीं प्राविशत् राजभवनं प्रविश्य गुरुपत्नीः स्वमातरं गुरून् वयस्यावरजान् पूजितः प्रत्यपूजयत् वैदेही लक्ष्मणः एव यथावत् समुपेयतुः ॥ ४६-४७ ॥ उत्थिताः तन्वः प्राणान् इव ताः स्वमातरः पुत्रान् अंके आरोप्य बाष्पौघैः अभिषिंचन्त्यः शुचः विजहुः ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नेत्रजैर्जलैः स्नापयन्त्राश्लिष्य येर्हसत्तमाः कुलवृद्धास्तेभ्योऽपि नमनं चक्रे ॥ ४१-४२ ॥ ❀ ❀ अयोध्याप्रवेशप्रकारमाह । पादुके इति सार्द्धैस्त्रिभिः ॥ ४३ ॥ ❀ ❀ धनुश्च निषंगौ च तान् । ऋक्षराट् जाम्बवान् ॥ ४४-४५ ॥ ❀ ❀ गुरुपत्नीः कैकेयाद्याः ॥ ४६ ॥ ❀ ❀ वयस्यानवरजांश्च । यथावदनुक्रमेण समुपेयतुः ॥ ४७ ॥ ❀ ❀ बाष्पौघैरभिषिंचंत्यः शुचः शोकान्विजहुः । शेषं स्पष्टम् ॥ ४८-५६ ॥

इति श्रीमद्भागवते नवमस्कंधे टीकायां दशमोऽध्यायः ॥ १० ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

उत्तरासंगमुत्तरीयवस्त्रम् । धुन्वन्तः कंपयंतः । यद्वोत्तरासंगं कंठगृहीतवाद्यं हस्ताभ्यां वादयंतः "प्रावारमुत्तरासंगं वाद्यं यत्कंठलंबितम् । चर्मावनद्धं हस्ताभ्यां वाद्यते मर्दलादि तत् ।" इति कोशात् ॥ ४२-४३ ॥ ❀ ❀ तीर्थकमंडलुं तीर्थोदकसंभृतकरकाम् । ऋक्षराट् जांबवान् ॥ ४४-४५ ॥ ❀ ❀ सोपि भरतोपि । रामो वा । श्रीरामे गते भरतोऽप्ययोध्यां नाविक्षदिति प्रसिद्धेः । स्वमातरं कौशल्याम् ॥ ४६ ॥ ❀ ❀ समुपेयतुः नमस्कारादि यथोचितं चक्रतुः ॥ ४७ ॥ गतान्प्राणानवाप्य तन्वः शरीराणि ॥ ४८ ॥

अन्वितार्थप्रकाशिका

धुन्वन्त इति । उत्तराः कोशलाः उत्तरकोशलदेशस्थाः जनाः चिरादागतं पतिं श्रीराममवलोक्य मुदा हर्षेण माल्यैः पुष्पैः किरन्तः उत्तरासङ्गान् उत्तरीयान् विधुन्वन्तश्चालयन्तो ननृतुः ॥ ४१ ॥ ❀ ❀ अयोध्याप्रवेशप्रकारमाह—पादुके इति । भरतः अग्रवर्ती पादुके अगृह्णात् । विभीषणः सुग्रीवश्च पार्श्ववर्त्तिनौ चामरव्यजनोत्तमे अगृह्णीताम् । मरुत्सुतो हनुमान् पृष्ठवर्त्ती श्वेतछत्रमगृह्णात् ॥ ४२ ॥ ❀ ❀ धनुरिति । हे नृप ! धनुश्च निषङ्गौ च तान् शत्रुघ्नोऽगृह्णात् । तीर्थजलभृतं कमण्डलुं सीता अगृह्णात् । खड्गमङ्गदोऽबिभ्रत् । आर्षः प्रयोगः । हैमं स्वर्णखचितं चर्म खेटं च ऋक्षराट् जाम्बवान् अबिभ्रत् ॥ ४३ ॥ ❀ ❀ पुष्पकेति । हे राजन् ! स्त्रीभिः पूर्वोक्ताभिर्वारमुख्याभिरन्वितः । यद्वा । स्त्रीभिः सीतया आदरार्थं बहुवचनम् । बन्दिभिश्च स्तूयमानः पुष्पकस्थो भगवान् रामः उदितः ग्रहैर्गुरुशुक्रादिभिर्वृतश्चन्द्र इव विरेजे ॥ ४४ ॥ ❀ ❀ भ्रातृभिरिति अर्द्धम् । भ्रातृभिः भरतादिभिश्च नन्दितः अनुमोदितः सोऽपि रामः सोत्सवां मार्जनादिपूर्वकध्वजादिभिरलंकृतां प्रमुदितां प्रमुदितजनपूर्णां पुरीमयोध्यां प्राविशत् ॥ ४५ ॥ ❀ ❀ प्रविश्येति । राजभवनं प्रविश्य गुरुपत्नीः कैकेय्याद्याः स्वमातरं कौशल्यां गुरुन्वशिष्ठादीन् वयस्यान्समानवयस्कानवरजान् कनिष्ठांश्च यथोचितं तैः पूजितः सत्कृतः सन् प्रत्यपूजयत् सम्मानितवान् इत्यर्थः ॥ ४६ ॥ ❀ ❀ वैदेहीत्यर्द्धम् । तथा वैदेही लक्ष्मणश्च यथावद्यथायोग्यं पूजितौ तान् पूजितवन्तौ च समुपेयतुः सम्यक् राजभवनं विविशतुः ॥ ४७ ॥ ❀ ❀ पुत्रानिति । स्वमातरः कौशल्यादयः प्राणरहिताः मूर्छिता तन्वः देहा तथा प्राणान् प्राप्योत्थिता भवन्ति तथा पुत्रान् समीक्ष्योत्थिताः सत्यः अङ्के आरोप्य बाष्पौघैः हर्षजन्याश्रुसङ्घैरभिषिञ्चन्त्यः शुचस्तद्विरहशोकान् विजहुः त्यक्तवत्यः ॥ ४८ ॥

वीरराघवव्याख्या

लक्ष्मणसीताभ्यां सह विप्रेभ्यो ये चार्हसत्तमाः नमस्कार्याः कुलवृद्धास्तेभ्यश्च स्वयं नमश्चक्रे प्रजाभिर्नमस्कृतश्च ॥४१॥ उत्तराः कोशला उत्तरकोशलदेशस्था जनाः चिरागतं पतिं श्रीराममवलोक्य माल्यैः पुष्पैः किरन्तः उत्तरा सङ्गानुत्तरीयान् विधुन्वन्तश्चालयन्तो ननृतुः ॥ ४२ ॥ ❀ ❀ अयोध्याप्रवेशप्रकारमाह—त्रिभिः सार्द्धैः । भरतः पादुके अगृह्णात् विभीषणः सुग्रीवश्च व्यजनोत्तमे अगृह्णतां मरुत्सुतो हनुमान् श्वेतातपत्रम् ॥ ४३ ॥ ❀ ❀ धनुश्च निषङ्गौ च तान शत्रुघ्नः अगृह्णादित्यनुषङ्गः । सीता तीर्थकमण्डलुमबिभ्रत्, हे नृप ! अङ्गदः खड्गं हैमं स्वर्णखचितं चर्म

खेटम् ऋक्षराट् जाम्बवान् अबिभ्रत् ॥ ४४ ॥ ❀ ❀ हे राजन्! भगवान् श्रीरामः पुष्पकस्थः स्त्रीभिः परिवृतः बन्दिभिः स्तूयमानश्च यथोदितश्चन्द्रो ग्रहैर्गुरुशुक्रादिभिर्विराजते तथा विरेजे बभ्राजे ॥ ४५ ॥ ❀ ❀ भ्रातृभिर्भरतादिभिः नन्दितोऽनुमोदितः उत्सवेन सहितश्च स भगवान् पुरीमयोध्यां प्राविशत् ततो राजभवनं प्रविश्य गुरुपत्नीः कैकेय्याद्याः स्वमातरं कौशल्याम् ॥ ४६ ॥ ❀ ❀ गुरून् वसिष्ठादीन् वयस्यान् वयस्याधिकान् अवरजांश्च कुलीनान् यथायोग्यं तैः पूजितः प्रत्यपूजयत् तथा वैदेही लक्ष्मणश्च यथावत् यथायोग्यं पूजयन्तौ पूजितौ च सम्यगुपेयतुः राजभवनमित्यनुषङ्गः ॥ ४७ ॥ ❀ ❀ मातरः कौशल्यादयः सुतान् प्राप्य स्वाः स्वकीयाः तन्वः देहाः प्राणान् प्राप्य यथोत्थिता भवन्ति तद्वदुत्थिताः सत्यः अङ्के आरोप्य हर्षजैर्बाष्पबिन्दुसङ्घैः सिञ्चन्त्यः शुचः शोकान् विजहुः ॥ ४८ ॥

विजयध्वजतीर्थकृता पदरत्नावली

ततस्तत्र ये विप्रा अभवंस्तेभ्यः ॥ ४१ ॥ ❀ ❀ उत्तरासङ्गम् उत्तरीयवस्त्रं धुन्वन्तः कम्पयन्तः ॥ ४२-४३ ॥ निषङ्गं तूणीरम् ऋक्षराट् जाम्बवान् ॥ ४४-४७ ॥ ❀ ❀ गत्वा गतान् प्राणानवाप्य तन्वः तनवः यथोत्थिता भवन्ति तथा विरहशुचः ॥ ४८ ॥

जीवगोस्वामिकृतः क्रमसन्दर्भः

पादुकेत्यर्द्धकं बाष्पलोचनोऽभूदिति शेषः ॥ ४३-५६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे दशमोऽध्यायः ॥ १० ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उत्तराः कोशलाः अयोध्यावासिनः उत्तरासङ्गान् उत्तरीयान् धुन्वन्तः कम्पयन्तो ननृतुः ॥ ४२ ॥ ❀ ❀ अयोध्याप्रवेशप्रकारमाह—पादुके अगृह्णात् भरतोऽग्रवर्ती विभीषणसुग्रीवौ पार्श्वद्वयवर्त्तिनौ चामरव्यजनहस्तौ श्वेतच्छत्रधारी हनुमान् पृष्ठवर्ती ॥ ४३-४५ ॥ ❀ ❀ गुरुपत्नीः कैकेयाद्याः स्वमातरं कौशल्याञ्च ॥ ४६ ॥ ❀ ❀ गुरूनन्यांश्च गुरुलोकान् वन्दित्वा वयस्यानवरजांश्च प्रत्यपूजयन् तैः पूजितस्सन् यथावत् यथोचितं वन्दनादिभिः सम्यगुपेयतुः ॥ ४७-५६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तवेतसाम्। नवमे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

शुकदेवकृतः सिद्धांतप्रदीपः

लक्ष्मणसीताभ्यां सह विप्रेभ्यो येऽर्हसत्तमास्तेभ्यश्च नमश्चक्रे कथम्भूतः? प्रजाभिर्नमस्कृतः ॥ ४१ ॥ ❀ ❀ पतिं श्रीरामं वीक्ष्य उत्तराः कोशला उत्तरकोशलदेशवसिनः उत्तरासङ्गान् उत्तरीयान् धुन्वन्तो भ्रामयन्तः माल्यैः किरन्तः ननृतुः ॥ ४२ ॥ ❀ ❀ पुरीप्रवेशोत्सवं वर्णयति—पादुके इत्यादिना। चामरव्यजनोत्तमे सुग्रीवसहितो विभीषणः अगृह्णात् उभे उभौ अगृह्णताम् ॥ ४३ ॥ ❀ ❀ धनुर्निषङ्गौ च तान् शत्रुघ्नः ऋक्षराट् जाम्बवान् ॥ ४४-४५ ॥ ❀ ❀ गुरुपत्नीः कैकेय्याद्याः मातरं कौशल्याम् ॥ ४६ ॥ ❀ ❀ गुरून् वसिष्ठादीन् वयस्यान् अवरजांश्च वैदेही लक्ष्मणश्च यथावत् यथोचितं पूजयन्तौ पूजितौ च समुपेयतुः राजभवनमित्यनुषङ्गः ॥ ४७ ॥ ❀ ❀ पुत्रान् श्रीरामादीन् मातरः श्रीकौशल्याद्याः बाष्पौघैरानन्दाश्रुप्रवाहैरभिषिञ्चन्त्यः शुचः शोकान् जहुः ॥ ४८-५६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे दशमाऽध्यायार्थप्रकाशः ॥ १० ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

उत्तराः कोशलाः उत्तरकोशलदेशस्था जनाः, चिरादागतं पतिं श्रीराममवलोक्य मुदा हर्षेण माल्यैः पुष्पैः किरन्तः उत्तरासङ्गान् उत्तरीयान् विधुन्वन्तश्चालयन्तो ननृतुरित्यन्वयः ॥ ४१ ॥ ❀ ❀ अयोध्याप्रवेशप्रकारमाह—पादुकेति सार्द्धैस्त्रिभिः। भरतः पादुके अगृह्णात्। विभीषणः सुग्रीवश्च चामरव्यजनोत्तमे अगृह्णीताम्। मरुत्सुतो हनुमान् श्वेतच्छत्रमगृह्णात् ॥ ४२ ॥ ❀ ❀ धनुश्च निषङ्गौ च तान् शत्रुघ्नोऽगृह्णात्। तीर्थजलभृतं कमण्डलुं सीता अबिभ्रत्। खड्गमङ्गदोऽगृह्णात्। हैमं स्वर्णखचितं चर्मखेटं च ऋक्षराट् जाम्बवान् अबिभ्रत्। एवमेव राजवृत्तं च तव विदितमेवेत्याशयेन सम्बोधयति—नृपेति ॥ ४३ ॥ ❀ ❀ हे राजन् स्त्रीभिः वारमुख्याभिरन्वितः परिवृतो बन्दिभिश्च स्तूयमानः पुष्पकस्थो

भगवान् रामः उदितः ग्रहैर्गुरुशुक्रादिभिर्वृतश्चन्द्र इव रेजे इत्यन्वयः ॥ ४४ ॥ ❀ ❀ भ्रातृभिर्भरतादिभिश्च नन्दितः अनुमोदितः सोऽपि रामः सोत्सवां माजेनादिपूर्वं कध्वजादिभिरलङ्कृतां प्रमुदितजनपूर्णां पुरीमयोध्यां प्राविशदित्यन्वयः ॥ ४५ ॥ ततो राजभवनं प्रविश्य गुरुपत्नीः कैकेय्याद्याः स्वमातरं कौशल्यां गुरून् वसिष्ठादीन् वयस्यान् समानवयस्कानवरजांश्च यथोचितं तैः पूजितः सन्मानितवान् इत्यर्थः ॥ ४६ ॥ ❀ ❀ तथा वैदेही लक्ष्मणश्च यथावद्यथायोग्यं पूजितौ तान् पूजितवन्तौ च समुपेयतुः सम्यक् राजभवनं विविशतुरित्यन्वयः ॥ ४७ ॥ ❀ ❀ स्वमातरः कौशल्यादयः पुत्रान् समीक्ष्योत्थिताः सत्यः अङ्के आरोप्य बाष्पौघैः हर्षजन्याश्रुसङ्घैरभिषिञ्चन्त्यः शुचस्तद्विरहशोकान् विजहुः त्यक्तवत्यः । उत्थाने दृष्टान्तमाह— प्राणानिति । तन्वः प्राणरहिताः मूर्च्छिता देहाः यथा प्राणान् प्राप्योत्थिता भवन्ति तथा रामादिविरहेण मूर्च्छितास्तान् दृष्ट्वोत्थिता जाता इत्यर्थः ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

धुन्वन्त इति । उत्तराः कोशलाः, उत्तरकोशलदेशस्था जना इत्यर्थः । चिरागतं पतिं श्रीरामं, वीक्ष्य अवलोक्य, मुदा माल्यैः पुष्पैः, किरन्तः, उत्तरासङ्गान्नुत्तरीयवासःप्रान्तान्, धुन्वन्तश्चालयन्तः सन्तः, ननृतुः ॥ ४१ ॥ ❀ ❀ अथास्यायोध्याप्रवेशप्रकारमाह सार्द्धैस्त्रिभिः । पादुके इति । भरतः पादुके, अगृह्णात, सुग्रीवः विभीषणश्च चामरव्यजनोत्तमे उत्तमे चामरव्यजने, अगृह्णाताम् । विभीषणश्चामरं सुग्रीवो व्यजनमगृह्णादित्यर्थः । मरुत्सुतो हनुमान्, श्वेतच्छत्रं, अगृह्णात्, ॥ ४२ ॥ ❀ ❀ धनुरिति । शत्रुघ्नः, धनुश्च निषङ्गौ च तान्, अगृह्णादित्यनुषङ्गनीयम् । सीता, तीर्थकमण्डलुं, अगृह्णात्, अङ्गदः, खड्गं, अबिभ्रत् । हे नृप ऋक्षराट् जाम्बवान्, हैमं स्वर्णखचितं, चर्म खेटम् अबिभ्रत् ॥ ४३ ॥ ❀ ❀ पुष्पकेति । हे राजन्, भगवान् श्रीरामः, पुष्पकस्थः, स्त्रीभिः आन्वतः परिवृतः, बन्दिभिः स्तूयमानश्च सन्, उदितः चन्द्रः, ग्रहैः गुरुशुक्रादिभिः इव, विरेजे । स एवंभूतः रामः, भ्रातृभिर्भरतादिभिः, नन्दितोऽनुमोदितः, सोत्सव उत्सवेन सह वर्त्तमानः सन्, अप्येव, पुरीं प्राविशत् ॥ ४४ ॥ ❀ ❀ प्रविश्येति । ततः, राजभवनं प्रविश्य, गुरुपत्नीः वसिष्ठपितृपत्नीः अरुन्धती-कैकेय्याद्याः, स्वमातरं कौशल्यां, गुरून्वसिष्ठादीन्, वयस्याः ज्येष्ठाश्च अवरजाः कनिष्ठाश्च तान्, तैः पूजितः सन्, प्रत्यपूजयत् । वयस्यान्स्वयं नमनादिभिः प्रत्यपूजयत् । स्वयं च तैराशीभिः पूजितः, स्वयमवरजानाशिषा प्रत्यपूजयत्तैश्चोपहारप्रणामादिभिः पूजित इति यथायोग्यं बोध्यम् ॥ ४५ ॥ ❀ ❀ वैदेहीति । तथा, वैदेही, लक्ष्मणश्च यथावद्यथायोग्यं, पूजयन्तौ पूजितौ च सन्ताविति शेषः । समुपेयतुः सम्यगुपेयतुः । राजभवनमिति शेषः । तेषां मातरः, कौशल्यादयः, पुत्रान् स्वस्वसुतान्, प्राप्य, स्वाः स्वकीयाः, तन्वो देहाः, प्राणान् प्राप्य इव, उत्थिताः भवन्ति । स्वा इत्यत्र स्वानित्यपि पाठः । तदा पुत्रविशेषणम् । तद्वदुत्थिताः सत्यः, अङ्के, आरोप्य, बाष्पौघैः हर्षजैर्बाष्पबिन्दुसंघैः, अभिषिञ्चन्त्यः सत्यश्च, शुचः शोकान्, विजहुः ॥ ४६ ॥ जटा इति । ततः गुरुर्वसिष्ठः कुलवृद्धैः समं सह, विधिवत्, जटाः निर्मुच्य, चतुःसिन्धुजलादिभिः, आदिशब्दाद्गङ्गायमुना-जलादिभिश्च, श्रीरामं, इन्द्रं यथा, तथैव अभ्यषिञ्चत् ४७ ॥ ❀ ❀ एवमिति । एवं कृतं शिरःस्नानं येन सः, सु शोभने वाससी यस्य सः, सुष्ठु यथा तथा, अलंकृतः स्वयमलंकृत इति पाठे स्पष्टोऽर्थः । श्रीरामः, स्वलंकृतैः सुवासोभि, भ्रातृभिः, तथाभूतया भार्यया च, बभौ ॥ ४८ ॥

भाषानुवादः

इसके बाद सीताजी और लक्ष्मणजीके साथ भगवान् श्रीरामजीने ब्राह्मण और पूजनीय गुरुजनोंको नमस्कार किया। तथा सारी प्रजाने बड़े प्रेमसे सिर झुकाकर भगवान्‌के चरणोंमें प्रणाम किया ॥ ४१ ॥ ❀ ❀ उस समय उत्तरकोसल देशकी रहने वाली समस्त प्रजा अपने स्वामी भगवान्‌को बहुत दिनोंके बाद आये देख अपने दुपट्टे हिला-हिलाकर पुष्पोंकी वर्षा करती हुई आनन्दसे नाचने लगी ॥ ४२ ॥ ❀ ❀ भरतजीने भगवान्‌की पादुकाएँ लीं, विभीषणने श्रेष्ठ चँवर, सुग्रीवने पंखा और हनूमान्‌जीने श्वेत छत्र ग्रहण किया ॥ ४३ ॥ ❀ ❀ परीक्षित् ! शत्रुघ्नजीने धनुष और तरकस, सीताजीने तीर्थोंके जलसे भरा कमण्डलु, अङ्गदने सोनेका खड्ग और जाम्बवान्‌ने ढाल ले ली ॥ ४४ ॥ ❀ ❀ इन लोगोंके साथ भगवान् पुष्पक विमानपर विराजमान हो गये, चारों तरफ यथास्थान स्त्रियाँ बैठ गयीं, बन्दीजन स्तुति करने लगे। उस समय पुष्पक विमानपर भगवान् श्रीरामकी ऐसी शोभा हुई, मानो ग्रहोंके साथ चन्द्रमा उदय हो रहे हों ॥ ४५ ॥ इस प्रकार भगवान्‌ने भाइयोंका अभिनन्दन स्वीकार करके उनके साथ अयोध्यापुरीमें प्रवेश किया। उस समय वह पुरी आनन्दोत्सवसे परिपूर्ण हो रही थी। राजमहलमें प्रवेश करके उन्होंने अपनी माता कौसल्या, अन्य माताओं, गुरुजनों, बराबरके मित्रों और छोटोंका यथायोग्य सम्मान किया तथा उनके द्वारा किया हुआ सम्मान स्वीकार किया।

श्रीसीताजी और लक्ष्मणजीने भी भगवान्‌के साथ-साथ सबके प्रति यथायोग्य व्यवहार किया ॥ ४६-४७ ॥ ❀ ❀ उस समय जैसे मृतकशरीरमें प्राणोंका सञ्चार हो जाय, वैसे ही माताएँ अपने पुत्रोंके आगमनसे हर्षित हो उठीं। उन्होंने उनको अपनी गोदमें बैठा लिया और अपने आँसुओंसे उनका अभिषेक किया। उस समय उनका सारा शोक मिट गया ॥ ४८ ॥

जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः। अभ्यषिञ्चद् यथैवेन्द्रं [1]चतुःसिन्धुजलादिभिः ॥ ४९ ॥
एवं कृतशिरःस्नानः सुवासाः स्रग्व्यलङ्कृतः। स्वलङ्कृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ॥ ५० ॥
अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः।
प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः। जुगोप पितृवद् रामो मेनिरे पितरं च तम् ॥ ५१ ॥
त्रेतायां वर्तमानायां कालः कृतसमोऽभवत्। रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ॥ ५२ ॥
वनानि नद्यो गिरयो वर्षाणि द्वीपसिन्धवः। सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ॥ ५३ ॥
[2]नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः। मृत्युश्चानिच्छतां नासीद् रामे राजन्यधोक्षजे ॥ ५४ ॥
एकपत्नीव्रतधरो राजर्षिचरितः शुचिः। स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरत् ॥ ५५ ॥
प्रेम्णानुवृत्त्या शीलेन प्रश्रयावनता सती। धिया ह्रिया च भावज्ञा भर्तुः सीताहरन्मनः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे [3]रामचरिते दशमोऽध्यायः ॥ १० ॥

कृष्णप्रिया व्याख्या

अन्वयः—विधिवत् जटाः निर्मुच्य कुलवृद्धैः समं गुरुः चतुःसिंधुजलादिभिः यथा इंद्रम् एव अभ्यषिंचत् ॥ ४९ ॥ एवं कृतशिरस्नानः सुवासाः स्रग्वी अलंकृतः स्वलंकृतैः सुवासोभिः भ्रातृभिः भार्यया बभौ ॥ ५० ॥ ❀ ❀ भ्रात्रा प्रणिपत्य प्रसादितः रामः आसनम् अग्रहीत् स्वधर्मनिरताः वर्णाश्रमगुणान्विताः प्रजाः पितृवत् जुगोप च तं पितरं मेनिरे ॥ ५१ ॥ धर्मज्ञे सर्वभूतसुखावहे रामे राजनि त्रेतायां वर्तमानायां कृतसमः कालः अभवत् ॥ ५२ ॥ ❀ ❀ भरतर्षभ वनानि नद्यः गिरयः वर्षाणि द्वीपसिंधवः सर्वे प्रजानां कामदुघा आसन् ॥ ५३ ॥ ❀ ❀ अधोक्षजे रामे राजनि आधिव्याधिजराग्लानिदुःखशोकभयक्लमाः न अनिच्छतां मृत्युः च न आसीत् ॥ ५४ ॥ ❀ ❀ एकपत्नीव्रतधरः राजर्षिचरितः शुचिः गृहमेधीयं स्वधर्मं शिक्षयन् स्वयम् आचरन् ॥ ५५ ॥ ❀ ❀ प्रश्रयावनता सती भावज्ञा सीता प्रेम्णा अनुवृत्त्या शीलेन धिया ह्रिया च भर्तुः मनः अहरत् ॥ ५६ ॥

इति नवमस्कन्धे दशमोऽध्यायः ॥ ७ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

गुरुर्वसिष्ठः। निर्मुच्य मोचयित्वा। आदिना तीर्थांतरांबुग्रहः ॥ ४९-५० ॥ ❀ ❀ भ्रात्रा भरतेन ॥ ५१ ॥ कृतसमः सत्ययुगतुल्यः ॥ ५२-५३ ॥ ❀ ❀ ग्लानिर्मालिन्यम्। क्लमः श्रमः ॥ ५४ ॥ ❀ ❀ राजर्षीणां मन्वादीनां चरितमिव चरितं यस्य स तथा ॥ ५५ ॥ ❀ ❀ अनुवृत्त्या शुश्रूषया। शीलेनानुकूलाचरणेन। प्रश्रयेण विनयेनावनता। नम्रा। धिया सद्बुध्या। ह्रियाऽसत्कृत्यलज्जया ॥ ५६ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे दशमोऽध्यायः ॥ १० ॥

अन्वितार्थप्रकाशिका

जटा इति। गुरुर्वसिष्ठः कुलवृद्धैः समं सह रामस्य जटा जटिलीभूतकेशान् निर्मुच्य नापितैः दूरीकृत्य चतुःसिन्धुजलादिभिर्विधिवद्राममभ्यषिञ्चत् राज्येभिषिक्तवान्। यथा पूर्वमृषयो देवेन्द्रं राज्येऽभ्यषिञ्चंस्तथैवेत्यर्थः। आदिशब्देन गङ्गायमुनादिजलग्रहणम् ॥ ४९ ॥ ❀ ❀ एवमिति। एवं कृतं शिरःस्नानं येन सः शोभने वाससी मालाधारी अन्यैश्च भूषणैर-

१. चतुर्भिः सागराम्बुभिः। २. नाधिर्व्याधिर्जराग्लानिर्दुःख०। ३. रामानुचरितं नाम।

लंकृतः तथा सुवासोभिः सुष्ठ्वलंकृतैश्च भ्रातृभिः अलंकृतया भार्यया सीतया च सह श्रीरामो बभौ अत्यशोभत ॥ ५० ॥ ❀ ❀ अग्रहीदित्यर्द्धम् । ततो भ्रात्रा भरतेन प्रणिपत्य प्रसादितः प्रार्थितः सन् राजाऽऽसनमग्रहीत् ॥ ५१ ॥ ❀ ❀ श्रीरामराज्यगुणान्वर्णयति—प्रजा इति । स्वधर्मनिरताः वर्णानामाश्रमाणां च ये गुणाः पञ्च महायज्ञादयस्तैरन्विताः स्वविषयवासिनीः प्रजा यथा पिता पुत्रान् पाति तथा रामो जुगोप ताश्च तं रामं पितरं मेनिरे ॥ ५२ ॥ ❀ ❀ त्रेतायामिति । धर्मज्ञे सर्वभूतसुखावहे रामे राजनि सति त्रेतायां वर्तमानायां त्रिपाद्धर्मयुक्ते त्रेतायुगे वर्तमानोऽपि चतुष्पाद्धर्मयुक्तकृतयुगसमः कालोऽभवत् ॥ ५३ ॥ ❀ ❀ वनानीति । हे भरतर्षभ ! रामे राजनि सति इत्यनुषज्यते । वनादयः सर्वे प्रजानां कामदुघाः मनोरथपूरका आसन् ॥ ५४ ॥ ❀ ❀ नैति । अधोक्षजे भगवति रामे राजनि सति प्रजानाम् आधिव्याध्यादयो न आसन् । अनिच्छतां मृत्युश्च नासीत् ॥ ५५ ॥ ❀ ❀ एकेति । एकपत्नीव्रतस्य धरः धारकः राजापि ऋषीणामिव चरित सत्यभाषणादि यस्य सः गृहमेधीयं गृहस्थैरनुष्ठेयं स्वधर्मं लोकान् शिक्षयन् शिक्षयितुम् । हेतौ शता । स्वयमाचरत् ॥ ५६ ॥ ❀ ❀ प्रेम्णेति । प्रश्रयेण विनयेनावनता नम्रा धिया सूक्ष्मबुद्ध्या भावज्ञा अभिप्रायज्ञा च सती सीता प्रेमादिभिर्भर्तुः श्रीरामस्य मनोऽहरत् वशीकृतवती । तत्र प्रेमा प्रीत्यतिशयः अनुवृत्तिः परिचर्या शीलं सुस्वभावो ह्रीर्लज्जा ॥ ५७ ॥

इति श्रीभागवते महापुराणे नवमस्कन्धेऽन्वितार्थप्रकाशिकायां दशमोऽध्यायः ॥ १० ॥

वीरराघवव्याख्या

ततो गुरुर्वसिष्ठः कुलवृद्धैः समं सह विधिवत् जटाः निर्मुच्य चतुस्सिन्धुजलादिभिः आदिशब्दाद्गङ्गायमुनाजलादिभिश्च श्रीरामम् इन्द्रमिवाभ्यषिञ्चत् ॥ ४९ ॥ ❀ ❀ एवं कृतं शिरःस्नानं येन शोभने वाससी यस्य सः सुष्ठु यथा तथा अलङ्कृतः श्रीरामः स्वलङ्कृतैः सुवासोभिः भ्रातृभिः भार्य्यया च तथाभूतया बभौ ॥ ५० ॥ ❀ ❀ ततो भ्रात्रा भरतेन प्रणिपत्य प्रसादितः प्रार्थितः सिंहासनमग्रहीत् तदा विषयवासिन्यः प्रजाः स्वधर्मनिरताः, तदेवाह वर्णानामाश्रमाणां च ये गुणधर्माः पञ्चमहायज्ञादयः तैरन्विताः बभूवुः पिता यथा पाति तद्वद्रामः प्रजाः जुगोप ताश्च तं रामं पितरं मेनिरे अमन्यत ॥ ५१ ॥ ❀ ❀ तदा त्रेतायां वर्त्तमानायां त्रिपाद्धर्मयुक्ते त्रेतायुगे प्रवर्त्तमानेऽपि चतुष्पाद्धर्मयुक्तकृतयुगतुल्यः कालो बभूव भूतानां सुखकरे श्रीरामे धर्मज्ञे राजनि सति ॥ ५२ ॥ ❀ ❀ तदा वनादयः सर्वे प्रजानां कामदुघाः काम्यमानफलादिप्रदाः आसन् तत्र वर्षाणि रम्यकादीनि द्वीपाः सिंहलादयः सिन्धवः समुद्राः हे भरतर्षभ ॥ ५३ ॥ तदा अधोक्षजे श्रीरामे राजनि सति तदा आध्यादयः अनिच्छतां मृत्युश्च नासन् तत्र आधिर्मनःपीडा व्याधिः शरीरजा दुःखमतीतपुत्रमरणस्मृत्यात्मकं प्रतिकूलं ज्ञानं शोकः वर्त्तमानेष्टवस्तुविश्लेषजः भयमागाम्यनिष्टदर्शनजं यद्यप्याधिनिषेधेनैवैतत्त्रयं निषिद्धं तथापि तत्प्रपञ्चार्थमिदं क्रमो ग्लानिः ॥ ५४ ॥ ❀ ❀ एकपत्नीव्रतधरः स्त्र्यन्तरपरिग्रहरहितः राजर्षेरिव चरितं यस्य सः शुचिः रागादिप्राकृतगुणरहितः गृहस्थस्य विहितान् स्ववर्णाश्रमानुकूलांश्च धर्मान् लोकस्य शिक्षयन् स्वयमाचरत् लोकसङ्ग्रहार्थमाचरदित्यर्थः ॥ ५५ ॥ ❀ ❀ प्रश्रयेण विनयेनावनता नम्रा भावज्ञा अभिप्रायज्ञा सती सीता प्रेमादिभिर्भर्तुः श्रीरामस्य मनो जहार तत्र प्रेम प्रीतिः अनुवृत्तिः परिचर्या शीलं सुस्वभावः सद्वृत्तिश्च भीर्भयं ह्रीर्लज्जा ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायां दशमोऽध्यायः ॥ १० ॥

विजयध्वजतीर्थकृता पदरत्नावली

गुरुर्वसिष्ठः ॥ ४९-५० ॥ ❀ ❀ सिंहोपपदमासनम् । ग्रहणे हेतुमाह, भ्रात्रेति, भ्रात्रा भरतेन ॥ ५१-५३ ॥ अनिच्छतां मरणमिति शेषः ॥ ५४-५५ ॥ ❀ ❀ अनुवृत्त्या शुश्रूषया शीलेनानुकूलस्वभावेन प्रश्रयेण विनयेन अवनता ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां दशमोऽध्यायः ॥ १० ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

ततश्च गुरुर्वसिष्ठः कुलवृद्धः समं सह रामस्य जटा निर्मुच्य चतुस्सिन्धुजलादिभिर्विधिवद्रामममभ्यषिञ्चत् राज्येऽभिषिक्तवानित्यन्वयः । तत्र दृष्टान्तमाह—यथेति । पूर्वमृषयो यथेन्द्रं राज्येऽभ्यषिञ्चंस्तथैवेत्यर्थः । आदिशब्देन गङ्गायमुनादिजलग्रहणम् ॥ ४९ ॥ ❀ ❀ एवं कृतं शिरस्नानं येन सः । शोभने वाससी यस्य सः स्रग्वी मालाधारी अन्यैश्च भूषणैरलङ्कृतः तथा सुवासोभिः सुष्ठ्वलङ्कृतैश्च भ्रातृभिः अलंकृतया भार्यया सीतया च सह श्रीरामो बभौ अत्यशोभत ॥ ५० ॥

ततो भ्रात्रा भरतेन प्रणिपत्य प्रसादितः प्रार्थितः सन् राजासनमग्रहीत् ॥ ५१ ॥ ❀ ❀ श्रीरामराज्यगुणान्वर्णयति—प्रजा इति । स्वधर्मनिरता इति स्वविषयवासिन्यः प्रजाः यथा पिता पुत्रान्पाति, तथा रामो जुगोप । ताश्च तं रामं पितरं मेनिरे । प्रजानां धर्मनिरतत्वमेव स्पष्टयति—वर्णानामाश्रमाणां च ये गुणाः पञ्चमहायज्ञादयस्तैरन्विता इति ॥ ५२ ॥ ❀ ❀ तदा रामे राजनि त्रेतायां वर्तमानायां त्रिपाद्धर्मयुक्ते त्रेतायुगे वर्तमानेऽपि चतुष्पाद्धर्मयुक्तकृतयुगसमः कालोऽभवत् । श्रीरामप्रवर्तित एव चतुष्पाद्धर्मः प्रवृत्त इत्याशयेन तं विशिनष्टि—धर्मज्ञ इति । कथं तेन धर्मः प्रवर्तित इत्यपेक्षायामाह—सर्वभूतसुखावह इति । दुःखितानामेव प्रायेणाधर्मप्रवृत्तिः भवति, रामेण तु सर्वसुखसम्पादनात् कस्याप्यधर्मे प्रवृत्तिर्नाभूत् इत्याशयः ॥ ५३ ॥ ❀ ❀ महत्कुलोत्पन्नत्वात्तत्रैव विश्वासो युक्त इत्याशयेन सम्बोधयति—भरतर्षभेति । अधोक्षजे अचिन्त्यभावे रामे राजनि सति वनादयः सर्वे प्रजानां कामदुघा मनोरथपूरका आसन्नित्यन्वयः । आधिर्मनोव्यथा व्याधिः शरीरजा ग्लानिः दैन्यं दुःखं प्रियविनाशजः सन्तापः शोकः अनुपपत्त्या निर्वाहोपायचिन्तनं भयमागाम्यनिष्टज्ञानात् व्याकुलता क्लमः श्रमः, प्रजानामाध्यादयो नासन् अनिच्छतां मृत्युश्च नासीत् ॥ ५४-५५ ॥ ❀ ❀ एकपत्नीव्रतधरः स्त्र्यन्तरपरिग्रहरहितः राजर्षीणां महतामेव चरितं यस्य सः शुचिः रागलोभादिदोषरहितोऽपि श्रीरामः गृहमेधीयं गृहस्थं प्रति विहितं स्वधर्मं लोकस्य शिक्षयन् स्वयमाचरन् अनुष्ठितवान् ॥ ५६ ॥ ❀ ❀ प्रश्रयेण विनयेन अवनता नम्रा धिया सूक्ष्मबुद्ध्या भावज्ञा अभिप्रायज्ञा च सती सीता प्रेमादिभिर्भर्तुः श्रीरामस्य मनोऽहरत् वशीकृतवतीत्यन्वयः । तत्र प्रेम प्रीत्यतिशयः, अनुवृत्तिः परिचर्या, शीलं सुखभावो, ह्रीर्लज्जा ॥ ५७ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता नवमे तत्र सूर्यवंशनिरूपणे । दशमो विवृतो रामप्रादुर्भावो निरूपितः ॥ ३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अग्रहीदिति । ततः, भ्रात्रा भरतेन, प्रणिपत्य, प्रसादितः प्रार्थितः सन्, आसनं सिंहासनं, अग्रहीत् । तदा प्रजाः, स्वविषयवासिन्यः स्वधर्मनिरताः सत्यः, वर्णाश्रमगुणान्विताः वर्णाश्रमाणां ये गुणाः पञ्चमहायज्ञादयो धर्मास्तैरन्विता इत्यर्थः । बभूवुः । रामः ताः पितृवत् पिता यथा पाति तद्वत् , जुगोप । ताश्च तं रामं, पितरं मेनिरे ॥ ४९ ॥ ❀ ❀ त्रेतायामिति । तदा त्रेतायां, वर्त्तमानायां त्रिपाद्धर्मयुक्ते त्रेतायुगे वर्त्तमाने सत्यपीत्यर्थः । धर्मज्ञे सर्वभूतसुखावहे, रामे, राजनि सति, कालः कृतसमः चतुष्पाद्धर्मयुक्तत्वात कृतयुगतुल्यः, अभवत बभूव ॥ ५० ॥ ❀ ❀ वनानीति । तदा, वनानि नद्यः, गिरयः, वर्षाणि रम्यकादीनि, द्वीपाः सिंहलादयश्च सिन्धवः समुद्राश्च ते सर्वेऽपि, हे भरतर्षभ प्रजानां कामदुघाः, आसन् ॥ ५१ ॥ नाधीति । तदा, अधोक्षजे रामे राजनि सति, आधिव्याधिजराग्लानिदुःखशोकभयक्लमाः, न आसन् । तत्राधिर्मनःपीडा, व्याधिः शरीरजा पीडा, जरा प्रसिद्धा, ग्लानिर्हर्षक्षयः, दुःखमतीतपुत्रमरणस्मृत्यात्मकं प्रतिकूलज्ञानं, शोको वर्त्तमानेष्टवस्तुविश्लेषजः, भयमागाम्यनिष्टदर्शनजं, क्लमः खेदः । अनिच्छतां, मृत्युश्च न आसीत् ॥ ५२ ॥ ❀ ❀ एकपत्नीति । एकपत्नीव्रतधरः स्त्र्यन्तरपरिग्रहरहितः, राजर्षेरिव चरितं यस्य सः, शुचिः रागादिप्राकृतगुणरहितः, गृहमेधीयं, स्वधर्मं, शिक्षयन् गृहस्थस्य विहितान् स्ववर्णाश्रमानुकूलान् धर्मान् लोकस्य शिक्षयन्नित्यर्थः । स्वयं, आचरत् ॥ ५३ ॥ ❀ ❀ प्रेम्णेति । प्रेम्णा, अनुवृत्त्या, शीलेन, प्रश्रयेण विनयेनावनता नम्रा, भावज्ञा, भिया ह्रिया च युता सती, सीता, भर्तुः, मनः, अहरत् । तत्र प्रेमा प्रीतिः, अनुवृत्तिः परिचर्या, शीलं सुखभावः सद्वृत्तिश्च, भीर्भयं, ह्रीर्लज्जा ॥ ५४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां नवमस्कन्धे दशमोऽध्यायः ॥ १० ॥

भाषानुवादः

इसके बाद वसिष्ठजीने दूसरे गुरुजनोंके साथ विधिपूर्वक भगवान्‌की जटा उतरवायी और बृहस्पतिजीने जैसे इन्द्रका अभिषेक किया था, वैसे ही चारों समुद्रोंके जल आदिसे उनका अभिषेक किया ॥ ४९ ॥ ❀ ❀ इस प्रकार सिरसे स्नान करके भगवान् श्रीरामने सुन्दर वस्त्र, पुष्पमालाएँ और अलङ्कार धारण किये । सभी भाइयों और श्रीजानकीजीने भी सुन्दर-सुन्दर वस्त्र और अलङ्कार धारण किये । उनके साथ भगवान् श्रीरामजी अत्यन्त शोभायमान हुए ॥ ५० ॥ ❀ ❀ भरतजीने उनके चरणोंमें गिरकर उन्हें प्रसन्न किया और उनके आग्रह करनेपर भगवान् श्रीरामने राजसिंहासन स्वीकार किया । इसके बाद वे अपने-अपने धर्ममें तत्पर तथा वर्णाश्रमके आचारको निभानेवाली प्रजाका पिताके समान पालन करने लगे ।

उनकी प्रजा भी उन्हें अपना पिता ही मानती थी ॥ ५१ ॥ ❀ ❀ परीक्षित् ! जब समस्त प्राणियोंको सुख देनेवाले परम धर्मज्ञ भगवान् श्रीराम राजा हुए तब था तो त्रेतायुग, परन्तु मालूम होता था मानो सत्ययुग ही है ॥ ५२ ॥ ❀ ❀ परीक्षित् ! उस समय वन, नदी, पर्वत, वर्ष, द्वीप और समुद्र—सब-के-सब प्रजाके लिये कामधेनुके समान समस्त कामनाओंको पूर्ण करनेवाले बन रहे थे ॥ ५३ ॥ ❀ ❀ इन्द्रियातीत भगवान् श्रीरामके राज्य करते समय किसीको मानसिक चिन्ता या शारीरिक रोग नहीं होते थे । बुढ़ापा, दुर्बलता, दुःख, शोक, भय और थकावट नाममात्रके लिये भी नहीं थे । यहाँतक कि जो मरना नहीं चाहते थे, उनकी मृत्यु भी नहीं होती थी ॥ ५४ ॥ ❀ ❀ भगवान् श्रीरामने एकपत्नीका व्रत धारण कर रक्खा था, उनके चरित्र अत्यन्त पवित्र एवं राजर्षियोंके-से थे । वे गृहस्थोचित स्वधर्मकी शिक्षा देनेके लिये स्वयं उस धर्मका आचरण करते थे ॥ ५५ ॥ ❀ ❀ सतीशिरोमणि सीताजी अपने पतिके हृदयका भाव जानती रहतीं । वे प्रेमसे, सेवासे, शीलसे, अत्यन्त विनयसे तथा अपनी बुद्धि और लज्जा आदि गुणोंसे अपने पति भगवान् श्रीरामजीका चित्त चुराती रहती थीं ॥ ५६ ॥

इति नवमस्कन्धे दशमोऽध्यायः ॥ ८ ॥

अथैकादशोऽध्यायः

श्रीशुक उवाच

भगवानात्मनाऽऽत्मानं राम उत्तमकल्पकैः। सर्वदेवमयं देवमीज आचार्यवान् मखैः ॥ १ ॥
होत्रेऽददाद् दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः। अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥ २ ॥
आचार्याय ददौ शेषां यावती भूस्तदन्तरा। मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ॥ ३ ॥
इत्ययं तदलङ्कारवासोभ्यामवशेषितः। तथा राज्ञ्यपि वैदेही सौमङ्गल्यावशेषिता ॥ ४ ॥
ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतम्। प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्घ्येदं बभाषिरे ॥ ५ ॥
अप्रत्तं नस्त्वया किं नु भगवन् भुवनेश्वर। यन्नोऽन्तर्हृदयं विश्य तमो हंसि स्वरोचिषा ॥ ६ ॥
नमो ब्रह्मण्यदेवाय रामायाकुण्ठमेधसे। उत्तमश्लोकधुर्याय न्यस्तदण्डार्पिताङ्घ्रये ॥ ७ ॥
कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः। चरन् वा चोऽशृणोद् रामो भार्यामुद्दिश्य कस्यचित् ॥ ८ ॥

कृष्णप्रिया व्याख्या

अन्वयः—भगवान् रामः आचार्यवान् आत्मना उत्तमकल्पकैः मखैः आत्मानं सर्वदेवमयं देवम् ईजे ॥ १ ॥ सः प्रभुः होत्रे प्राचीं दिशं ब्रह्मणे दक्षिणाम् अध्वर्यवे प्रतीचीं सामगाय च उदीचीम् अददात् ॥ २ ॥ ❀ ❀ इदं कृत्स्नं ब्राह्मणः अर्हति मन्यमानः निःस्पृहः तदन्तरा यावती भूः शेषाम् आचार्याय ददौ ॥ ३ ॥ ❀ ❀ इति अयं तत् अलंकार-वासोभ्याम् अवशेषितः तथा राज्ञो वैदेही अपि सौमंगल्यावशेषिता ॥ ४ ॥ ❀ ❀ ब्रह्मण्यदेवस्य संस्तुतं वात्सल्यं वीक्ष्य प्रीताः ते तु क्लिन्नधियः तस्मै प्रत्यर्घ्य इदं बभाषिरे ॥ ५ ॥ ❀ ❀ भुवनेश्वर भगवन् त्वया नः किं नु अप्रत्तं यत् नः अन्तर्हृदयं विश्य स्वरोचिषा तमः हंसि ॥ ६ ॥ ❀ ❀ ब्रह्मण्यदेवाय अकुण्ठमेधसे उत्तमश्लोकधुर्याय न्यस्तदंडार्पिताङ्घ्रये रामाय नमः ॥ ७ ॥ ❀ ❀ कदाचित् लोकजिज्ञासुः गूढः रात्र्याम् अलक्षितः चरन् रामः भार्याम् उद्दिश्य कस्यचित् वाचः अशृणोत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततश्चैकादशेऽयोध्यामावसन्नृजैः सह। यज्ञादि यच्चकारेशो रामस्तदनुवर्ण्यते ॥ १ ॥

तदंतरा तासां दिशां मध्ये यावती भूस्तां ब्राह्मण एवार्हतीति मन्यमानः ॥ १–३ ॥ ❀ ❀ अयं श्रीरामः। तत्तदा। सौमंगल्यमाभरणादिकं तावन्मात्रमवशेषितं तस्याः तद्व्यतिरिक्तं हिरण्यादि सर्वं ददावित्यर्थः ॥ ४–५ ॥ ❀ ❀ किमप्रत्तं किमदत्तं सर्वं दत्तमित्यर्थः। विश्य प्रविश्य ॥ ६ ॥ ❀ ❀ न्यस्तदंडैर्मुनिभिरर्पितौ चित्ते न्यस्तावंघ्री यस्य तस्मै तैर्ष्वर्पितावंघ्री येनेति वा ॥ ७–९ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् यज्ञादि (१)। उत्तमाः कल्पकाः सामग्र्यो येषु तैः। आचार्यवान् इत्यनेन गुरुकुलवासित्वं शिक्षितत्वं च सूचयति। "आचार्यवान्पुरुषो वेद" इति श्रुतेः ॥ १ ॥ ❀ ❀ स रामः ॥ २–३ ॥ ❀ ❀ सौमंगल्यं सुमंगलता-पादकम्। हारवलयादि। इत्यर्थ इति। स्वपरिहितालंकारवस्त्रादीनामुच्छिष्टत्वेन दातुमयोग्यत्वात्तदितरत्सर्वधनं ब्राह्मणेभ्यो ददाविति भावः ॥ ४ ॥ ❀ ❀ ननु "दत्त्वा दानं द्विजाभ्याय पुनर्गृह्णाति योऽधमः। स सर्वयातनां भुक्त्वा तैर्यक्त्वं याति

---

१. कल्पकः। २. मयो। ३. होत्रे तदादिशत्प्राचीं। ४' ब्राह्मादेवस्य। ५. वचो०।

चानिशम्।" इति स्मृतेः। श्रीरामेण कथं भूर्गृहीतेति चेन्न गां दत्त्वा विप्रेभ्यस्ततो जगृहे इति कथमेतदवगतमिति चेदेतच्छ्लोकव्याख्यानादित्याह—तथाहि। ब्रह्मणि ब्राह्मणे साधुर्ब्रह्मण्यः स चासौ देवश्चेति तस्य। ब्राह्मणदेवस्येति पाठः प्रचुरः स च स्पष्टार्थ एव। संस्तुतं चरितं समस्तभूदानलक्षणं वीक्ष्य प्रीताः। वत्साय लाति ददाति पयस्मामददाति स्नेहाद्वेति वत्सला सैव वात्सल्यं स्वार्थिकोण्यत्। धेनुरूपं द्रव्यं त्वं प्रत्यर्प्य अस्मभ्यं देहि भूप्रतिनिधित्वेनेदं वाक्यं बभाषिरे। 'अर्प—अतिसर्जने' दैवादिकः। "एकत्र पृथिवी सर्वा सशैलवनकानना। तस्या गौर्ज्यायसी प्रोक्ता" इति पराशरोक्तेः। यद्वा—विप्रैर्भगवतः स्वरूपज्ञानमादाय गुरुदक्षिणात्वेन पुनः स्वस्य तत्पालनेऽयोग्यतां च मत्वा ददे। यद्वा—प्रीतिदानं न दोषायेति वाल्मीकीयोत्तरकांडेऽगस्त्योक्तेः। 'प्रीताः प्रत्यर्पयामासुः' इति भावः॥ ५॥ ❀ ❀ भगवत्त्वं भुवनेश्वरत्वं च तवैव क्षत्रियत्वाद्योग्यमिति संबुद्धिद्वयतात्पर्यम्। यद्यतः। अंतश्चित्ते। स्वरोचिषा निजज्ञानप्रकाशेन। तमोऽज्ञानलक्षणम्। अतः सर्वं दत्तमिति भावः॥ ६॥ ❀ ❀ त्वमस्मभ्यमनश्वरं वनं दत्तवान्वयं तत्प्रतिकर्त्तुमसमर्थाः संतः केवलं नमनमेव कुर्म इत्याशयेनाहुः—नम इति। ननु न्यस्तदंडानां निष्कामत्वात्तदंघ्रिध्यानं किमर्थमित्याक्षेपनिवृत्त्या आह—तेषु न्यस्तदंडेषु। अर्पितौ समर्पितावंघ्री ज्ञानवैराग्यलक्षणे गती येनेति वा॥ ७॥ ❀ ❀ कस्यचित्पुंसः रजकस्येति जैमिनीये॥ ८॥

अन्वितार्थप्रकाशिका

एकादशे त्वयोध्यायां वसन् रामो मखादि यत्। चक्रे तदुच्यते तत्र श्लोकाः सार्द्धाः षडग्नयः (३६॥)॥

उवाचत्रयमर्द्धाढ्या नागरामा (३८॥) अनुष्टुभः॥ ११॥ भगवानिति। भगवान् रामः आचार्यवान् सन् उत्तमकल्पकैः उत्तमसाधनैः मखैरात्मना स्वयमेव सर्वदेवमयं देवमात्मानमेव ईजे यज्ञसाधनस्य यजनीयस्य च स्वभिन्नत्वाभावात्॥ १॥ ❀ ❀ होत्रे इति युग्मम्। इदं कृत्स्नं भूमण्डलं ब्राह्मणः प्रतिग्रहीतुमर्हतीति मन्यमानो निःस्पृहो रामः होत्रादिभ्यः प्राच्यादि दिशो ददौ। तदन्तरा तासां दिशामन्तरा मध्ये यावती भूरवशिष्टा तामाचार्याय ददौ॥ २-३॥ ❀ ❀ इतीति। इत्येवं दानेनायं श्रीरामस्तदा शरीरस्यालङ्कारवासोभ्यामेवावशेषितः तद्व्यतिरिक्तं सुवर्णादि सर्वं ददावित्यर्थः। तथा रामवत् राज्ञी सीताऽपि सौमङ्गल्यमात्रेण नासाभरणवस्त्राद्यावश्यकेनावशेषिता बभूव॥ ४॥ ❀ ❀ ते इति। ते होत्रादयो ब्राह्मणा एव देवा देववदाराध्या यस्य तस्य श्रीरामस्य सत्सु सदाचारनिष्ठेषु स्तुतं तद्वदान्यत्वयुक्तं संस्तुतमिति च पाठः। वात्सल्यं प्रीतिं वीक्ष्य प्रीताः प्रसन्नचित्ताः क्लिन्नधियः स्नेहार्द्रचित्तास्तस्मै रामाय प्रत्यर्प्य वयं भूमिपालनेऽसमर्थाः अतस्त्वमेव पालयेति विज्ञाप्येदं वक्ष्यमाणं बभाषिरे॥ ५॥ ❀ ❀ अप्रत्तमिति। हे भगवन्! हे भुवनेश्वर! त्वया नोऽस्मभ्यं किन्वप्रत्तं किं न दत्तमपि तु सर्वमेव दत्तमित्यर्थः। यस्मान्नोऽस्माकमन्तर्हृदयं विश्य प्रविश्य। ल्यब्लोपः। स्वरोचिषा स्वप्रकाशेन तमः अज्ञानं हंसि नाशयसि॥ ६॥ ❀ ❀ नम इति। ब्रह्मण्येषु देवाय श्रेष्ठाय अकुण्ठा मेधा ज्ञानं यस्य तस्मै। असिजाषः। उत्तमः श्लोको यशो येषां तेषां धुर्याय मुख्याय न्यस्तदण्डैः भूतद्रोहरहितैः सर्वभूतसुहृद्भिरर्पितौ चित्ते निहितावङ्घ्री यस्य तस्मै तेष्वर्पितावङ्घ्री येनेति वा श्रीरामाय नमः॥ ७॥ ❀ ❀ कदाचिदिति। कदाचिल्लोकजिज्ञासुर्लोकः किं वदतीति ज्ञातुमिच्छुः अत एव गूढः प्रच्छन्नवेषः अत एवेतरैरलक्षितः राज्यां तत्र पुर्यां चरन् कस्यचित्पुरुषस्य स्वभार्यामुद्दिश्योच्यमाना वाचोऽशृणोत्॥ ८॥

वीरराघवव्याख्या

अथ भगवान् श्रीरामः उक्तमैर्वसिष्ठादिभिः कल्पितैः कारितैः मखैः क्रतुभिः सर्वदेवमयं स्वमात्मानमेवात्मनैवाचार्यवान् सन् ईजे इयाज॥ १॥ ❀ ❀ होत्र इति। तत्र होत्रे प्राचीं दिशं दक्षिणामदात् ब्रह्मणे तु दक्षिणां दिशम् अध्वर्यवे प्रतीचीं सामगायिने उद्गात्रे तूदीचीमदिशत्॥ २॥ ❀ ❀ तदन्तरं तासां दिशामन्तरा मध्ये यावती भूमिरवशिष्टा तां सर्वामाचार्याय ददौ, कथम्भूतः? इदं कृत्स्नं भूमण्डलं ब्राह्मणोऽर्हति प्रतिग्रहीतुमिति शेषः। इतीत्थं मन्यमानः निस्पृहश्चेति तथा समीचीनानलङ्कारांश्चादात् एवं सर्वं दत्त्वा केवलं वासोभ्यां परिधानीयोत्तरीयाभ्यामवशेषितः, तथा राज्ञी वैदेही सीतापि भर्तुरभिप्रायज्ञा सर्वानलङ्कारान् प्रदाय केवलं सौमङ्गल्यमात्रेणावशेषिता बभूव॥ ३-४॥ ते होत्रादयो ब्राह्मणा ब्राह्मणा एव दैवतं यस्य तस्य श्रीरामस्य सत्सु तद्वदान्यत्वयुक्तं वात्सल्यमवलोक्य प्रीताः क्लिन्नधियः आर्द्रचित्तास्सन्तः तस्मै रामाय प्रत्यर्च्य प्राच्यादिदिश इति शेषः। दिशः प्रतिग्रहितुं वयं नार्हा इति विज्ञाप्येत्यर्थः। ननु प्रतिगृह्य प्रत्यर्प्येत्यर्थः। दत्तद्रव्यप्रत्यादानदोषापादनात् एवञ्च दिशद्दाविति देरपि प्रतिग्रहितुं होत्रादीन् प्रार्थितवानित्यर्थः। इदं वक्ष्यमाणं बभाषिरे। हे भगवन् त्वया नोऽस्मभ्यमप्रत्तमप्रदत्तं किन्तु सर्वमपि प्रदातुमुद्युक्तोसीत्यर्थः। तत्र हेतुं वदन्तो विशिंशन्ति परमेश्वरः परो मा यस्मात्स परमश्चासावीश्वरश्च स्वत एवाऽवाप्तसमस्तकामस्य तव किमेतैरितिभावः। किञ्च निरति-

शयपुरुषार्थरूपमोक्षप्रदानाय तत्साधनसम्यज्ज्ञानविरोध्यज्ञानमस्माकमन्तर्हृदये प्रविश्य हंसि निरस्यसि, केन ? स्वरोचिषा स्वप्रकाशेन तस्यैवम्भूतस्य आत्मपर्यन्तवदान्यस्य कियदेतत्प्राच्यादिदिक्प्रदानमिति भावः ॥ ५-६ ॥ ❀ ❀ त्वद्गुणान्वर्णयितुं न शक्नुम इत्यभिप्रायेण कैश्चिद्गुणैर्विशिष्टन्तो नमस्कुर्वन्ति—नम इति । ब्रह्मणि ब्रह्मकुले साधुर्ब्रह्मण्यः "तत्र साधुः" इति यत्प्रत्यये "येचाभावकर्मणोः" इति प्रकृतिभावः स चासौ देवः स्वतेजसा दीप्यमानः ब्रह्मण्यानां देवः श्रेष्ठो वा अकुण्ठमेधसे नित्यासङ्कुचितापरिच्छिन्नज्ञानाय उत्तमश्लोकानां धुर्य्योऽग्र्यः मुख्यः न्यस्तदण्डैर्भूतद्रोहरहितैः सर्वभूतसुहृद्भिर्मुनिभिरर्पितो चित्ते निहितावङ्घ्री यस्य न्यस्तदण्डेष्वर्पितावङ्घ्री येनेति वा तस्मै श्रीरामाय तुभ्यं नमः इति ॥ ७ ॥ ❀ ❀ एवं सीतया सह दशवर्षसहस्राणि राज्यमुपास्य श्रीरामः कदाचिल्लोकजिज्ञासुः किंवदन्तीं ज्ञातुमिच्छुः गूढः प्रच्छन्नवेष इतरैरलक्षितो राज्यां तत्र तत्र पुर्य्यां चरन् कस्यचित्पुरुषस्य वचो भार्य्यामुद्दिश्योच्यमानमशृणोत् ॥ ८ ॥

विजयध्वजतीर्थकृता पदरत्नावली

आचार्यवानित्यनेन गुरुकुलवासित्वं शिक्षितत्त्वं च सूचयति, "आचार्यवान् पुरुषो वेद" इति श्रुतेः ॥ १-३ ॥ सोमङ्गल्यं मङ्गलसूत्रमेवावशेषितं यस्याः सा तथा ॥ ४ ॥ ❀ ❀ ब्राह्मणा देवाः पूज्या इति भावो यस्य स तथा तस्य वात्सल्यं स्नेहपारवश्यं भक्तिक्लिन्नधियः द्रवचिताः प्रत्यर्प्य दत्तं पुनर्दत्वा ॥ ५ ॥ ❀ ❀ ननु, दत्तं नालमिति मत्वा प्रत्यर्पितम् ? इतोधिकं प्रियमस्माद्योग्यमेव दत्तमतोन्यन्नापेक्षितमिति मत्वा वा ? न प्रथमः, यदृच्छालाभसन्तुष्टिमतामस्माकम् अनलम्बुद्धिदोषो नास्ति यतोऽतोद्वितीय एवाभिमत इत्याशयेनाह—अप्रत्तमिति । हे भगवन् ! त्वम् अस्मद्भक्त्यान्तर्हृदि संविश्य यथा निद्रा सुखसाधनं तथा स्थित्वा स्वरोचिषा ज्ञानलक्षणप्रकाशेनाज्ञानलक्षणं तमो हंसि नाशयसि यतोऽतस्त्वया नोऽप्रत्तमदत्तं किं नु न किमपि इत्यतोऽधिकं भूदानादिकं न भवति ज्ञानधनस्यानश्वरत्वादहार्यत्वाच्च भूपालत्वात्तत्कर्म तवैव योग्यं तस्मिन्कर्मण्यनधिकारिणो वयं तस्मादयोग्यत्वात्प्रत्यर्पणेन स्वीकारेणापहारदोषपङ्कलेपो नास्ति भवत इति स्वीकृत्य तद्रक्षणं कर्तव्यमधिकृतत्वादिति भावः ॥ ६ ॥ ❀ ❀ त्वमस्मभ्यमनश्वरं धनं दत्तवान् वयं तत्प्रतिकर्तुं न शक्नुमः किन्तु तुभ्यं नमनलक्षणं धनं दास्याम इत्येतावदेवेत्याशयेनाह—नम इति । न्यस्ततत्त्वाय स्वकेषु निक्षिप्तस्वरूपाय अर्पिताङ्घ्रये स्वकेष्विति शेषः । न्यस्तदण्डार्पिताङ्घ्रये इति पाठे न्यस्तमनोवाक्कायदण्डाः संन्यासिनः तेष्वर्पितोङ्घ्रिर्ज्ञानलक्षणा गतिर्येन स तथा "अघि लघि गत्यर्थौ" इति धातुः उत्तमश्लोकस्य हरेः धुरं वहतीति उत्तमश्लोकधुर्यस्तस्मै ॥ ७ ॥ ❀ ❀ कस्यचित्पुंसो वचः ॥ ८-९ ॥

जीवगोस्वामिकृतः क्रमसन्दर्भः

भगवानात्मनात्मानमबीज इति लोकसंग्रहार्थमित्यर्थः ॥ १-७ ॥ ❀ ❀ अथ वैराग्यलीलाव्यञ्जकं मर्त्यलोकपरित्यागलीलारम्भं कर्तुं लक्ष्यमाह—कदाचिदिति । कस्यचिदिति कस्यचित् कुतश्चिदकस्मादागतस्य तत्र वसतोऽसरलसत्त्वस्य ॥ ८-९ ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मखांश्चकार तत्याज सीतां सा विवरं गता । भ्रातॄन् दिग्विजयेऽयुङ्क्त राम एकादशे प्रभुः ॥

आत्मनात्मानमिति यज्ञसाधनस्य यजनीयस्य च स्वभिन्नत्वाभावात् ॥ १-२ ॥ ❀ ❀ तदन्तरा तासान्दिशां मध्ये यावती भूस्तां शेषभूतां ब्राह्मणजातिमेव यदानपात्रीकरोति तत्र हेतुः इदं कृत्स्नमेव भूतलं ब्राह्मण एवार्हति यतो निस्पृह इति मन्यमानः ॥ ३ ॥ ❀ ❀ तदलङ्कारेपि देहस्थालङ्कारवस्त्रव्यतिरिक्तानामन्येषामलङ्कारादीनामपि दत्तत्वात् सीता तु देहादप्युत्तार्य्यालङ्कारादिकं ददावित्याह—सौमङ्गल्यं नासाभरणचूडादिमात्रमवशेषितं यस्याः सा ॥ ४-५ ॥ ❀ ❀ किम् अप्रत्तम् अपितु सर्वमेव प्रदत्तं यद्यस्माद्विश्य प्रविश्य अतोऽनेन पृथ्वीराज्येनालमिति भावः ॥ ६ ॥ ❀ ❀ न्यस्तदण्डेभ्यो निर्वैरभक्तेभ्योऽर्पितावङ्घ्री येन तस्मै ॥ ७-९ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

यज्ञानुष्ठानादिरामचरितं वर्णयति—भगवानित्येकादशेन । उत्तमानि कल्पकानि उपकरणानि येषु तैः ॥ १-२ ॥ शेषामवशिष्टां तदन्तरा तासां मध्ये यावती भूस्तां ब्राह्मण एवार्हतीति मन्यमानैः आचार्याय ददौ ॥ ३ ॥ ❀ ❀ इत्येवं अयं श्रीरामः तत्तदा अलङ्कारवासोभ्यामवशेषितः तथा वैदेही अपि सौमङ्गल्येन आभरणादिकेन अवशेषिता ॥ ४ ॥

संस्तुतं श्लाघनीयं वात्सल्यं विप्रवत्सलत्वम् ॥ ५ ॥ ❀ ❀ नोऽन्तर्हृदयं विश्य प्रविश्य तमोऽज्ञानं हंसि एवम्भूतेन त्वया नोऽस्मभ्यमप्रत्तमदत्तं किं न किमपीत्यर्थः ॥ ६ ॥ ❀ ❀ न्यस्ताः वाग्देहचेतःसुप्रयोजिताः मौनानीहातिलापारूपाः दण्डा यैस्तैः अर्पितौ चित्ते संस्थापितौ अङ्घ्री यस्य तस्मै नमः ॥ ७-९ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

अयोध्यामावसन्रामो भ्रातृभिर्भरतादिभिः । यज्ञादि कृतवान् यत्तदेकादशे निरूप्यते ॥ १ ॥

तस्य धर्माचरणमेव दर्शयति—भगवानित्यादिना । राम आचार्यवान् सन् उत्तमकल्पकैः उत्तमसाधनैः मखैरात्मना स्वयमेव आत्मानमेव ईजे पूजितवानित्यन्वयः । ननु मखैर्देवा एवेज्यन्ते तैः कथमात्मयजनमित्याशङ्क्याह—सर्वदेवमयमिति, देवानां तदङ्गत्वादित्यर्थः । तत्र हेतुः—भगवानिति । भगवतः कथं मनुष्येषु जन्म तत्राह—देवमिति । मनुष्यक्रीडारतमित्यर्थः ॥ १ ॥ ❀ ❀ तदत्तां दक्षिणामाह—होत्र इति त्रयेण ॥ २ ॥ ❀ ❀ तदन्तरा तासां दिशामन्तरा मध्ये यावती भूरवशिष्टा तामाचार्याय ददौ । एवं सर्वस्वदाने तदभिप्रायमाह—इदं कृत्स्नं भूमण्डलं ब्राह्मणः प्रतिग्रहीतुमर्हतीति मन्यमान इति । एवमभिप्रायेऽपि हेतुमाह—निस्स्पृह इति । परमानन्दस्वरूपलाभेनैव विषयभोगेषु निस्स्पृह इत्यर्थः ॥ ३ ॥ इत्येवं दानेनायं श्रीरामस्तदा शरीरस्यालङ्कारवासोभ्यामेव अवशेषितः तद्व्यतिरिक्तं सर्वं ददावित्यर्थः । तथा रामवत् राज्ञी सीताऽपि देहादप्यलङ्कारानुत्तार्य प्रदाय केवलं सौमङ्गल्यमात्रेण नासाभरणवस्त्राद्यावश्यकेनावशेषिता बभूव ॥ ४ ॥ ❀ ❀ ते होत्रादयो ब्राह्मणा एव देववदाराध्या यस्य तस्य श्रीरामस्य सत्सु सदाचारनिष्ठेषु तद्वदान्यत्वयुक्तं वात्सल्यं प्रीतिं वीक्ष्य प्रीताः प्रसन्नचित्ताः क्लिन्नधियः स्नेहार्द्रचित्तास्तस्मै रामाय प्रत्यर्प्य समर्प्य वयं भूमिपालनेऽसमर्थाः अतस्त्वमेव पालयेति विज्ञाप्येदं वक्ष्यमाणं बभाषिरे ॥ ५ ॥ ❀ ❀ तद्भाषणमेव दर्शयति—अप्रत्तमिति । सर्वदाने सामर्थ्यं सूचयन्तः सम्बोधयन्ति—परमेश्वरेति । तदुपपादयन्तः सम्बोधयन्ति—भगवन्निति । त्वया नोऽस्मभ्यं किं नु अप्रत्तं किं न दत्तम् ? अपितु सर्वमेव दत्तमित्यर्थः । तत्र हेतुमाहुः—यदिति । यस्मान्नोऽस्माकमन्तर्हृदयं प्रविश्य स्वरोचिषा स्वप्रकाशेन तमः संसारदुःखहेतुं परपुरुषार्थमोक्षप्रतिबन्धकमज्ञानं हंसि नाशयसि ॥ ६ ॥ ❀ ❀ एवमुक्त्वा तस्मै परमोपकारिणे प्रत्युपकारेऽसामर्थ्यमालक्ष्य नमस्कुर्वन्ति—नम इति । ब्रह्मणि ब्रह्मकुले साधवो ब्रह्मण्यास्तेषु देवः स्वतेजसा दीप्यमानः श्रेष्ठ इति ब्रह्मण्यदेवस्तस्मै, अकुण्ठा देशकालवस्त्वपरिच्छिन्ना मेधा ज्ञानं यस्य तस्मै, उत्तमः श्लोको यशो येषां धुर्याय मुख्याय, न्यस्तदण्डैः भूतद्रोहरहितैः सर्वभूतसुहृद्भिरर्पितौ चित्ते निहितावङ्घ्री यस्य तस्मै श्रीरामाय नमः ॥ ७ ॥ ❀ ❀ कदाचिल्लोकजिज्ञासुर्लोकः किं वदतीति ज्ञातुमिच्छुः अत एव गूढः प्रच्छन्नवेषः अत एवेतरैरलक्षितः राज्यां तत्र पुर्यां चरन् कस्यचित्पुरुषस्य स्वभार्यामुद्दिश्य उच्यमाना वाचोऽशृणोत् ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एकादशे वसन् रामोऽयोध्यायां स्वानुजैः सह । सर्वेश्वरश्चकाराथ यज्ञादि तद्धि वर्ण्यते ॥ १ ॥

भगवानिति । भगवान् श्रीरामः, उत्तमैर्वसिष्ठादिभिः कल्पिताः कारितास्तैः, मखैः क्रतुभिः, सर्वदेवमयं देवं देवरूपं, आत्मानं, आत्मना, आचार्यवान् सन्, ईजे इयाज ॥ १ ॥ ❀ ❀ होत्रे इति । तदा, स रामः, होत्रे, प्राचीं दिशं, आदिशदातुमुद्युक्तोऽभवत् । ब्रह्मणे, दक्षिणां दिशं, आदिशत् । अध्वर्यवे, प्रतीचीं दिशं, आदिशत् । सामगाय उद्गात्रे तु, उदीचीं दिशं, आदिशत् ॥ २ ॥ ❀ ❀ आचार्यायेति । तदन्तरा तासां दिशां मध्ये, यावती भूरस्ति, तां शेषां निःशेषामपि, यद्वा । शेषां होत्रादिभ्यः प्रदानादवशिष्टां तां, इदं, कृत्स्नं, ब्राह्मणः एव अर्हति इति, मन्यमानः, निःस्पृहः सन्, यद्वा । निःस्पृह इति ब्राह्मणविशेषणं, आचार्याय, ददौ ॥ ३ ॥ ❀ ❀ इतीति । इत्येवं, अयं श्रीरामः, तत् सर्वं, दत्त्वेति शेषः । अलंकारवासोभ्यामेव, अवशेषितः, बभूव । तथा राज्ञी वैदेही सीता अपि, सौमङ्गल्यमाभरणादिकं तावन्मात्रमवशेषितं यस्याः तथाभूता, बभूव ॥ ४ ॥ ❀ ❀ ते इति । ते होत्रादयो ब्राह्मणाः तु, ब्राह्मणा देवा इव यस्य तस्य, यस्य ब्राह्मणा देववत् पूजनीयाः सन्ति, तथाभूतस्येत्यर्थः । पाठान्तरे ब्रह्मणि साधवो ब्रह्मण्या ब्राह्मणपरिपालकास्तेषां देवो देववत् सेव्यस्तस्य श्रीरामस्य, सत्सु सज्जनेषु, तत् वात्सल्यं, वीक्ष्य, प्रीताः प्रसन्नतां प्राप्ताः, क्लिन्नधिय आर्द्रचित्ताः सन्तः, तस्मै श्रीरामाय, प्रत्यर्प्य, प्राच्यादिदिश इति शेषः । दिशः प्रतिग्रहीतुं वयं नार्हा इति विज्ञाप्येत्यर्थः । न तु प्रतिगृह्य प्रत्यर्प्येत्यर्थः कार्यः । दत्तद्रव्यादानदोषापातात् । एवं च आदिशत् ददावित्यादेः प्रतिग्रहीतुं होत्रादीन् प्रार्थितवानित्यर्थो विधेयः । इदं वक्ष्यमाणं, बभाषिरे ॥ ५ ॥ अप्रत्तमिति । हे भगवन्, हे भुवनेश्वर, त्वया, नोऽस्मभ्यं, अप्रत्तमदत्तं, किम् । किं तु सर्वं दत्तमेव । सर्वमपि प्रदातुमुद्युक्तोऽसीत्यर्थः । यद्यस्मात्, नोऽस्माकं, अन्तर्हृदयं हृदयस्य मध्ये, विश्य प्रविश्य, स्वरोचिषा तमः, हंसि । आत्मपर्यन्तवदान्यस्य त

कियदेतत् प्राच्यादिदिक्प्रदानमिति भावः ॥ ६ ॥ ❀ ❀ त्वद्गुणान् वर्णयितुं न शक्नुम इत्यभिप्रायेण कैश्चिद्गुणैर्विशिंषन्तो नमस्कुर्वन्ति । नम इति । ब्रह्मणि ब्रह्मकुले साधुर्ब्रह्मण्यः, 'तत्र साधुः' इति यत्प्रत्ययः । स चासौ देवश्च तस्मै, अकुण्ठा मेधा यस्य तस्मै, नित्यासंकुचितापरिच्छिन्नज्ञानायेत्यर्थः । उत्तमश्लोकस्य उत्तमकीर्त्तेः श्रीहरेर्या धूस्तां वहतीत्युत्तमश्लोकधुर्यस्तस्मै, उत्तमश्लोकानां पुण्यकीर्त्तीनां धुर्या मुख्यस्तस्मै इति वा । न्यस्तदण्डैर्भूतद्रोहरहितैः सर्वभूतसुहृद्भिर्मुनिभिरिति यावत् । अर्पितौ स्वचित्ते निहितौ अङ्घ्री यस्य न्यस्तदण्डेष्वर्पितावङ्घ्री येनेति वा तस्मै, रामाय, तुभ्यं नमः ॥ ७ ॥ ❀ ❀ कदाचिदिति । एवं सीतया सह दशवर्षसहस्राणां राज्यमुपासित्वा इति शेषः । श्रीरामः, कदाचित् लोकजिज्ञासुः, किंवदन्तीं ज्ञातुमिच्छुः, गूढः प्रच्छन्नवेषः, अत एव अलक्षितः, राज्यां, चरन् पुर्यां तत्र तत्र विचरन्नित्यर्थः । भार्याम् उद्दिश्य, उच्यमानमिति शेषः । कस्यचित् पुरुषस्य, वचः अशृणोत्, वाच इत्यपि पाठः ॥ ८ ॥

भाषानुवाद:

भगवान् श्रीरामकी शेष लीलाओंका वर्णन

श्रीशुकदेवजी कहते हैं—परीक्षित् ! भगवान् श्रीरामने गुरु वसिष्ठजीको अपना आचार्य बनाकर उत्तम सामग्रियोंसे युक्त यज्ञोंके द्वारा अपने-आप ही अपने सर्वदेवस्वरूप स्वयंप्रकाश आत्माका यजन किया ॥ १ ॥ ❀ ❀ उन्होंने होताको पूर्व दिशा, ब्रह्माको दक्षिण, अध्वर्युको पश्चिम और उद्गाताको उत्तर दिशा दे दी ॥ २ ॥ ❀ ❀ उनके बीचमें जितनी भूमि बच रही थी, वह उन्होंने आचार्यको दे दी उनका यह निश्चय था कि सम्पूर्ण भूमण्डलका एकमात्र अधिकारी निःस्पृह ब्राह्मण ही है ॥ ३ ॥ ❀ ❀ इस प्रकार सारे भूमण्डलका दान करके उन्होंने अपने शरीरके वस्त्र और अलङ्कार ही अपने पास रक्खे । इसी प्रकार महारानी सीताजीके पास भी केवल माङ्गलिक वस्त्र और आभूषण ही बच रहे ॥ ४ ॥ ❀ ❀ जब आचार्य आदि ब्राह्मणोंने देखा कि भगवान् श्रीराम तो ब्राह्मणोंको ही अपना इष्टदेव मानते हैं उनके हृदयमें ब्राह्मणोंके प्रति अनन्त स्नेह है, तब उनका हृदय प्रेमसे द्रवित हो गया । उन्होंने प्रसन्न होकर सारी पृथ्वी भगवान्को लौटा दी और कहा ॥ ५ ॥ ❀ ❀ 'प्रभो ! आप सब लोकोंके मात्र स्वामी हैं । आप तो हमारे हृदयके भीतर रहकर अपनी ज्योतिसे अज्ञानान्धकारका नाश कर रहे हैं । ऐसी स्थितिमें भला, आपने हमें क्या नहीं दे रक्खा है ॥ ६ ॥ आपका ज्ञान अनन्त है पवित्र कीर्तिवाले पुरुषोंमें आप सर्वश्रेष्ठ हैं । उन महात्माओंको, जो किसीको किसी प्रकारकी पीड़ा नहीं पहुँचाते, आपने अपने चरणकमल दे रक्खे हैं । ऐसा होनेपर भी आप ब्राह्मणोंको अपना इष्टदेव मानते हैं । भगवन् ! आपके इस रामरूपको हम नमस्कार करते हैं' ॥ ७ ॥ ❀ ❀ परीक्षित् एक बार अपनी प्रजाकी स्थिति जाननेके लिये भगवान् श्रीरामजी रातके समय छिपकर बिना किसीको बतलाये घूम रहे थे । उस समय उन्होंने किसीका यह बात सुनी । वह अपनी पत्नीसे कह रहा था ॥ ८ ॥

नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् । स्त्रैलोभी[1] बिभृयात् सीतां रामो नाहं भजे पुनः ॥ ९ ॥
इति लोकाद् बहुमुखाद् दुराराध्यादसंविदः । पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम् ॥ १० ॥
अन्तर्वत्न्यागते काले यमौ सा सुषुवे सुतौ । कुशो लव इति ख्यातौ तयोश्चक्रे क्रियां मुनिः ॥ ११ ॥
अङ्गदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ । तक्षः पुष्कल इत्यास्तां भरतस्य महीपते ॥ १२ ॥
सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः । गन्धर्वान् कोटिशो जघ्ने भरतो विजये दिशाम् ॥ १३ ॥
तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ।
शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् । हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥ १४ ॥
मुनौ निक्षिप्य तनयौ सीता भर्त्रा[2] विवासिता । ध्यायन्ती रामचरणौ विवरं प्रविवेश ह ॥ १५ ॥
तच्छ्रुत्वा भगवान् रामो रुन्धन्नपि धिया शुचः । स्मरंस्तस्या गुणांस्तांस्तान्नाशक्नोद् रोद्धुमीश्वरः ॥ १६ ॥

---

१. स्त्रैणो हि बि० । २. दश्चन्द्रके० । ३. भर्तृविवा० ।

कृष्णप्रिया व्याख्या

अन्वयः—अहं दुष्टाम् असतीं परवेश्मगां त्वां न बिभर्मि स्त्रीलोभी रामः सीतां बिभृयात् अहं पुनः न भजे ॥ ९ ॥ इति बहुमुखात् दुराराध्यात् असंविदः लोकान् भीतेन पत्या त्यक्ता सा प्राचेतसाश्रमं प्राप्ता ॥ १० ॥ ❀ ❀ अन्तर्वत्नी सा काले आगते कुशः लवः इति ख्यातौ यमौ सुतौ सुषुवे मुनिः तयोः क्रियां चक्रे ॥ ११ ॥ ❀ ❀ महीपते लक्ष्मणस्य अंगदः चित्रकेतुः च आत्मजौ स्मृतौ तक्षः पुष्कलः इति भरतस्य पुत्रौ आस्ताम् ॥ १२ ॥ ❀ ❀ सुबाहुः श्रुतसेनः च शत्रुघ्नस्य पुत्रौ बभूवतुः भरतः दिशां विजये कोटिशः गंधर्वान् जघ्ने ॥ १३ ॥ ❀ ❀ तदायं सर्वं धनम् आनीय राज्ञे न्यवेदयत् च शत्रुघ्नः मधोः पुत्रं लवणं नाम राक्षसं हत्वा मधुवने मथुरां नाम पुरीं चक्रे वै ॥ १४ ॥ ❀ ❀ भर्त्रा विवासिता सीता तनयौ मुनौ निक्षिप्य रामचरणौ ध्यायन्ती विवरं प्रविवेश ॥ १५ ॥ ❀ ❀ तत् श्रुत्वा भगवान् ईश्वरः रामः धिया शुचः रुधन् अपि तस्याः तान् तान् गुणान् स्मरन् रोद्धुं न अशक्नोत् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

असंविदोऽज्ञात्। प्राचेतसो वाल्मीकिस्तस्याश्रमं प्राप्ता ॥ १० ॥ ❀ ❀ अंतर्वत्नी गर्भिणी। क्रिया जातकर्माद्याः ॥ ११–१५ ॥ ❀ ❀ ईश्वरोऽपि शुचो रोद्धुं नाशक्नोत् ॥ १६ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

असतीमसाध्वीं तदेवाह—परवेश्मगामिति "नित्यं स्वं वेश्म संत्यज्य परगेहं प्रयाति या। सा नारी सर्वथा त्याज्या प्रत्यब्दं पुत्रसूरपि"। इत्यादिपुराणात् ॥ ९ ॥ ❀ ❀ दुराराध्यात् 'कः सर्वमाराधयितुं समर्थः' इत्युक्तेः। पत्या श्रीरामेण भीतेन लोकापवादादिति शेषः। 'मृत्युश्च को वाऽपयशः स्वकीयम्' इति शुकोक्तेः। स्वयं स्वापवादश्रवणं जीवन्मृतत्वापादकं तन्निवृत्तये सा सीता त्यक्तेति ॥ १० ॥ ❀ ❀ कुशलवनाम्नोरन्वर्थता च वाल्मीकीयोत्तरकांडे "कुशमुष्टिमुपादाय लवं चैव तु स द्विजः। वाल्मीकिः प्रददौ ताभ्यां रक्षां भूतविनाशिनीम। कुशानामग्रभागस्तु कुशमुष्टिरिहोच्यते। अधोभागः कुशानां तु लवः प्रोक्तो मनीषिभिः। कुशमुष्ट्या मार्जितो यः स कुशः प्रोक्त आख्यया। लवेन मार्जितो यो वै स लवः परिकीर्त्तितः"। इति। तयोः कुशलवयोः ॥ ११–१३ ॥ ❀ ❀ तदीयं गंधर्वीयम्। राज्ञे श्रीरामाय ॥ १४ ॥ ❀ ❀ विवासिता त्यक्ता। विवरं भूबिलम् ॥ १५ ॥ ❀ तत् सीताया बिलप्रवेशनम्। वाल्मीकीये तु रामसंमुखमेव नागानीतविमानमारुह्य पृथ्व्या गृहीता पातालं जगामेति तत्कल्पांतराभिप्रायम्। शुचोऽश्रूणि। तस्याः सीतायाः। तांस्तान् सौशील्यप्रश्रयादीन् ॥ १६ ॥

अन्वितार्थप्रकाशिका

नेति। अहं दुष्टाम् असतीं व्यभिचारिणीं परपुरुषवेश्मगतां त्वां न बिभर्मि न धारयामि न च पुष्णामि। स्त्रीलोभी कामपारवश्याद्रामः परवेश्मगामपि सीतां बिभृयात्। अहं तु पुनः स्त्रीपारवश्यरहितस्त्वां न भजे नाङ्गीकुर्यामित्यर्थः ॥ ९ ॥ इतीति। इत्येवं बहुमुखात् नानाविधवादिनः तथापि दुराराध्यात् प्रबोधयितुमशक्यात् असंविदः अतत्त्वज्ञात् लोकात् जनाङ्गीतेन पत्या श्रीरामेण त्यक्ता सीता प्राचेतसस्य वाल्मीकेराश्रमं प्राप्ता ॥ १० ॥ ❀ ❀ अन्तरिति। अन्तर्वत्नी गर्भिणी प्रसवकाले आगते सति यमौ सहजौ द्वौ कुशो लव इति ख्यातौ लोकप्रसिद्धौ सुतौ सुषुवे। तयोः सुतयोः क्रिया जातकर्मादिरूपाः मुनिर्वाल्मीकिश्चक्रे ॥ ११ ॥ ❀ ❀ अङ्गद इति साद्धेम। स्पष्टम् ॥ १२ ॥ ❀ ❀ गन्धर्वानिति। दिशां विजये भरतः कोटिशो गन्धर्वान् जघ्ने। तज्जार्षः। तदीयं धनमानीय सर्वं राज्ञे श्रीरामाय न्यवेदयत् ॥ १३ ॥ ❀ ❀ शत्रुघ्न इति। शत्रुघ्नो मधोरसुरस्य पुत्रं लवणं नाम राक्षसं हत्वा तस्मिन् मधुवने मथुरां नाम प्रसिद्धां पुरीं निर्ममे ॥ १४ ॥ ❀ ❀ भर्त्राविति। सीता यतोऽन्तर्वत्नी भर्त्रा विवासिताऽभूत् अतः प्रसूतिपर्यन्तं स्थित्वा ततस्तनयोत्पत्तौ सत्यां तौ तनयौ मुनौ निक्षिप्य रामचरणावेव ध्यायन्ती रामवियोगमसहिष्णुः विवरं प्रविवेश। ह हेति खेदे ॥ १५ ॥ ❀ ❀ तदिति। ईश्वरोऽपि भगवान् रामः तस्या विवरप्रवेशं श्रुत्वा शुचः जातानि शोकाश्रूणि धिया विवेकेन रुन्धन्नपि तस्यास्तांस्तान् सौशील्यादिगुणान् स्मरन् शुचो रोद्धुं नाशक्नोत् ॥ १६ ॥

वीरराघवव्याख्या

तद्वचो दर्शयति—नेति। परस्य पुरुषान्तरस्य वेश्म गच्छति पुनःपुनरिति तथा अत एव दुष्टामसतीं व्यभिचारिणीं त्वामहं न बिभर्मि, परवेश्मगामपि सीतां रामोऽबिभ्रत ततस्त्वं किं श्रेष्ठः ? इति वदन्तीं प्रत्याह—स्त्रैण इति। हि यस्माद्रामः

स्त्रैणः अतः सीतां बिभृयात् अहं तु पुनः स्त्रीपारवश्यरहितः त्वां न भजामीति ॥ ६ ॥ ❀ ❀ इतीत्थम् असंविदः तत्त्वानभिज्ञात् अतएव बहुमुखान्नानाविधवादिनो दुराराध्यात् लोकाद्भीतेन पत्या श्रीरामेण त्यक्ता सीता प्राचेतसस्य वाल्मीकेराश्रमं प्राप्ता ययौ, कथम्भूता ? अन्तर्वत्नी गर्भिण्येव सीता गतेत्यन्वयः ॥ १० ॥ ❀ ❀ ततः काले प्रसवकाले सा सीता यमौ सुतौ सुषुवे तौ च कुशो लव इति ख्यातौ तयोः कुशलवयोर्मुनिः प्राचेतसः जातकर्मादिक्रियाः चक्रे ॥ ११ ॥ तथाङ्गदादयो द्वौ द्वौ पुत्रौ लक्ष्मणादीनां सम्बभूवतुः ॥ १२ ॥ ❀ ❀ दिशां विजये दिग्विजयकाले कोटिशो गन्धर्वान् भरतो हतवान् तदीयं गन्धर्वाणां सम्बन्धि सर्वं धनमादाय राज्ञे श्रीरामायार्पयामास तथा शत्रुघ्नश्च मधोरसुरस्य पुत्रं लवणाख्यं राक्षसं हत्वा मधुवने मथुरानामपुरीं निर्ममे ॥ १३-१४ ॥ ❀ ❀ मुनौ वाल्मीकौ तनयौ कुशलवौ निक्षिप्य मुन्यधीनौ कृत्वा भर्त्रा श्रीरामेण विवासिता निर्यापिता सीता श्रीरामस्य चरणौ ध्यायन्ती विवरं भुव इति शेषः । प्रविवेश ॥ १५ ॥ तद्विवरप्रवेशमाकर्ण्य भगवान् श्रीरामस्तस्याः सीतायाः तांस्तान् गुणान् स्मरन् धिया शुचं शोकं रुन्धन्नपीश्वरोपि रोद्धुं नाशक्नोत् ॥ १६ ॥

विजयध्वजतीर्थकृता पदरत्नावली

बहुमुखादन्योन्यशिक्षानियतत्वेनानेकशब्देन प्रधानादत एव दुराराध्याद् दुःसाध्यात् कार्यनिष्पत्तिरहितादित्यर्थः । अतएवासंविदः अन्यसंवादशून्यात् अर्थादानरहिताद्वा लोकाच्छ्रुत्वा लोकापवादभीतेन रामेण त्यक्ता सा सीता प्राचेतसो वरुणस्यापत्यं वाल्मीकिः तस्याश्रमं प्राप्ता ॥ १० ॥ ❀ ❀ अन्तर्वत्नी गर्भिणी यमौ यमलौ क्रियाः क्षत्रयोग्याः जातकानिकाः ॥ ११-१४ ॥ ❀ ❀ मुनौ वाल्मीकौ विवरं भूबिलम् ॥ १५-१७ ॥

जीवगोस्वामिकृतः क्रमसन्दर्भः

लोकात् राष्ट्रान्तरस्थात् भीतेन शङ्कमानेन ॥ १०-१५ ॥ ❀ ❀ स्त्रीसङ्गिनां गतिमित्यादि पूर्वमुक्तं यथार्थत्वे दृढयंस्तदीयमन्तःकरणं दर्शयति—तच्छ्रुत्वेति । ईश्वरोपीत्यपरत्राप्यन्वयः । अहो तस्या भक्तिगुणानां महिमेति भावः ॥ १६ ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

असंविदः ज्ञानशून्यात् प्राचेतसो वाल्मीकिः ॥ १० ॥ ❀ ❀ अन्तर्वत्नी गर्भवती ॥ ११-१४ ॥ ❀ ❀ भर्तुर्विच्छेददुःखमसहिष्णुः भुवो विवरं प्राविशत् ॥ १५ ॥ ❀ ❀ ईश्वरोपि रोद्धुं नाशक्नोदिति तस्य प्रेमवश्यत्व-स्वभावादिति भावः ॥ १६ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

लोकात् प्राकृतजनात् बहुमुखात् बहुषु मायिकेषु देहगेहादिषु मुखं मुखोपलक्षितं भाषणादिचेष्टितं यस्य तस्मात् श्रीरामपदाम्भोजपराङ्मुखादित्यर्थः । अत एव असंविदः अतत्त्वज्ञात् दुराराध्याद्दुष्कीर्तिकरादित्यर्थः । भीतेन स्वकीर्ति-रक्षाऽशिष्टमार्गे संस्थापनानर्हात् परेणेत्यर्थः । प्राचेतसो वाल्मीकेः श्रीजानकीरामस्वरूपगुणाद्यभिज्ञस्य आश्रमं प्राप्ता ॥ १० ॥ काले प्रसवकाले क्रियाः जातकर्माद्याः ॥ ११-१४ ॥ ❀ ❀ विवरं प्रविवेश भूमिद्वारैव वैकुण्ठादागता तद्विवरद्वारेण वैकुण्ठं गतेत्यर्थः ॥ १५ ॥ ❀ ❀ शुचा शोकाश्रूणि रुन्द्धन्नपि रोद्धुं नाशक्नोत् ईश्वरः सर्वदा निःशोकः स्वेच्छयैव लोकगतिं तथाभूतया चेष्टया दर्शयामासेति भावः ॥ १६ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

ता वाचो दर्शयति—नेति । अहं त्वां न बिभर्मि न धारयामि न पुष्णामि च । तत्र हेतुमाह—दुष्टामिति । दुष्टत्वमेवाह—असतीमिति, व्यभिचारिणीमित्यर्थः । व्यभिचारमेव स्पष्टयति—परवेश्मगामिति, परस्य पुरुषान्तरस्य वेश्म गृहं गच्छतीति तथा तामित्यर्थः । ननु रावणवेश्मगां सीतां रामः कथमबिभ्रदित्याशङ्क्याह—स्त्रीलोभीति । कामपारवश्याद्रागः परवेश्मगामपि सीतां बिभृयात् अबिभ्रत् । अहं तु पुनः स्त्रीपारवश्यरहितस्त्वां न भजे, नाङ्गीकुर्यामित्यर्थः ॥ ६ ॥ ❀ ❀ इत्येवं बहुमुखात् नानाविधवादिनः तथापि दुराराध्यात् प्रबोधयितुमशक्यात् । तत्र हेतुमाह—असंविदः अतत्त्वज्ञात् लोकात् जनाद्भीतेन पत्या श्रीरामेण त्यक्ता सीता प्राचेतसस्य वाल्मीकेराश्रमं प्राप्तेति ॥ १० ॥ ❀ ❀ अन्तर्वत्नी गर्भिणी प्रसवकाले आगते सति यमौ सहजौ द्वौ कुशो लव इति ख्यातौ लोकप्रसिद्धौ सुतौ सुषुवे । तयोः सुतयोः क्रियाः जातकर्मादिरूपाः

मुनिर्वाल्मीकिश्चक्रे ॥ ११ ॥ ❀ ❀ तथाऽङ्गदादयः द्वौ द्वौ पुत्रौ लक्ष्मणादीनां बभूवतुः । स्पष्टमन्यत् ॥ १२ ॥ ❀ ❀ दिशां विजये भरतः कोटिशो गन्धर्वान् जघ्ने हतवान् । तदीयं धनमानीय सर्वं राज्ञे श्रीरामाय न्यवेदयत् ॥ १३ ॥ ❀ ❀ तथा शत्रुघ्नो मधोरसुरस्य पुत्रं लवणाख्यं राक्षसं हत्वा तस्मिन् मधुवने मथुरां नाम प्रसिद्धां पुरीं निर्ममे ॥ १४ ॥ ❀ ❀ सीता यतोऽन्तर्वत्नी भर्त्रा रामेण विवासिता अतः प्रसवपर्यन्तमेव स्थिता, तदनन्तरं तु तनयौ कुशलवौ मुनौ वाल्मीकौ निक्षिप्य तदधीनौ कृत्वा रामस्य चरणौ ध्यायन्ती भुवो विवरं प्रविवेश । एवं निरपराधायास्तस्याः निस्सारणस्य विवरप्रवेशरूपायाश्चेश्वर-लीलाया आश्चर्यं द्योतयन्नाह—हेति ॥ १५ ॥ ❀ ❀ तस्याः विवरप्रवेशं श्रुत्वा शुचः जातानि शोकाश्रूणि धिया विवेकेन रुन्धन्नपि रामः ईश्वरः विषयेष्वनासक्तो जितेन्द्रियोऽपि तस्यास्तांस्तान् सौशील्यादिगुणान् स्मरन् रोद्धुं नाशक्नोदित्यन्वयः । जितेन्द्रियत्वे हेतुमाह—भगवानिति ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तद्वचो दर्शयति । नेति । परस्य पुरुषान्तरस्य वेश्म गृहं गच्छति पुनः पुनरिति परवेश्मगा तां, अत एव दुष्टां, असतीं व्यभिचारिणीं, त्वां अहं, न बिभर्मि । परवेश्मगामसतीं सीतां श्रीरामोऽबिभ्रत्ततस्त्वं किं श्रेष्ठ इति वदन्तीं प्रत्याह स्त्रैण इति । हि यस्मात्, रामः स्त्रैणः, अतः सीतां, बिभृयात् । अहं स्त्रीपारवश्यरहितोऽहं तु, पुनः त्वां न भजे नैव भजामि इति स्त्रीलोभीत्यपि पाठः ॥ ९ ॥ ❀ ❀ इतीति । इतीत्थं, असंविदस्तत्त्वानभिज्ञात्, अत एव, बहुमुखात् नानाविधवादिनः दुराराध्यात् लोकात्, भीतेन पत्या श्रीरामेण, त्यक्ता, सा सीता, प्राचेतसस्य वाल्मीकेराश्रमस्तं, प्राप्ता ॥ १० ॥ ❀ ❀ अन्तर्वत्नी, सगर्भाया एव परित्यागविधानादन्तर्गर्भवती, सा सीता, आगते काले प्रसवकाले संप्राप्ते सति, यमौ सुतौ सुषुवे पुत्रद्वयं प्रासूतेत्यर्थः । तौ च, कुशः, लवः, इति ख्यातौ । तयोः कुशलवयोः, क्रिया जातकर्मादिकाः, मुनिः प्राचेतसः, चक्रे ॥ ११ ॥ श्रीरामपुत्रद्वयेन साकं प्रकरणात्तद्भ्रातृसुतसंज्ञा अपि निर्दिशति । अङ्गद इति । अङ्गदः, चित्रकेतुश्च लक्ष्मणस्य, आत्मजौ पुत्रौ, स्मृतौ । हे महीपते, तक्षः, पुष्पकलः, इत्येतौ, भरतस्य, आत्मजौ आस्ताम् । सुबाहुः, श्रुतसेनश्च, शत्रुघ्नस्यात्मजौ बभूवतुः ॥ १२ ॥ ❀ ❀ गन्धर्वानिति । भरतः दिशां विजये दिग्विजयकाले, कोटिशः, गन्धर्वान्, जघ्ने । तदीयं, गन्धर्वसंबन्धि, धनम् आनीय, सर्वं, राज्ञे श्रीरामाय, न्यवेदयत् समर्पितवान् ॥ १३ ॥ ❀ ❀ शत्रुघ्न इति । तथा शत्रुघ्नश्च, मधोरसुरस्य, पुत्रं लवणं नाम राक्षसं, हत्वा मधुवने, मथुरां नाम पुरीं चक्रे वै ॥ १४ ॥ ❀ ❀ मुनाविति । भर्त्रा श्रीरामेण, विवासिता निर्यापिता, सीता मुनौ वाल्मीकौ, तनयौ लवकुशौ पुत्रौ, निक्षिप्य मुन्यधीनौ कृत्वा, रामचरणौ ध्यायन्ती सती, विवरं छिद्रं, भुव इति शेषः । प्रविवेश ह इति प्रसिद्धौ ॥ १५ ॥ ❀ ❀ तदिति । तत् सीताया विवरप्रवेशनं, श्रुत्वा आकर्ण्य, भगवान् रामः, तस्याः सीतायाः, तान् तान् गुणान्, स्मरन् अत एव धिया, शुचं शोकं, रुन्धन् अपि, ईश्वरः सन्नपि, रोद्धुं, न अशक्नोत् ॥ १६ ॥

भाषानुवादः

'अरी ! तू दुष्ट और कुलटा है । तू पराये घरमें रह आयी है । स्त्री-लोभी राम भले ही सीताको रख लें, परन्तु मैं तुझे फिर नहीं रख सकता' ॥ ९ ॥ ❀ ❀ सचमुच सब लोगोंको प्रसन्न रखना टेढी खीर है । क्योंकि मूर्खोंकी तो कमी नहीं है ! जब भगवान श्रीरामने बहुतोंके मुँहसे ऐसी बात सुनी, तो वे लोकापवादसे कुछ भयभीत-से हो गये । उन्होंने श्रीसीताजीका परित्याग कर दिया और वे वाल्मीकि मुनिके आश्रममें रहने लगीं ॥ १० ॥ ❀ ❀ सीताजी उस समय गर्भवती थीं । समय आनेपर उन्होंने एक साथ ही दो पुत्र उत्पन्न किये । उनके नाम हुए—कुश और लव । वाल्मीकि मुनिने उनके जातकर्मादि संस्कार किये ॥ ११ ॥ ❀ ❀ लक्ष्मणजीके दो पुत्र हुए—अङ्गद और चित्रकेतु । परीक्षित् ! इसी प्रकार भरतजीके भी दो ही पुत्र थे—तक्ष और पुष्कल ॥ १२ ॥ ❀ ❀ तथा शत्रुघ्नके भी दो पुत्र हुए—सुबाहु और श्रुतसेन । भरतजीने दिग्विजयमें करोड़ों गन्धर्वोंका संहार किया ॥ १३ ॥ ❀ ❀ उनका सब धन लाकर अपने बड़े भाई भगवान् श्रीरामकी सेवामें निवेदन किया । शत्रुघ्नजीने मधुवनमें मधुके पुत्र लवण नामक राक्षसको मारकर वहाँ मथुरा नामकी पुरी बसायी ॥ १४ ॥ ❀ ❀ भगवान् श्रीरामके द्वारा निर्वासित सीताजीने अपने पुत्रोंको वाल्मीकिजीके हाथोंमें सौंप दिया और भगवान् श्रीरामके चरणकमलोंका ध्यान करती हुई वे पृथ्वीदेवीके लोकमें चली गयीं ॥ १५ ॥ ❀ ❀ यह समाचार सुनकर भगवान् श्रीरामने अपने शोकावेशको बुद्धिके द्वारा रोकना चाहा, परन्तु परम समर्थ होनेपर भी वे उसे रोक न सके क्योंकि उन्हें जानकीजीके पवित्र गुण बार-बार स्मरण हो आया करते थे ॥ १६ ॥

स्त्रीपुंप्रसङ्ग एतादृक्सर्वत्र[1] त्रासमावहः । अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः ॥ १७ ॥
तत ऊर्ध्वं ब्रह्मचर्यं धारयन्प्रजुहोत् प्रभुः । त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥ १८ ॥
स्मरतां हृदि विन्यस्य विद्धं दण्डककण्टकैः । स्वपादपल्लवं राम आत्मज्योतिरगात् ततः ॥ १९ ॥

नेदं यशो रघुपतेः सुरयाच्ञयाऽऽत्तलीलातनोरधिकसाम्यविमुक्तधाम्नः ।
रक्षोवधो जलधिबन्धनमस्रपूगैः[2] किं तस्य शत्रुहनने कपयः सहायाः ॥ २० ॥
यस्यामलं नृपसदस्सु यशोऽधुनापि गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम् ।
तं नाकपालवसुपालकिरीटजुष्टपादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥ २१ ॥

स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा[3] । कोसलास्ते ययुः स्थानं यत्र गच्छन्ति योगिनः ॥ २२ ॥
पुरुषो रामचरितं श्रवणैरुपधारयन् । आनृशंस्यपरो राजन् कर्मबन्धैर्विमुच्यते ॥ २३ ॥

राजोवाच

कथं स भगवान् रामो भ्रातॄन् वा स्वयमात्मनः । तस्मिन् वा तेऽन्ववर्तन्त प्रजाः पौराश्च ईश्वरे ॥ २४ ॥

कृष्णप्रिया व्याख्या

अन्वयः—स्त्रीपुंप्रसंगः एतादृक् सर्वत्र ईश्वराणाम् अपि त्रासम् आवहः किम् उत गृहचेतसः ग्राम्यस्य ॥ १७ ॥ ❀ ❀ ततः ऊर्ध्वं ब्रह्मचर्यं धारयन् प्रभुः त्रयोदशाब्दसाहस्रम् अखंडितम् अग्निहोत्रम् अजुहोत् ॥ १८ ॥ ❀ ❀ ततः स्मरतां हृदि दण्डककंटकैः विद्धं स्वपादपल्लवं विन्यस्य रामः आत्मज्योतिः अगात् ॥ १९ ॥ ❀ ❀ सुरयाच्ञया आत्तलीलातनोः अधिकसाम्यविमुक्तधाम्नः रघुपतेः अस्रपूगैः रक्षोवधः जलधिबन्धनम् इदं यशः न तस्य शत्रुहनने किम् कपयः सहायाः ॥ २० ॥ ❀ ❀ ऋषयः यस्य अमलम् अघघ्नं दिगिभेंद्रपट्टं यशः अधुना अपि नृपसदःसु गायन्ति तं नाकपाल-वसुपालकिरीटजुष्टपादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥ २१ ॥ ❀ ❀ यैः सः स्पृष्टः अभिदृष्टः वा संविष्टः वा अनुगतः अपि ते कोशलाः यत्र योगिनः गच्छन्ति स्थानं ययुः ॥ २२ ॥ ❀ ❀ राजन् श्रवणैः रामचरितम् उपधारयन् पुरुषः आनृशंस्यपरः कर्मबन्धैः विमुच्यते ॥ २३ ॥ ❀ ❀ भगवान् रामः स्वयम् आत्मनः भ्रातॄन् कथं वा तस्मिन् ते अवर्तंत प्रजाः पौराः च ईश्वरे अन्ववर्तंत ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न चातिचित्रमेतत् । स्त्रीपुंसोः प्रसंग आसक्तिः । त्रासमावहतीति तथा विभक्तेरलुगार्षः । पाठांतरं सुगमम् । किमुतेति प्रासंगिकोक्तिः ॥ १७ ॥ ❀ ❀ अग्निहोत्रमजुहोत् । प्रभुः रामः ॥ १८ ॥ ❀ ❀ आत्मज्योतिर्निजं धाम ॥ १९ ॥ ❀ ❀ जलधिबंधनमस्रपूगैश्च रक्षसां वध इतीदं कविभिराश्चर्यमिव वर्णितमपि यशः स्तुतिर्न भवति । तत्र हेतुः । अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य तस्य किं कपयः सहायाः अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तथैवेदमपि । युक्तं चैतदित्याह । सुराणां याच्ञयाऽऽत्ता स्वीकृता लीलार्था तनुर्येन तस्य ॥ २० ॥ ❀ ❀ एवंविधलीलाप्रयोजनं दर्शयन्प्रणमति । यस्य यशो नृपाणां युधिष्ठिरादीनां सदस्सु ऋषयो मार्कंडेयादयो गायंति । दिगिभेंद्राणां पट्टवदाभरणरूपम् । तत्पर्यंतं व्याप्त-मित्यर्थः । नाकपाला देवाः वसुपाला वसुधापालाश्च तेषां किरीटैर्जुष्टं पादांबुजं यस्य तं रघुपतिम् । पाठांतरे तत्तस्य रघुपतेर्ना-कपालादिभिर्जुष्टं पादांबुजं प्रपद्य इत्यर्थः ॥ २१ ॥ ❀ ❀ स रामः । संविष्ट उपवेशितोऽनु गतो वा यैस्तैः कोशलदेशवासिनः सर्वेऽपि यत्र योगिनो गच्छंति तत्स्थानं ययुः ॥ २२ ॥ ❀ ❀ आनृशंस्यपर उपशमनिष्ठः सन्विमुच्यते ॥ २३ ॥ ❀ ❀ सः रामः स्वयं कथमवर्तत भ्रातॄन्प्रति वा कथमवर्तत । कथंभूतान् आत्मनः आत्मांशभूतान् । तस्मिन्वा ईश्वरे ते भ्रात्रादयोऽनु अनंतरं कथमवर्तंतेति प्रश्नत्रयम् ॥ २४ ॥

---

१. सर्वत्रोत्तापमावहत् । २. स्रपाणेः । ३. सर्वतो ।

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतादृक् वियोगे क्लेशकर एव। पाठांतरम् 'सर्वत्रैव भयावहः' इत्येवरूपम्। भयं शोकमोहादि ॥ १७ ॥ ❀ ❀ ततः सीताभूनिवेशानंतरम्। पूर्वं क्वचित्खंडितमिति न ध्येयं किन्तु ततः पूर्वमपि तथा ब्रह्मचर्यमित्यस्याप्यूर्ध्वरेतस्त्वं नार्थः किन्तु ब्रह्मणा लक्ष्म्या सीतया सह चर्यं चरणं वर्तनं बाहुलकाद्भावे यत्। धारयन्कुर्वन्नेव 'मम योनिर्महद्ब्रह्म' इति वचनात्। अन्यथा त्रयोदशाब्दसाहस्रमित्युक्तिरयुक्ता स्यात्। सर्वात्मना राज्यकरणस्य तावन्मात्रत्वात्। नाक्षत्रमासस्य सप्तविंशतिदिनात्मकस्य गणनयात्र गणना त्रयोदशाब्दसहस्राणाम्। यद्वाऽग्निर्हूयतेऽत्रेत्यग्निहोत्रं भूमंडलम्। अखंडितं ब्रह्मलोकसमं तल्लोकसममर्यादम्। त्रयोदशाब्दसाहस्रं धारयन् ब्रह्मचर्यं सीतासाहचर्यमजुहोत् स्वीचकार। ब्रह्मलोकस्याखंडितत्वं वेदानां तत्र मूर्त्तिमत्त्वश्रुतेः। जुहोतेः स्वीकारार्थस्तु 'हु—दानाऽदानयोः' अत्र आदाने चेत्येके इत्युक्तेः। "नक्षत्रमासगणितं त्रयोदशसहस्रकम्। ब्रह्मलोकसमं चक्रे समस्तं क्षितिमंडलम्।" इति तीर्थः। मम त्वित्थं प्रतिभाति—ननु पृथ्व्यर्थितब्रह्मादि प्रार्थनानंतरं श्रीवाल्मीकीये "दशवर्षसहस्राणि दशवर्षशतानि च। वत्स्यामि मानुषे लोके पालयन्पृथिवीमिमाम्"। इति श्रीभगवतैव प्रतिश्रुतं तत्कथं त्रयोदशाब्दसाहस्रमिति तत्राह—तत्रापि पृथिवीपालन एवैतत्काल प्रतिज्ञा श्रूयते तेन तदनंतरमग्निहोत्रादिकरणं समंजसमेव। "आयुर्वर्षाणि लक्षं स्युः कृते नृणां महात्मनाम्। त्रेतायामयुतं तच्च सहस्रं द्वापरे ततः। कलौ शतं पापवशात्तत्स्थापि ह्यनवस्थितिः"। इति पुराणांतरोक्तिविरोधपरिहारस्तु "तपसा दानधर्मेण योगाभ्यासेन वर्द्धते। आयुर्द्धनं सुखं चेह चिकित्सा नेह विद्यते"। इत्युक्तेर्ध्येयः। तथा च "अग्निहोत्रं परो धर्मो न तस्माद्विद्यते परम्" इत्युक्तेस्तस्मिन्नायुर्वर्द्धनं न चित्रमन्यथा "षष्टिवर्षसहस्राणि जातस्य मम कौशिकः" इति विश्वामित्रं प्रति दशरथोक्तिः कथं संगच्छेतेति। यच्च "शतायुर्वै पुरुषः" इति श्रुतौ शतपदं तदानंत्यमाह प्रतिपादितं चैतन्नीलकण्ठेन श्रीमहाभारते। "आनंत्यार्थाः स्मृताः सर्वे प्रायशब्दाः शतादयः। इतिहासपुराणेषु वाच्यार्थं ब्रुवते क्वचित्"। इत्युक्तेः। श्रौतं शतपदं कृतादित्रिष्वानंत्यपरं कलौ वाच्यार्थपरमिति न किंचिदसमंजसम्। यद्वा—त्रयोदशभिः सहितमब्दसाहस्रं त्रयोदशाब्दसाहस्रं तथा च त्रयोदशाब्दन्यूनायुताब्दपर्यंतं राज्यं कृत्वा त्रयोदशाधिकसहस्राब्दं यावदग्निहोत्रं चकार तेन "दशवर्षसहस्राणि दशवर्षशतानि च। वत्स्यामि मानुषे लोके" इति प्राचेतसोक्तिः "दशवर्षसहस्राणि रामो राज्यमकारीत्" इति पुराणांतरोक्तश्च समंजसा भवेदिति। यद्वा—त्रयेण प्रभावोत्साहमंत्ररूपेण शक्तित्रयेणोदशाति भुंक्ते राज्यमिति त्रयोदशो नृपस्तत्संबुद्धौ। तथा अब्दसहस्रमग्निहोत्रमजुहोत्। अखंडितं ब्रह्मचर्यं धारयन्नित्यन्वयः ॥ १८ ॥ ❀ ❀ विन्यस्य निधिवन्निधाय। आत्मना स्वयमेव ज्योतिः प्रकाशो यत्र तद्वैकुंठम् "यद्भाजमानं स्वरुचैव सर्वतः" इत्युक्तेः। ब्रह्माख्यं स्वरूपं वा "न तत्र सूर्यो भाति" इत्यादिश्रुतेः ॥ १९ ॥ ❀ ❀ स्तुतिराधिक्यं न। तत्र आधिक्याभावे। अधिकसाम्येत्यत्राधिकेति भावप्रधानो निर्देशः। आधिक्यसाम्याभ्यामित्यर्थः। अधिकसाम्यविमुक्तत्वं तु श्रीमहादेवस्यापि ध्येयत्वात्तदुक्तं तेनैव पाद्मे "रामरामेतिरामेति रमेरामेमनोरमे। सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ १ ॥" अस्यार्थस्तु—रमा लक्ष्मीस्तस्या ईरणमीः कंपनम् 'ईर—गतौ कंपने च' इति धातोर्भावे क्विप्। यया सा रमेः रूपसंपत्तिस्तया रमेराऽर्थाद्रूपसंपत्त्या मनोरमे सुंदरि संबुद्धिरियं पार्वतीं प्रति शिवस्य। वरानने सुमुखे रामनामास्ति मुखसौष्ठवं रामनाम्नैव नान्यथेति भावः। तदुक्तम् "मथुराणेवि लोमेन मध्यमं नो यदक्षरम्। यो न स्मरति तच्छिष्टं यन्मध्यं तच्च तन्मुखे।" इति शिष्टैः यद्वा—मे वरानने इति योज्यं किंभूतं रामनाम रामस्य दाशरथे रामा सीता तस्या इतिर्गमनं यत्र तद्रामरामेति लंकापुरं रामरामेतिनि रामो रमणं यस्य स रामरामेतिरामो रावणस्तस्येतिः समाप्तिर्येन तद्रामरामेतिरामेति संज्ञासंज्ञिनोरभेदोपचारो हि सूर्यादिशब्दवत्। मीमांसकैर्मंत्रस्यैव देवताविग्रहत्वेन स्वीकृतत्वात्। पुनः किंभूतं सहस्रैरनंतैर्नाम्नत उच्चार्य्यत इति सहस्रनाम 'णम—प्रह्वत्वे शब्दे च' इत्यन्प्रत्ययः। यद्वा—आ—अभ्यासे' इतो मन्। पुनः किंभूतं तेन ब्रह्मणा तुल्यं तत्तुल्यम् "तदिति ब्रह्मणो नाम" इति श्रुतेः। यथा ब्रह्माभ्यासान्मोक्षस्तथा रामनामतोऽपीति भावः। यदुक्तमभियुक्तैः: "यन्नामसंसर्गवशाद्वर्णो नष्टस्वरोऽप्यूर्ध्वगतिं प्रयाति। तन्नामपादं हृदि संनिधाय देही कथं नोर्द्ध्वगतिं प्रयायात्।" इति। अपरोऽप्यर्थोऽस्त्यस्ति तथाहि—हे वरानने ऽहं रामे श्रीदाशरथावतिरमेऽतिशयेन तं सेवे। किंभूते रामेऽतिक्रांतो रामो जामदग्न्यो येन सोति रामस्तस्मिन्नतिरामे पुनर्मनोरमेऽतिसुंदरे संबुद्धिर्वेयम्। किंभूतोऽहं रामो रा धनं यस्य स रामराः। किं च मे यत्सहस्रनाम तत्तुल्यं रामनाम यत्तदोर्नित्यसंबंधात्। यन्मे नामसहस्रोच्चारणफलं तत्सकृद्रामनामोच्चारणेन भवतीति भावः। अत्र छेदस्तु—"रामराऽमेतिरामेऽतिरमे रामे मनोरमे। सहस्रनाम तत्तुल्यं रामनाम वरानने" इति। किं सहाया अपि तु न। यतो न सहायाः अतो हेतोः। इदमपि जलधिबंधनाद्यपि। लीलामात्रस्वीकारे वालिभयार्दितसुग्रीवस्य निजकार्यं कर्तुमशक्तस्य किं परकार्यसहायकत्वं स्यादिति ध्येयमत्र ॥ २० ॥ ❀ ❀ यस्य श्रीरामस्य। वसुपाला इत्यत्र धालोप आर्षः। वसुधारकत्वेन वसुपदं वा वसुधां लक्षयति तेन राजान इत्यर्थः। तीर्थस्तु वसुपालाः कुबेरादय इत्याह। मूलपाठे तमिति छेदः पाठांतरे 'पादांबुजं रघुपतेः' इति पाठे तदिति छेदः। इत्यर्थ इति। तत्पदं षष्ठ्या विपरिणमनीयमिति भावः ॥ २१ ॥ ❀ ❀ स यैरिति पाठः प्रचुरः। स्रष्टा

नमनादिना। कोशला अयोध्यावासिनः। योगिनो भक्तिज्ञानयोगसिद्धाः ततः। वैकुंठापरपर्यायं सांतानिकमिति प्राचेतसः॥ २२॥ ❀ ❀ आसमंतान्नृशंस्यं क्रौर्यं तत्परा वानेन "रामोरामोराम इति सर्वेषामभवत्तदा। सर्वो राममयो लोको यदा रामोऽभवन्नृपः।" इति वाक्यमसूचि। तथा च पुरुषमात्रस्य श्रवणमात्रेणापि नाम्ना कर्मबंधविमोकोऽभूदिति भावः॥ २३॥ ❀ ❀ कथं केन योगेन भ्रात्रादिषु रामा रमयितृत्वेनौरसवत्। यथौरसः स्वदेहोत्पन्नः पितरं रमयति तद्वदिति तीर्थः॥ २४॥

अन्वितार्थप्रकाशिका

स्त्रीपुमिति। एतादृक् अधिकः स्त्रीपुंसयोः प्रसङ्ग आसक्तिः। समासान्ताभाव आर्षः। ईश्वराणामपि सर्वत्र त्रासस्यावहः। द्वितीया त्वार्षी। ग्राम्यस्य गृहचेतसः त्रासावह इति किमु वक्तव्यम्। किमुतेति प्रसङ्गोक्तिः सर्वत्रैव। भयावह इत्यपि पाठः॥ १७॥ ❀ ❀ तत इति तत ऊर्ध्वं ब्रह्मचर्यं धारयन् स्त्र्यन्तरपरिग्रहं वर्जयन् प्रभुः श्रीरामः त्रयोदशाब्दानां साहस्रमखण्डितमविच्छिन्नं यथा स्यात्तथाऽग्निहोत्रमजुहोत्॥ १८॥ ❀ ❀ स्मरतामिति। रामः पूर्वं दण्डकारण्ये विचरणात् दण्डककण्टकैर्विद्धं स्वपादपल्लवं स्मरतां भक्तानां हृदि विन्यस्य ध्येयत्वेनावलम्बं विधाय स्वयमात्मज्योतिः निजं धाम अगात्॥ १९॥ ❀ ❀ नेदमिति। सुराणां याच्ञया आत्ता स्वीकृता लीलार्था तनुर्येन तस्य अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य यत्तुल्यो यदधिकश्च नास्ति तादृक्प्रभाववतः तस्य रघुपतेः अस्त्रपूगै रक्षसां वधः जलधेर्बन्धनं चेतीदमाश्चर्यरूपमपि यशो न भवति लीलालेशमात्रत्वात् किं तस्य शत्रुहनने कपयः सहायाः नैवेत्यर्थः। अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तथा रक्षोवधादिकमपीति॥ २०॥ ❀ ❀ यस्येति। अमलम् अवद्यं दिग्गजेन्द्राणां दिग्गजानां पट्टवदाभरणरूपं तत्पर्यन्तं व्याप्तं यद्वा पट्टशब्द आरूढवाची। दिग्गजेन्द्रारूढमित्यर्थः। यस्य श्रीरामस्य यशः अधुनाऽपि नृपाणां युधिष्ठिरादीनां सदस्सु सभासु ऋषयो मार्कण्डेयादयो गायन्ति तं नाकपाला देवाः वसुपालाः कुबेरादयः वसुधापालाश्च तेषां किरीटैर्जुष्टं पादाम्बुजं यस्य तं रघुपतिं शरणं प्रपद्ये। जुष्टमिति रघुपतेरिति च पाठे तत्तस्य रघुपतेर्नाकपालादिजुष्टं पादाम्बुजं प्रपद्ये इत्यर्थः॥ २१॥ ❀ ❀ यैरिति। तदानीं यैजनैः श्रीरामः संस्पृष्टः अभिदृष्टः संविष्टः उपवेशितः अनुगतोऽपि वा ते सर्वे कौशलदेशवासिनो यत्र यत्थानं योगिनो गच्छन्ति तत्स्थानं ययुः मुक्ता बभूवुरित्यर्थः॥ २२॥ ❀ ❀ पुरुष इति। हे राजन्! आनृशंस्यपरः क्रौर्यादिदोषरहितः उपशमनिष्ठः पुरुषः रामचरितं श्रवणैः श्रोत्रेन्द्रियवृत्तिभिरुपधारयन् हृदि स्थापयन् कर्मबन्धैः संसारहेतुभिः पुण्यपापात्मकैर्विमुच्यते॥ २३॥ ❀ ❀ कथमिति। स भगवान् रामः आत्मनः आत्मरूपान् स्वस्य अंशभूतान्वा भ्रातॄन् प्रति कथमवर्तत तथा स्वयं वा कथमवर्त्तत तथा तस्मिन्नीश्वरे ते भ्रातरः प्रजाः पौराश्च कथमन्ववर्तन्त इति प्रश्नत्रयम्॥ २४॥

वीरराघवव्याख्या

न चातिचित्रमेतदित्याह—ईश्वराणामपि स्त्रीपुंसयोः प्रसङ्गः एतावान् एतादृक्,? सर्वत्रैवं भयावहः भयशब्दः शोकोपलक्षकः ईश्वराणामपि भयावहः किमुत ग्राम्यस्य गृह एव चेतो यस्य तस्य॥ १७॥ ❀ ❀ तत ऊर्ध्वं विवरप्रवेशश्रवणानन्तरं ब्रह्मचर्यं धारयन् स्त्र्यन्तरपरिग्रहं वर्जयन् प्रभुः श्रीरामः त्रयोदशाब्दानां सहस्राणि अग्निहोत्रमविच्छिन्नं यथा तथा अजुहोत् जुहाव। ननु, श्रीरामायणे "दशवर्षसहस्राणि दशवर्षशतानि च। रामो राज्यमुपासित्वा" इत्येकादशवर्षसहस्राणि श्रीरामावतारावस्थानमुक्तम्; अत्र तु त्रयोदशाब्दसाहस्रमिति तेन विरोधः, मैवं तत्र हि दशवर्षसहस्राणि इत्यनेन तावन्तं कालं सीतया सहावस्थितिरुच्यते दशवर्षशतानीत्यनेन तु तावन्तं कालं तया विनाऽवस्थानमुच्यते अत एव हि कोटिद्वयोक्तिः सीतया विना रामस्य एकैकवर्षशतस्य वर्षसहस्रतुल्यताख्यापनाय सहस्रमिति चोक्तम् एवंस्थिते च तत्र दशग्रहगं त्रिगुणितानां दशानामुपलक्षणमित्यभिप्रेत्य कात्स्न्र्येनावतारसहचरितकालोऽत्र गणितः॥ १८॥ ❀ ❀ ततो वनवासदशायां दण्डकारण्यस्थकण्टकैर्विद्धं स्वपादपल्लवं स्मरतां जनानां हृदि विन्यस्य निधाय स्मर्त्तव्यं कृत्वेत्यर्थः। श्रीरामः आत्मज्योतिः स्वयंप्रकाशं ज्योतिर्मयं स्थानं परमपदाख्यमगात्॥ १९॥ ❀ ❀ अस्त्रपाणेः कोदण्डपाणेः रघुपतेः श्रीरामस्य रक्षोवधो जलधिबन्धनञ्चेतीदं यशः स्तुतिर्न भवति, तत्र हेतुः, अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य निस्समाभ्यधिकप्रभावस्येत्यर्थः। तस्य किं कपयो वानराः सहायाः अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तदेदमपि युक्तं चैतदित्यभिप्रायेण विशिनष्टि, सुराणां याच्ञया आत्ता उपात्ता लीलार्था तनुर्येन तस्य॥ २०॥ ❀ ❀ एवंविधलीलाप्रयोजनं दर्शयन् शरणं व्रजति—यस्यामलमवद्यं पापहरं पादाम्बुजमाहात्म्यमिति विशेष्यमध्याहार्यं नृपाणां युधिष्ठिरादीनां सदस्सु यश एव धनं येषां ते तथाभूता अपि ऋषयो मार्कण्डेयादयः यशोधनापीति सन्धिरार्षः। गायन्ति यन्माहात्म्यं दिग्गिभेन्द्राणां पट्टवदाभरणरूपं तत्पर्यन्तं

व्याप्तमित्यर्थः। नाकपाला देवाः वसुपालाः वसुधापालकाः वैश्रवणादयो वा तेषां किरीटैर्जुष्टं पदाम्बुजं यस्य तं रघुपतिं शरणं प्रपद्ये पाठान्तरे तत्तस्य रघुपतेः जुष्टं पदाम्बुजं शरणं प्रपद्ये इत्यर्थः॥ २१॥ ❀ ❀ यैर्जनैः श्रीरामः संस्पृष्टः सन्दृष्टः संविष्टः उपसेवितः संवीत इति पाठेपि स एवार्थः अनुगतो वा ते सर्वे कोसलदेशवासिनः यत्र यत्स्थानं योगिनो गच्छन्ति तत्स्थानं ययुः मुक्ता बभूवुरित्यर्थः॥ २२॥ ❀ ❀ श्रीरामचरित्रश्रवणफलमाह–पुरुष इति। हे राजन्! आनृशंस्यपरः उपशमनिष्ठः पुरुषो रामचरितं श्रवणैरुपधारयन् श्रोत्रेन्द्रियवृत्तिभिः परिचिन्वन् कर्मबन्धैः पुण्यापुण्यात्मकर्मरूपबन्धनैः संसृतिहेतुभिः प्रमुच्यते मुक्तो भवति॥ २३॥ ❀ ❀ यद्यपि "अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः" इत्यनेन भ्रातॄणां रामस्य च परस्परच्छन्दानुवर्त्तनम् एकपत्नीव्रतधर इत्यादिना राज्यपरिपालनदशायां तस्यावस्थानप्रकारश्चेत्यादिकं सर्वमुक्तमेव तथापि तदेव पुनर्विस्तरेण बुभुत्सुः पृच्छति राजा-कथमिति? स रामः कथम् अवर्ततेति शेषः। भ्रातॄन् आत्मनः जानपदान् देशवासिनो जनांश्च कथमादिशत? भ्रातॄन् जनांश्च कथमन्ववर्ततेत्यर्थः। ते जनाः भ्रातरश्च पौराः प्रजाश्च तस्मिन्नीश्वरे श्रीरामविषये कथमन्ववर्तन्त? इति त्रयः प्रश्नाः॥ २४॥

विजयध्वजतीर्थकृता पदरत्नावली

अपिपदेन लोकशिक्षार्थं सम्भावित एव न त्वनुभूत इत्याह—तत इति। अस्या भूमेर्निदेशानन्तरम् अखण्डितम् अग्निहोत्रमजुहोत् पूर्वं क्वचित् खण्डितमित्यर्थो नैव किन्तु ततः पूर्वं च ब्रह्मचर्यं धारयन्नित्यस्याप्यूर्ध्वरेतस्त्वं नार्थः। किन्तु ब्रह्मणा लक्ष्म्या सीतया सहचर्यं चरणवतनं धारयन् कुर्वन्नेव "मम योनिर्महद्ब्रह्म" इति वचनात् अन्यथा त्रयोदशसहस्रमित्युक्तिरसंगता स्यात् सर्वात्मना राज्यकरणस्य तावत्त्वात्तस्मात्क्षितिमण्डलं त्रयो दशसहस्रशब्दं ब्रह्मलोकसमं कृत्वा—

"नक्षत्रमासगणितं त्रयोदशसहस्रकम्। ब्रह्मलोकसमं चक्रे समस्तं क्षितिमण्डलम्"॥

इति वचनाच्चेत्यर्थः। ऊर्ध्वोधः शब्दयोश्च वैय्यर्थ्याच्च॥ १८॥ ❀ ❀ ततोऽयोध्याया अगाद्वैकुण्ठमिति शेषः। अंशुकैः सूर्यकिरणैः बुद्धं विकसितं पद्ममिव शोभमानं स्वपादपल्लवं स्मरतां पुंसां हृदि विन्यस्य निधिवन्निधाय आत्मज्योतिः स्वभावप्रकाशः॥ १९॥ ❀ ❀ रघुपतेरिदं यशो वक्ष्यमाणलक्षणं न किं तन्निषेध्यमिति तत्राह रक्ष इति। राक्षसवधो यः यच्च जलधिबन्धनं इदमिति रघुपतिः कोसाविति तत्राह विश्वेति। किम्प्रयोजनमुद्दिश्य रघुपतिनामरूपग्रहणमित्याशङ्क्य न किमपि प्रयोजनमुद्दिश्येत्याशयेनाह–लीलेति। शरीरग्रहणेन किमपि दुःखादिकमस्यास्तीत्याशयेनाह—अधिकेति। सर्वस्मादधिकं शान्तमानन्दपूर्णं नित्यमुक्तं धाम स्वरूपं यस्य स तथा तस्य यत एवम्विधमाहात्म्यो रघुपतिरतोऽस्त्रपाणेर्धनुष्पाणेस्तस्य कपयः शत्रुहनने सहायाः बलभूताः किन्नेत्यर्थः॥ २०॥ ❀ ❀ न केवलं नृपसभासु गायन्ति अपितु दिग्गिभेन्द्रपाते दिग्गजानां पातः सञ्चारो यस्मिन् लोकालोकप्रदेशेपीत्यनेन सर्वत्रेत्याह, नाकपाला इन्द्रादयः वसुपालाः कुबेरादयः॥ २१॥ ❀ ❀ यैः स्पृष्टः नमनादिना दृष्टो वा चक्षुरादिना श्रुतो वा श्रोत्रादिना संवित्तः सम्यक् ज्ञातो वा अनुगतो पृष्ठतो यातो वा कोसलाः अयोध्यावासिन इत्युपलक्षणं सर्वेऽपीति ग्राह्यं यत्र योगिनो भक्तिः ज्ञानयोगवन्तो गच्छन्ति तत्स्थानं ययुरित्यन्वयः॥ २२॥ ❀ ❀ पुरुषमात्रस्य श्रुतिमात्रेणापि रामनाम्नः कर्मबन्धमोक्षः स्यादित्याशयेनाह–पुरुष इति। आनृशंस्यपरो हिंसाकर्मपरोऽपि अनेन—

"रामो रामो राम इति सर्वेषामभवत्तदा। सर्वो राममयो लोको यदा रामस्त्वपालयत्।"

इति वाक्यमसूचि॥ २३॥ ❀ ❀ तत्रैवं राजा पृच्छति-कथमिति। स भगवान् भ्रात्रादिषु कथं केन योगेन रामो रमयितृत्वेनावर्तत? औरसवद्यथौरसः स्वदेहोत्पन्नः पुत्रः पित्रादौ कलभाषणादिना रतिप्रदत्वेन जिह्वासुखनाममयत्वेन प्रवर्तते, तथायमपि केन प्रकारेण रामो रतिप्रदः प्रजास्ववर्तत? किञ्च, रामो बालवत्क्रीडावान् कथं केन भावेनेश्वरीयमिति सर्वजनबुद्धावर्तत? इतीदं प्रश्नत्रयं परिहर्तव्यमिति शेषेणान्वयः॥ २४॥

जीवगोस्वामिकृतः क्रमसन्दर्भः

नन्वन्यत्रापि स्त्रीपुंसयोर्मिथः प्रसङ्गे तादृशत्वं दृश्यते, तत्राह स्त्रीति। एतादृक् किन्तु नेति काकर्थः। कुतः स हि ईश्वराणां कर्मयोगादिसिद्धानामपि सर्वत्र परत्र चेह च त्रासं संसारभयमावहति ग्रामस्य तु सुतरामेवेत्यर्थः। तयोस्त्वेष भावः। सर्वपुरुषार्थाधिकप्रेमसारमय एवेति भावः। यद्वा काकुं विनैवायमर्थः एतादृक् एतत्तुल्यत्वेन सम्भाव्यमानो यः स्त्रीपुंप्रसङ्गः स तु सर्वत्र त्रासमावह इति अत्र स्त्रीपुमिति समासान्तकार्याभाव आर्षः। त्रासमिति पुंभावश्चानुकूलमुद्वहतीतिवत् अलुकितु कृद्योगे षष्ठ्येव स्यादिति साप्यार्षीयकल्पा॥ १७॥ ❀ ❀ श्रीरामस्यानुरागं बहिरीहयापि दर्शयति। तत ऊर्द्ध्वमिति

तत ऊर्द्ध्वमखण्डितब्रह्मचर्यं धारयन्नजुहोत् तां विना निर्वेदादितिभावः। त्रयोदशसाहस्रन्तु अग्निहोत्रमखण्डितमजुहोत् ॥१८॥ तदनन्तरञ्च तद्वियोगहेतुलोकप्रवादमयं नरलोकं त्यक्त्वा नित्यत्वसंयोगमयं निजलोकमारूढवानित्याह—ये लोकस्त्वेच्छया केचित्त्यक्तास्तेषाञ्च सन्ततं स्वयमेवासौ महाप्रेम्णा स्फूरति स्मेति चाह स्मरतामिति विद्धं विद्धत्वेन प्रेम्णैव प्रतीतमित्यर्थः। शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छतीतिवत् इति पित्राज्ञापालनमर्यादास्मरणम् आत्मनो ज्योतीरूपं स्वैकुण्ठम् ॥ १६-२० ॥ ❀ ❀ तदेवमुत्तरोत्तरं गुणविशेषं स्मरति चतुर्भिः। तथापि तस्य लौकिकलीलामाधुर्यावेशमनुस्मृत्य जीवन्मुक्ताद्या अपि परमसुखावेशाद्रायन्तीत्याह—यस्येति। तथाच वक्ष्यते श्रीकृष्णलीलायां "स्थित्युद्भवान्त" इत्यादौ तथापि मर्त्यानुविधस्य वर्ण्यत इति ॥ २१ ॥ ❀ ❀ अथ श्रीसीतादीनां पुनस्तन्मिलनं कैमुत्येनाह—स यैर्वेति। कोसला इत्युपलक्षणमेव योगिनस्तद्भक्तिसिद्धाः ॥ २२-२६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकादशोऽध्यायः ॥ ११ ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्ये कामासक्ताः स्त्रियं स्मरन्तस्तु संसार एव मज्जन्तीत्याह, स्त्रीपुंसयोः प्रसङ्गः समासान्ताभाव आर्षः। ईश्वराणां ब्रह्मादीनामपि सर्वत्र इह लोके परलोके च त्रासं संसारमावहतीति सः षष्ठ्यभाव आर्षः। प्रसङ्गस्य प्राकृतत्वात् काममूलकत्वाच्चेति भावः। एतदेवाह—एतादृक् एतयो रामसीतयोरिव दृष्टः केनचिदंशेन व्यावहारिकेणैव न तु तात्त्विकेन न त्वेतयोरपीत्यर्थः। प्रसङ्गस्याप्राकृतत्वात् प्रेममूलकत्वाच्चेति भावः। अत एवेश्वराणामिति न त्वीश्वरस्यापीत्युक्तम् ॥ १७ ॥ ❀ ❀ ततश्च तदानींतनान् स्वपुरस्थान् नीत्वैवान्तर्द्धानलीलां चकार ॥ १८ ॥ ❀ ❀ किन्त्वन्यदेशस्थितानामनुरागिभक्तानां हृदि दण्डककण्टकैर्विद्धं पादमिति ते कण्टकास्तेषां हृद्येव सहस्रगुणं लपन्तस्तान् मूर्च्छितान् कुर्वन्त्विति बुद्ध्यैवेति तेषु रामस्य दया नाभूदिति व्याजस्तुतिः आत्मन एव न तु मायया ज्योतिर्यत्र तत् परं प्रपञ्चागोचरं स्वधाम्नः प्रकाशमगादित्यर्थः ॥ १६ ॥ नरलीलत्वेनैव चमत्कारकं तस्य यशोमाधुर्य्यमास्वाद्यते न त्वैश्वर्यदृष्ट्येत्याह—नेदमिति। आ सम्यगेव आत्ततनोर्नित्यगृहीतलीलाविग्रहस्य रक्षसो रावणस्य वध इतीदं यशः स्तुतिर्न भवति तत्र हेतुः अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य तस्य किं कपयः सहायाः? तेन नरलीलत्वमाधुर्य्येणैव सर्वमेतदुपपद्यते इति भावः ॥ २० ॥ ❀ ❀ रामं प्रपद्यमानस्य सर्वोत्कर्षमाह—यस्य निर्मलं यशः नृपाणां युधिष्ठिरादीनां सदस्सु ऋषयो मार्कण्डेयादयो गायन्ति दिगिभेन्द्रपट्टं पट्टशब्दस्यासनवाचित्वात् दिग्गजेन्द्रारूढमित्यर्थः। तेन यशसः सर्वदिग्विजयिसेनानीत्वमुक्तं नाकपालाः देवेन्द्राद्याः वसुपालाः नरेन्द्राश्च तेषां किरीटैर्जुष्टं पादाम्बुजं यस्य तं जुष्टमिति रघुपतेरिति पाठे तत्तस्येत्यर्थः ॥ २१ ॥ ❀ ❀ संविष्टः सख्यात् यैः सहोपविष्टः शयितो वा ते कोसलदेशवासिनः योगिनो भक्तियोगवन्तः स्थानं वैकुण्ठम् ॥ २२ ॥ ❀ ❀ आनृशंस्यपरः क्रौर्य्यशून्योऽमत्सर इत्यर्थः ॥ २३ ॥ ❀ ❀ आत्मनो भ्रातॄन् प्रति कथमवर्त्तत? स्वयं वा कथमवर्त्तत? तस्मिन् ते भ्रात्रादयः कथमवर्त्तन्त? इति प्रश्नत्रयम् ॥ २४ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

लोकगतिमेव दर्शयति—स्त्रीति। ईश्वराणां समर्थानां देवादीनामपि स्त्रीपुंप्रसङ्गः स्त्रीपुंसोः प्रकृष्टः सङ्गः सर्वं त्रासवर्द्धनः किमुत ग्राम्यस्य ॥ १७ ॥ ❀ ❀ अग्निहोत्रमजुहाव प्रभुः कर्मसाध्यानन्दनिरपेक्षः लोकसङ्ग्रहार्थं तथा कृतवानित्यर्थः ॥ १८ ॥ ❀ ❀ आत्मज्योतिः स्वप्रकाशरूपं स्थानं वैकुण्ठम् अगात् ॥ १९ ॥ ❀ ❀ आत्ता आविष्कृता लीलार्था तनुर्येन तस्य रघुपतेः अस्रपूगैः रक्षोवधो जलधिबन्धनं चेदं कविभिराश्चर्यमिव वर्णितं यशः स्तुतिर्न भवति तत्र हेतुगर्भं विशेषणम् अधिकसाम्याभ्यां विमुक्तं धाम यस्य तस्य किं कपयः सहकारिणः? अयमर्थः यथा कपीनां सुग्रीवादीनामाश्रयणं समर्थानामपि कार्यं पराश्रयणेन सिद्ध्यतीति लोकशिक्षा तथेदं सर्वं लोकशिक्षार्थं लीलामात्रमिति ॥ २० ॥ एवं विश्वं रामचरितं जनकल्याणार्थमिति वदन् श्रीरामपदाम्बुजशरणं व्रजति—यस्येति। यस्य यश अघघ्नं श्रावयितॄणां श्रोतॄणाञ्च दुरितघ्नं दिगिभेन्द्राणां पट्टवदाभरणरूपं दिगिभेन्द्रपर्यन्तं व्याप्तम् अमलं यशः नृपाणां सदस्सु ऋषयोऽधुनापि गायन्ति तत् तस्य रघुपतेः पादाम्बुजं, शरणं व्रजामि कथम्भूतम् नास्त्यकं दुःखं यस्मिन् स नाकः सत्यलोकस्तत्पाला ब्रह्मा वसुशब्देन धनभूताः पशवस्तथा च पशुपालः पशुपतिः शिवः तयोः किरीटाभ्यां जुष्टं सेवितम् ॥ २१ ॥ ❀ ❀ यैः श्रीरामः सन्दृष्टोऽभिदृष्टो वा संविष्टः उपवेशितः अनुगतश्च ते कोसलाः यत्र योगिनः श्रीरामध्यानयोगनिष्ठाः गच्छन्ति तत्र ययुः ॥ २२-२३ ॥ ❀ ❀ स रामः स्वयं कथमवर्तत? आत्मनः भ्रातॄन्प्रति वा कथमवर्तत? चकारात्पौरेषु प्रजासु श्रीरामः कथमवर्त्तत? तस्मिन् श्रीरामे ईश्वरे सर्वस्वामिनि नानास्वभावाः ते भ्रातरः प्रजाः पौराः कथमवर्तन्त? ॥ २४ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

ननु जितेन्द्रियो भगवान् किमभिप्रायः सन्नेवं रोदननाट्यं कृतवानित्यपेक्षायामाह—स्त्रीपुमिति। स्त्रीपुंसयोः प्रसङ्गः आसक्तिरेतादृक् इति प्रदर्शयितुमिति शेषः। कीदृगित्यपेक्षायां तद्विवृणोति—ईश्वराणामपि तथा। गृहे एव चेतो यस्य तस्य ग्राम्यस्य गृहस्थस्य भयावह इति तु किमुत किं वक्तव्यम्? भयशब्दः शोकमोहादेरप्युपलक्षकः। सर्वत्र त्रासमावह इति पाठान्तरम्। विभक्तेरलुगार्षः ॥१७॥ ❀ ❀ तत ऊर्ध्वं सीताविवरप्रवेशश्रवणानन्तरं ब्रह्मचर्यं धारयन् स्त्र्यन्तरपरिग्रहं वर्जयन् प्रभुः श्रीरामः त्रयोदशाब्दानां साहस्रमखण्डितमविच्छिन्नं यथा स्यात्तथाऽग्निहोत्रमजुहोदित्यन्वयः। न च रामायणे 'दशवर्षसहस्राणि दसवर्षशतानि च। रामो राज्यमुपासित्वा' इत्येकादशवर्षसहस्राणि रामराज्यमुक्तं अत्र तु त्रयोदशाब्दसहस्राणि विरोधः शङ्क्यः कल्पभेदेन तत्परिहारात् ॥ १८ ॥ ❀ ❀ ततश्च रामः स्मरतां तद्भक्तानां हृदि स्वपादपल्लवं विन्यस्य संसारसागरोत्तरणाय ध्येयत्वेनावलम्बं विधाय स्वयमात्मज्योतिः प्रकाशात्मकं स्वर्लोकमगात्। चतुर्विधफलाकाङ्क्षिभिस्तु श्रीरामचरणकमलमवश्यमेव ध्येयं तस्य भक्तवश्यतया तन्मनोरथपूरकत्वात्, भक्तवश्यत्वं तु दशरथाज्ञापालकतया दण्डकारण्यादिदुःखसहनान्निश्चेयमित्याशयेन पादपल्लवं विशिनष्टि—विद्धं दण्डककण्टकैरिति ॥ १९ ॥ ❀ ❀ यद्यपि कविभिरिदं कपिसहायेन कृतं जलधिबन्धनमस्रपूगैश्च रक्षसां बध आश्चर्यमिव वर्णितं तथापि तस्य रघुपतेरिदं यशः स्तुतियोग्यं न भवति। तत्र हेतुमाह—अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य किं शत्रुहनने कपयः सहाया इति। तर्हि किमिति सहायतयाऽङ्गीकृतवांस्तत्राह—सुराणां याच्ञया आत्ता स्वीकृता लीलार्था तनुर्येन तस्येति। भक्तवात्सल्यप्रदर्शनार्थं लीलया कप्यादीनां सहायतया ग्रहणं, न तु स्वस्यासामर्थ्येन रक्षसां वधार्थमेवेति भावः॥ २० ॥ ❀ ❀ एवंविधलीलाऽपि किमर्थमित्यपेक्षायां तत्प्रयोजनं दर्शयन् शरणं व्रजति—यस्येति। यस्यामलं शुद्धं शास्त्राविरुद्धं यशोऽधुनाऽपि नृपाणां सदस्सु सभासु ऋषयो मार्कण्डेयादयो गायन्ति, तं नाकपालाः स्वर्गपाला देवा वसुपालाः कुबेरादयः पृथ्वीपालास्तेषां किरीटैर्जुष्टं पादाम्बुजं यस्य तं रघुपतिं शरणं प्रपद्ये इत्यन्वयः। तमित्यत्र तदिति जुष्टेत्यत्र जुष्टमिति रघुपतिमित्यत्र रघुपतेरिति च पाठे तत्तस्य रघुपतेर्नाकपालादिजुष्टं पादाम्बुजं शरणं प्रपद्ये इत्यन्वयः। गानफलं सूचयन्नाह—अघघ्नमिति, वक्तृश्रोतॄणां पापविनाशकमित्यर्थः। अत एव दिगिभेन्द्रपट्टमिभेन्द्राणां पट्टवदाभरणरूपं सर्वतो गतित्वेन तत्पर्यन्तव्याप्तमित्यर्थः॥ २१ ॥ ❀ ❀ तदानीं यैर्जनैः श्रीरामः संस्पर्शादिविषयीकृतः ते सर्वेऽपि कोशलदेशवासिनो यत्र यत्स्थानं योगिनो गच्छन्ति तत्स्थानं ययुः, मुक्ता बभूवुरित्यर्थः। संविष्टः उपवेशितः॥ २२ ॥ ❀ ❀ तच्चरितश्रवणफलमाह—पुरुष इति। त्वया बहुशः श्रुतमतः कृतार्थोऽसीति सूचयन् सम्बोधयति—राजन्निति। आनृशंस्यपरः क्रौर्यादिदोषरहितः पुरुषः रामचरितं श्रवणैः श्रोत्रेन्द्रियवृत्तिभिरुपधारयन् हृदि स्थापयन् कर्मबन्धैः संसारहेतुभिः पुण्यपापात्मकैर्विमुच्यते॥ २३ ॥ ❀ ❀ एवं सङ्क्षेपतो रामादिवृत्तं श्रुत्वाऽपि पुनस्तद्विस्तरेण श्रोतुं पृच्छति—कथमिति। स भगवान्रामः आत्मनः स्वस्य भ्रातॄन् प्रति कथमवर्तत? तथा स्वयं वा कथमवर्तत? तथा तस्मिन्नीश्वरे ते भ्रातरः प्रजाः पौराश्च कथमन्ववर्तन्त? इति प्रश्नत्रयम्॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्त्रीपुमिति। ईश्वराणाम् अपि, स्त्रीपुंप्रसङ्गः स्त्रीपुंसयोः प्रसङ्गः, एतादृक् सर्वत्र एव, भयावहः यदा, तदा, ग्राम्यस्य गृह एव चेतो यस्य तस्य, भयावहः स्यात्। तत्र किमुत किं नु वक्तव्यम्। अत्र भयशब्दः शोकस्याप्युपलक्षकः॥ १७॥ ❀ ❀ तत इति। दशाब्दसाहस्रं दशसहस्रवर्षपर्यन्तं, सीतया सह वर्त्तमान इति शेषः। प्रभुः श्रीरामः तत ऊर्ध्वं सीताया भूविवरप्रवेशश्रवणानन्तरमित्यर्थः। अखण्डितं, ब्रह्मचर्यं, धारयन् स्त्र्यन्तरपरिग्रहं वर्जयन् सन्नित्यर्थः। सहस्रवर्षपर्यन्तमिति शेषः। अग्निहोत्रं, अजुहोत् संजुहाव। त्रयो भरतादयोऽपि, अग्निहोत्रम् अजुहवुः। अत्र केचित्तु, तत ऊर्ध्वं, प्रभुः ब्रह्मचर्यं, धारयन्, त्रयोदशाब्दसाहस्रं, त्रयोदशवर्षसहस्राणीति यावत्। अग्निहोत्रं, अखण्डितं, अजुहोत् इति व्याख्यां कुर्वन्ति, तन्न युक्तं श्रीरामायणे 'दशवर्षसहस्राणि दशवर्षशतानि च। रामो राज्यमुपासित्वा' इत्येकादशवर्षसहस्राणि श्रीरामावतारावस्थानस्योक्तत्वात्। तत्र दशवर्षसहस्राणीत्यनेन तावति काले श्रीरामस्य सीतया सहावस्थितिरुक्ता, दशवर्षशतानीत्यनेन तु तावन्तं कालं तया विनावस्थानमिति तदभिप्रायात्। एतदितरव्याख्यानकारास्तु नाक्षत्रमासमालम्ब्य त्रयोदशाब्दसहस्रतां प्रतिपादयन्ति तत्पक्षस्यापि दुर्बलत्वादस्मद्व्याख्यानमेव निविबादि॥ १८ ॥ ❀ ❀ स्मरतामिति। ततः वनवासदशायामिति शेषः। दण्डककण्टकैः दण्डकारण्यस्थकण्टकैः, विद्धं, स्वपादपल्लवं, स्मरतां जनानां, हृदि विन्यस्य निधाय स्मर्त्तव्यं कृत्वेत्यर्थः। रामः, आत्मज्योतिः स्वयं प्रकाशं ज्योतिर्मयं परमपदाख्यं स्वस्थानं, अगात्॥ १९ ॥ ❀ ❀ नेदमिति। सुरयाच्ञया देवप्रार्थनया आत्ता लीलातनुर्लीलार्था मूर्त्तिर्येन तस्य, अस्त्रपाणेः कोदण्डपाणेः, अधिकं च साम्यं च ताभ्यां विमुक्तं धाम प्रभावो यस्य तस्य, निःसमाभ्यधिकप्रभावस्येत्यर्थः। रघुपतेः श्रीरामस्य, रक्षोवधः जलधिबन्धनं च, इदं यशः, स्तुतिर्न भवति। कविभिराश्चर्यमिव

वर्णितमपि स्तुतिरूपं न भवतीत्यर्थः। कुत उक्तविधातुलप्रभावस्य, तस्य शत्रुहनने कपयः सहायाः, किम्। यथास्य सुग्रीवाद्याश्रयणं लीलामात्रं, तथा रक्षोवधजलधिबन्धनमपि लीलामात्रमेवेति भावः। अस्त्रपूगैरिति पाठे अस्त्रपूगैः, रक्षोवधः जलधिबन्धनं चेत्यन्वयः ॥ २० ॥ ❀ ❀ एवंविधलीलाप्रयोजनं दर्शयन् शरणं व्रजति। यस्येति। यस्य श्रीरामस्य, अमलम् अघघ्नं, यत् पादाम्बुजमाहात्म्यमिति शेषः। दिग्गिभेन्द्राणां दिग्गजानां पट्टं पट्टवदाभरणरूपं, दिग्गिभेन्द्रावासपर्यन्तं व्याप्तमित्यर्थः। तत् पादाम्बुजमाहात्म्यं, नृपाणां युधिष्ठिरादीनां सदस्सु, यश एव धनं येषां ते तथाभूताः अपि, ऋषयो मार्कण्डेयादयः, गायन्ति। यशोधनापीति संधिरार्षः। यशोऽधुनापीति पाठे, ऋषयः, अमलम् अघघ्नं, यस्य यशः अधुनापि, गायन्तीति अन्वययोजना। नाकपाला देवाश्च वसुपाला वैश्रवणादयश्च तेषां किरीटैर्जुष्टं पादाम्बुजं यस्य तं, तं रघुपतिं श्रीरामं, शरणं प्रपद्ये। तन्नाकेति रघुपतेरिति पाठे तत् तस्य, श्रीरघुपतेः, नाकपालादिजुष्टं पादाम्बुजं, शरणं प्रपद्ये इति अन्वयः ॥ २१ ॥ ❀ ❀ स इति। सः श्रीरामः, यैर्जनैः, स्पृष्टः, अभिदृष्टः संदृष्टः, संविष्ट उपसेवितः, वा अनुगतोऽपि वा, ते सर्वे, कोसलाः काशलदेशवासिनः, यत्र यत्स्थानमित्यर्थः। योगिनः गच्छन्ति, तत् स्थान, ययुः। मुक्ता बभूवुरित्यर्थः ॥ २२ ॥ ❀ ❀ श्रीरामचरित्रश्रवणफलमाह। पुरुष इति। हे राजन्, आनृशंस्यपर उपसमनिष्ठः, पुरुषः, रामचरितं श्रवणैः, उपधारयन श्रोत्रेन्द्रियवृत्तिभिः परिचिन्वन् सन, कर्मबन्धैः संसृतिहेतुभिः, पुण्यपापात्मकर्मबन्धनैः, प्रमुच्यते मुक्तो भवति ॥ २३ ॥ ❀ ❀ यद्यपि 'अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः' इत्यनेन रामस्य भ्रातॄणां च परस्परच्छन्दानुवर्त्तनं, एकपत्नीव्रतधर इत्यादिना राज्यपरिपालनदशायां तस्यावस्थानप्रकारश्चेत्यादिकं सर्वमुक्तमेव, तथापि तदेव पुनः विस्तरेण बुभुत्सुः पृच्छति राजा। कथमिति। भगवान् सः रामः, कथं नु अवर्त्तत इति शेषः। भ्रातॄन्, कथं वा आदिशत्। भ्रातॄन् जनांश्च कथमन्ववर्त्ततेत्यर्थः। स्वयमात्मन इति पाठे, आत्मनः, अंशभूतानिति शेष.। भ्रातॄन् प्रति स्वयं वा, कथमन्ववर्त्तत इत्यन्वयः। ते भ्रातरः, पौराः, प्रजाश्च, पुरवासिन्यः प्रजा इत्यर्थः। तस्मिन्, ईश्वरे श्रीरामे वा कथम् अन्ववर्त्तन्त। इति त्रयः प्रश्नाः ॥ २४ ॥

भाषानुवादः

परीक्षित्! यह स्त्री और पुरुषका सम्बन्ध सब कहीं इसी प्रकार दुःखका कारण है। यह बात बड़े-बड़े समर्थ लोगोंके विषयमें भी ऐसी ही है, फिर गृहासक्त विषयी पुरुषके सम्बन्धमें तो कहना ही क्या है ॥ १७ ॥ ❀ ❀ इसके बाद भगवान् श्रीरामने ब्रह्मचर्य धारण करके तेरह हजार वर्षतक अखण्डरूपसे अग्निहोत्र किया ॥ १८ ॥ ❀ ❀ तदनन्तर अपना स्मरण करनेवाले भक्तोंके हृदयमें अपने उन चरणकमलोंको स्थापित करके, जो दण्डकवनके काँटोंसे बिंध गये थे, अपने स्वयंप्रकाश परम ज्योतिर्मय धाममें चले गये ॥ १९ ॥ ❀ ❀ परीक्षित्! भगवान्के समान प्रतापशाली और कोई नहीं है, फिर उनसे बढ़कर तो हो ही कैसे सकता है। उन्होंने देवताओंकी प्रार्थनासे ही यह लीला-विग्रह धारण किया था। ऐसी स्थितिमें रघुवंशशिरोमणि भगवान् श्रीरामके लिये यह कोई बड़े गौरवकी बात नहीं है उन्होंने अस्त्र शस्त्रोंसे राक्षसोंको मार डाला या समुद्रपर पुल बाँध दिया। भला, उन्हें शत्रुओंको मारनेके लिये बंदरोंकी सहायताकी भी आवश्यकता थी क्या? यह सब उनकी लीला ही है ॥ २० ॥ ❀ ❀ भगवान् श्रीरामका निर्मल यश समस्त पापोंको नष्ट कर देनेवाला है। वह इतना फैल गया है कि दिग्गजोंका श्यामल शरीर भी उसकी उज्ज्वलतासे चमक उठता है। आज भी बड़े-बड़े ऋषि-महर्षि राजाओंकी सभामें उसका गान करते रहते हैं। स्वर्गके देवता और पृथ्वीके नरपति अपने कमनीय किरीटोंसे उनके चरणकमलोंकी सेवा करते रहते हैं। उन्हीं रघुवंशशिरोमणि भगवान् श्रीरामचन्द्रकी शरण ग्रहण करता हूँ ॥ २१ ॥ ❀ ❀ जिन्होंने भगवान् श्रीरामका दर्शन और स्पर्श किया, उनका सहवास अथवा अनुगमन किया—वे सब-के-सब तथा कोसलदेशके निवासी भी उस लोकमें गये, जहाँ बड़े-बड़े योगी योगसाधनाके द्वारा जाते हैं ॥ २२ ॥ ❀ ❀ जो पुरुष अपने कानोंसे भगवान् श्रीरामका चरित्र सुनता है—उसे सरलता, कोमलता आदि गुणोंकी प्राप्ति होती है। परीक्षित्! केवल इतना ही नहीं, वह समस्त कर्म-बन्धनोंसे मुक्त हो जाता है ॥ २३ ॥ ❀ ❀ राजा परीक्षित्ने पूछा—भगवान् श्रीराम स्वयं अपने भाइयोंके साथ किस प्रकार व्यवहार करते थे? तथा भरत आदि भाई, प्रजाजन और अयोध्यावासी भगवान् श्रीरामके प्रति कैसा बर्ताव करते थे? ॥ २४ ॥

श्रीशुक उवाच

अथादिशद् दिग्विजये भ्रातॄंस्त्रिभुवनेश्वरः। आत्मानं दर्शयन् स्वानां पुरीमैक्षत सानुगः ॥ २५ ॥
आसिक्तमार्गां गन्धोदैः करिणां मदशीकरैः। स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥ २६ ॥

१. बादरायणिरुवाच।

प्रासादगोपुरसभाचैत्यदेवगृहादिषु[1] । विन्यस्तहेमकलशैः पताकाभिश्च मण्डिताम् ॥ २७ ॥
पूगैः सवृन्तै रम्भाभिः पट्टिकाभिः सुवाससाम् । आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणाम् ॥ २८ ॥
तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः । आशिषो युयुजुर्देव पाहीमां प्राक्[3] त्वयोद्धृताम् ॥ २९ ॥

ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ।
आरुह्य [4]हर्म्याण्यरविन्दलोचनमतृप्ननेत्राः कुसुमैरवाकिरन् ॥ ३० ॥
अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः । अनन्ताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥ ३१ ॥
विद्रुमोदुम्बरद्वारैर्वैदूर्यस्तम्भपङ्क्तिभिः । [5]स्थलैर्मारकतैः स्वच्छैर्भातस्फटिकभित्तिभिः ॥ ३२ ॥

कृष्णप्रिया व्याख्या

अन्वयः—अथ त्रिभुवनेश्वरः भ्रातॄन दिग्विजये आदिशत् सानुगः स्वानाम् आत्मानं दर्शयन् गन्धोदैः करिणां मदशीकरैः आसिक्तमार्गां वा स्वानाम् आलोक्य सुतरां मत्ताम् इव प्रासादगोपुरसभाचैत्यदेवगृहादिषु विन्यस्तहेमकलशैः पताकाभिः च मण्डितां सवृन्तैः पूगैः रंभाभिः सुवाससां पट्टिकाभिः आदर्शैः अंशुकैः स्रग्भिः कृतकौतुकतोरणां पुरीम् ऐक्षत ॥२५–२८॥ अर्हणपाणयः पौराः तत्र तत्र तम् उपेयुः देव त्वया प्राक् उद्धृताम् इमाम् अपि पाहि आशिषः युयुजुः ॥ २९ ॥ ❀ ❀ ततः दिदृक्षया उत्सृष्टगृहाः स्त्रियः नराः प्रजाः हर्म्याणि आरुह्य चिरागतम् अरविन्दलोचनं पतिं वीक्ष्य अतृप्ननेत्राः कुसुमैः अवाकिरन् ॥ ३० ॥ ❀ ❀ अथ स्वैः पूर्वराजभिः जुष्टम् अनंताखिलकोशाढ्यम् अनर्घ्योरुपरिच्छदं विद्रुमोदुम्बरद्वारैः वैदूर्यस्तंभपंक्तिभिः मारकतैः स्वच्छैः स्थलैः भातरफटिकभित्तिभिः ॥ ३१–३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र श्रीरामस्य भ्रात्रादिषु प्रवृत्तिप्रकारमाह अथेति । अनेनैव भ्रातॄणामपि तदाज्ञाऽनुसारितया प्रवृत्तिरुक्ता । अथ सिंहासनस्वीकारानंतरम् ॥ २५ ॥ ❀ ❀ पुरीं वर्णयति त्रिभिः । गंधोदकैर्मदबिंदुभिश्चासिक्ता मार्गा यस्याम् । सुतरां मत्तामिव समृद्धाम् । वा इति वितर्के । पाठांतरे वासितगां वासितां कामोन्मत्तां गामिवेत्यर्थः ॥ २६–२८ ॥ ❀ ❀ पौराणां तस्मिन्वृत्तिमाह । तमुपेयुरिति वराहरूपेण त्वयोद्धृतामिमां पृथ्वीं पाहीति ॥ २९ ॥ ❀ ❀ प्रजानां तस्मिन्वृत्तिमाह । ततः प्रजा इति ॥ ३० ॥ ❀ ❀ स्वयं कथमवर्ततेत्यस्योत्तरमाह । अथेति यावत्समाप्ति । स्वगृहं प्रविष्टः संस्तस्मिन् रेम इति पंचमेनान्वयः । गृहं वर्णयति । सार्द्धैस्त्रिभिः । अनंता येऽखिलानां रत्नादीनां कोशास्तैराढ्यम् । अनर्घ्या उरवः परिच्छदा यस्मिन् ॥ ३१ ॥ ❀ ❀ विद्रुममया उदुंबरा देहल्यो येषु तैर्द्वारैः । स्वच्छैः स्थलैः । तृतीयांतानां मंडितमिति तृतीयेनान्वयः ॥ ३२ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र त्रिषु प्रश्नेषु ॥ २५ ॥ ❀ ❀ आदिना प्रजादिग्रहः । अथ राज्यप्राप्तेरनंतरम् । अनेन दिग्विजयाज्ञापनेन । अनुवर्त्तिनं प्रत्येवाज्ञा दीयते न त्वननुवर्त्तिनमिति । स्वानां प्रजादीनाम् । पाठांतरे 'वासितगाम्' इति पाठे । इत्यर्थ इति व्याख्या ॥ २६ ॥ ❀ ❀ चैत्यं पाषाणादिबद्धं वृक्षमूलस्थलं बुद्धशालास्थलं वा । आदिना प्रजागृहादिग्रहः ॥ २७ ॥ संवृतैः क्रमुकफलगुच्छैः । सवृंतैः 'सुवृंतैः' इति पाठेऽप्ययमेवार्थः । रंभाभिः कदलीस्तम्भैः । सुवाससां बहुमूल्यवस्त्राणाम् । पट्टिका अल्पध्वजाः । यत्र कुत्र न्यस्तैरादर्शैर्दर्पणैः । स्रग्भिर्मालाभिः । वस्त्रैरापणमार्गस्तृतैः । एभिस्सह कृतकौतुकानि विरचितमंगलानि च तोरणानि गृहाग्रभागानि यस्यां ताम् । "गृहाणामग्रभागेऽपि तोरणं पल्लवस्रजि" इति धरणिः ॥२८॥ ❀ ❀ तस्मिन्नामे । तं श्रीरामम् । तत्र तत्र स्थले स्थिताः ॥ २९ ॥ ❀ ❀ तस्मिन् श्रीरामे । ततो रामराज्यावाप्तेरुत्तरम् ॥ ३० ॥ ❀ ❀ अथ पुरीदर्शनोत्तरकाले । अनर्घ्या अमूल्याः । उरवो बहवः । परिच्छदा उपकराः ॥ ३१ ॥ ❀ ❀ "उदुंबरस्तु देहल्यां वृक्षभेदे च पंडके । कुष्ठभेदेऽपि च पुमांस्ताम्रे तु स्यान्नपुंसकम् ।" इति मेदिनी । "विद्रुमो रत्नवृक्षेऽपि प्रवालेऽपि पुमानयम्" इति च । भाता दीप्ता याः स्फटिकभित्तयस्ताभिः । क्वचित् 'भ्राजत्स्फटिक'—इत्यपि पाठः ॥ ३२ ॥

---

१. सदस्सभाचैत्यगृहादिषु । २. युस्ततस्तत्र । ३. त्वयाऽऽवृताम् । ४. चनं न तृप्त० । ५. तथा स्थलैर्मारकतैर्भाति० ।

अन्वितार्थप्रकाशिका

तत्र भ्रात्रादिषु तस्य प्रवृत्तिमाह—अथेति। अथ त्रिभुवनेश्वरः श्रीरामो दिग्विजये भ्रातॄन् भरतादीन् आदिशत् अनेनैव भ्रातृणामपि तदाज्ञानुसारित्वं सूचितम्। स्वानां पौरादीनामात्मानं दर्शयन् सानुगः पुरीमयोध्यां सर्वत ऐक्षत ॥ २५ ॥ आसिक्तेति। गन्धोदैः चन्दनादिसुगन्ध्युदकैः करिणां हस्तिनां मदशीकरैर्मदबिन्दुभिश्च सिक्ता मार्गा यस्यां तां स्वामिनं श्रीरामं प्राप्तमालोक्य सुतरां मत्तामिव समृद्धाम्। जनैरालोकनं पुर्यामुपचर्यत इति सूचनार्थं इवशब्दः। वेति वितर्के। वासितगामिवेति पाठे कामोन्मत्तां गामिवेत्यर्थः। टजभाव आर्षः ॥ २६ ॥ ❀ ❀ प्रासादेति। प्रासादगोपुरादिषु विन्यस्तैः हेमकलशैः पताकाभिश्च मण्डिताम् ॥ २७ ॥ ❀ ❀ पूगैरिति। सवृन्दैः पुष्पफलादियुक्तैः पूगै रम्भाभिः सुष्ठुवाससां पट्टिकाभिर्ध्वजविशेषैश्च मण्डितामिति। आदर्शैर्दर्पणैः अंशुकैः स्रग्भिश्च कृतानि कौतुकेन उत्साहेन तोरणानि यस्यां तां पुरीमैक्षतेति पूर्वेणैवान्वयः ॥ २८ ॥ तस्मिन्पौराणां वृत्तिमाह—तमिति। अर्हणानि पूजासाधनानि पाणिषु येषां ते पौरास्तत्र तं राममुपेयुः उपजग्मुः। ततश्च हे देव! प्राग् वराहावतारे त्वयोद्धृतामिमां भूमि पाहीति प्रार्थयमाना आशिषो युयुजुश्च ॥ २९ ॥ ❀ ❀ तत इति। चिरादागतं पतिं श्रीरामं वीक्ष्य श्रुत्वा वनवासादागमनसमयभवश्रवणमिदं दिदृक्षया द्रष्टुमिच्छया उत्सृष्टा गृहा गृहकार्याणि याभिस्ताः स्त्रियो नराश्च प्रजा हर्म्याण्यारुरुहुः। तमरविन्दलोचनं वीक्ष्य न तृप्तानि नेत्राणि यासां ताः कुसुमैरवाकिरन् आच्छादितवत्यः ॥ ३० ॥ ❀ ❀ स्वयं कथमवर्त्ततेत्यस्योत्तरमाह—अथेति चतुष्कम। अथ पूर्वराजभिः इक्ष्वाकुप्रभृतिभिः। टजभावः आर्षः। जुष्टं सेवितमत एवानन्ता निरवधिका ये अखिला रत्नादीनां कोशास्तैराढ्यं समृद्धम् अनर्घ्या उरवः परिच्छदा यस्मिन् तत् विद्रुममया उदुम्बुरा देहल्यो येषु तैर्द्वारैरित्यादितृतीयान्तानां मण्डितमिति तृतीयेनान्वयः। वैदूर्यमणिमयस्तम्भानां पंक्तिभिः स्वच्छैः भ्राजन्तो ये स्फटिकास्तन्मयीभिर्भित्तिभिश्च चित्राभिः स्रग्भिः पट्टिकाभिर्ध्वजविशेषैः वाससां मणिगणानां चांशुकैर्दीप्तिभिः चित् चैतन्यं तद्वदुल्लासैरुज्ज्वलैर्मुक्ताफलैः। यद्वा। चिदिति क्वचिदर्थेऽव्ययम्। क्वचित् वैदूर्यस्तम्भादिषु यथाशोभमुज्ज्वलैर्मुक्ताफलैर्मण्डितमित्यर्थः। चक्रवर्त्ती तु चितश्चिच्छक्तेरुल्लासैश्चिन्मयैरिति सर्वेषां विशेषणं पुर्या अप्राकृतत्वात् इत्याह। कान्ताः कमनीयाः कामोपपत्तयो भोगसाधनानि ताभिः सुरभिभिर्धूपैर्दीपैश्च पुष्पाणां मण्डनैरलङ्कारैश्च मण्डितं तथा भूषणानामपि भूषणभूतैः शोभातिशययुक्तैः अत एव सुरसङ्काशैर्देवतुल्यैः स्त्रीपुंभिः स्त्रीपुंसैश्च जुष्टम्। समासान्ताभाव आर्षः ॥ ३१-३४ ॥

वीरराघवव्याख्या

तत्र श्रीरामस्य भ्रात्रादिषु वृत्तिप्रकारमाह— अथेति। अथ सिंहासनोपवेशनानन्तरं त्रिभुवनेश्वरः श्रीरामो दिगवनेदिक्पालने निमित्ते भ्रातॄनादिशत् अनेनैव भ्रातृणामपि तदाज्ञानुवृत्तिरुक्ता ततः स्वानां कौशल्यादीनाम् आत्मानं दर्शयन् सानुगः पुरीमयोध्यामैक्षत ॥ २५ ॥ ❀ ❀ पौराणां तस्मिन् अनुवृत्तिञ्ज्ञापयितुं तैरलङ्कृतां पुरीं वर्णयति, आसिक्तमार्गामिति त्रिभिः। गन्धोदकैः चन्दनोदकादिभिः स्वामिनं प्राप्तं प्राप्तराज्यमालोक्य सुतरां मत्तानामिव स्थितानां करिणां मदोदकशीकरैश्चासिक्ताः मार्गाः यस्यां मत्तां वेति पाठान्तरं तत्र सुतरां मत्तामिवेति पुरोविशेषणं वाशब्दो वितर्के ॥ २६ ॥ प्रासादादिषु विन्यस्तैः स्वर्णकुम्भैः पताकाभिश्च मण्डिताम् ॥ २७ ॥ ❀ ❀ पूगैस्संवृताः या रम्भाः कदल्यस्ताभिः नित्यसापेक्षत्वात् संवृतशब्दस्य समासः यद्वा, पूगैश्च पत्रफलपुष्पादिसंवृताभिः रम्भाभिश्च वाससां पट्टिकाभिश्च मण्डितामिति पूर्वेणान्वयः। आदर्शैर्दर्पणैरंशुकैः, स्रग्भिश्च कृतानि कौतुकानि मङ्गलार्थानि तोरणानि यस्यां तां पुरीमैक्षतेत्यन्वयः ॥ २८ ॥ पौराणां तस्मिन् वृत्तिमाह—ततश्चार्हणानि पूजासाधनानि पाणिषु येषां तैः पौरास्तत्र तत्र तं श्रीराममुपेयुरुपजग्मुः देव! प्राक् वराहावतारे त्वयोद्धृतां पृथिवीं पाहीति प्रार्थयमानाः आशिषो युयुजुः प्रयुक्तवन्तः ॥ २९ ॥ ❀ ❀ तस्मिन् प्रजानामनुवृत्तिमाह—तमिति। चिरादागतं पतिं श्रीरामं वीक्ष्याकर्ण्य स्त्रियो नराश्च प्रजाः दिदृक्षया उत्सृष्टा गृहा याभिस्ताः हर्म्याण्यारुह्य अतृप्तानि नेत्राणि यासां ताः अरविन्दलोचनं श्रीरामं कुसुमैरवाकिरन् यद्वा चिरागतं पतिं द्रष्टुमिच्छया उत्सृष्टगृहाः स्त्रियो नराश्च प्रजा हर्म्याण्यारुह्य वीक्ष्याऽतृप्तनेत्राः कुसुमैरवाकिरन्नित्यन्वयः ॥ ३० ॥ ❀ ❀ स्वयं कथमवर्त्ततेत्यस्योत्तरमाह—अथेति, यावदध्यायसमाप्ति। स्वयं गृहं प्रविष्टः तस्मिन् भगवान् स्वारामधीराणामात्माराममुनिजनश्रेष्ठानामृषभो अभिनायकः रामः प्रिया चेष्टा यस्यास्तया स्निग्धया निरतिशयानुरागवत्या सीतया सह रेम इति पञ्चमेनान्वयः। गृहं वर्णयति—पूर्वराजभिरिक्ष्वाकुप्रभृतिभिर्जुष्टं सेवितं प्रीतिविषयीकृतं वा अनन्ता निरवधिका ये अखिला रत्नादीनां कोशास्तैराढ्यं समृद्धम् अनर्घा उरवः परिच्छदा यस्मिन् विद्रुममया उदुम्बरा देहल्यो येषु तैर्द्वारैः तृतीयान्तानां मण्डितमिति तृतीयेनान्वयः। वैदूर्यमणिमयस्तम्भानां पंक्तिभिः स्वच्छैरिन्द्रनीलमणिमयैः स्थलैः प्रदेशैः दान्ताः घर्षणेन निर्मलीकृताः स्फटिकाः तन्मयीभिर्भित्तिभिः ॥ ३१-३२ ॥

विजयध्वजतीर्थकृता पदरत्नावली

प्रथमतृतीयप्रश्नौ परिहरति—अथेति। अथ राज्याभिषेकानन्तरं भ्रात्रादौ स्वाज्ञाकारित्वेनाऽवर्तत त्रिदशेश्वर इत्यनेन मानवेश्वरत्वं किं वक्तव्यमित्यसूचि तेन लोकाऽनुकरणायेयं क्रीडेति कथितमित्यर्थः। द्वितीयं परिहरति—आत्मानमिति। स्वात्मसन्दर्शनेन जनस्यानन्दजनकत्वेन राम इति बुद्धिं जनयामासेत्यर्थः। पुरीनिरीक्षणं च स्वभक्तानुकम्पित्वप्रदर्शनाय ॥ २५ ॥ गन्धोदैः चन्दनादिगन्धद्रव्यमिश्रजलैः लङ्कायाः नाथं रावणं निहत्य प्राप्तं स्वामिनमालोक्य सुतरां हर्षेण मत्तामिव करिणीं मदशीकरैः मदजलबिन्दुभिर्वा मत्तामिव स्थिताम् ॥ २६ ॥ ❀ ❀ चैत्यं पाषाणादिभिर्बद्धं वृक्षमूलस्थलं बद्धशालास्थलं वा ॥ २७ ॥ ❀ ❀ संवृतैः फलस्तबकसहितैः पूगैः क्रमुकैः रम्भाभिः कदलीस्तम्भैः आदर्शैः दर्पणैरंशुकैर्वस्त्रैः स्रग्भिः मालाभिश्च कृतकौतुकानि रचितमङ्गलानि च तोरणानि यस्यां सा तथा ताम् ॥ २८ ॥ ❀ ❀ प्राक् वराहाऽवतारे त्वया पातालादुद्धृतां भुवमिति शेषः ॥ २९-३१ ॥ ❀ ❀ विद्रुमैरुदुम्बरैस्ताम्रैः कृतद्वारैः "ताम्रं शुल्वं मर्कटाख्यं रक्तं कांस्यमुदुम्बरम्" इति ॥ ३२ ॥

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भ्रातॄन् दिग्विजये आदिशदिति भ्रातॄणां तदर्शनरूपं स्वसुखमपि परिहाय तदाज्ञापालनरूपा तस्मिननुवृत्तिरुक्ता रामस्यापि तेषु स्नेहात्तद्देशाधिकारदानरूपा वृत्तिरुक्ता, स्वानां स्वाः प्रजाः पौराश्चेति प्रजासु पौरेषु च स्वदर्शनकृपावलोकादिदानरूपा तस्य वृत्तिरुक्ता। पुरीमैक्षतेति स्वयं कथमवर्त्ततेत्यस्योत्तरम् अतस्तस्येक्षणीयां पुरीं वर्णयति—आसिक्तेत्यादि। सुतरां मत्तामिव समृद्धां, वेति वितर्के वासितां गामिवेति पाठे। वासितां कामोन्मत्तां गामिवेत्यर्थः। समासान्ताभाव आर्षः ॥ २५-२८ ॥ ❀ ❀ पौराणां तस्मिन्ननुवृत्तिमाह—तमिति। इमां पृथ्वीं प्राक् वराहरूपेण ॥ २९ ॥ प्रजानां तस्मिन् वृत्तिमाह—तत इति। चिरागतमिति वनवासादागमनसमयभवदर्शनमिदं ज्ञेयम् ॥ ३० ॥ ❀ ❀ स्वयं कथमवर्त्ततेत्यस्योत्तरं विस्तरेण पुनराह—अथेत्यादिना ॥ ३१ ॥ ❀ ❀ विद्रुममया उदुम्बरा देहल्यो येषु तैर्द्वारैः तृतीयान्तानां मण्डितमिति तृतीयेनाऽन्वयः ॥ ३२ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

उत्तरमाह—अथेति। अथ सिंहासनस्वीकारानन्तरं त्रिभुवनेश्वरः भ्रातॄन् दिग्विजय आदिशत् अनेन श्रीरामस्य भ्रातॄन् प्रति दिग्गतधर्मादिरक्षणे आज्ञाप्रदत्वेन वृत्तिरुक्ता अस्य श्रीरामस्य पौरादिषु तस्मिन् पौरादीनां च वृत्तिम् आत्मानमित्यादीनां कुसुमैरवाकिरन्नित्यन्तेनाह ॥ २५ ॥ ❀ ❀ गन्धोदैः करिणां मदशीकरैर्मदबिन्दुभिश्च आसिक्ता मार्गा यस्यान्तां स्वामिनं प्राप्तमालोक्य सुतरां मत्तामिव ॥ २६-२८ ॥ ❀ ❀ इमां पृथिवीं त्वया वराहमूर्तिना ॥ २९-३० ॥ स्वयं कथमवर्त्ततेत्यस्योत्तरमाह—अथेत्यध्यायशेषेण। स्वगृहं प्रविष्टः रेमे इति पञ्चमेनान्वयः ॥ ३१ ॥ ❀ ❀ विद्रुममणिमयाः उदुम्बरा देहल्यो येषु तैर्द्वारैः तृतीयान्तानां मण्डितमिति तृतीयेनाऽन्वयः ॥ ३२ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

तत्र भ्रात्रादिषु श्रीरामस्य वृत्तिप्रकारमाह—अथेति। अथ राजसिंहासनस्वीकारानन्तरं त्रिभुवनेश्वरः श्रीरामो दिग्विजयाय भ्रातॄन् भरतादीन् आदिशत्। अनेनैव भ्रातॄणामपि तदाज्ञानुसारित्वं सूचितम्। स्वानां पौरादीनामात्मानं दर्शयन् सानुगः पुरीमयोध्यां सर्वत ऐक्षत ॥ २७ ॥ ❀ ❀ तां रामेण दृष्टां पौरैरलङ्कृतां पुरीं वर्णयति—त्रिभिः। गन्धोदैः चन्दनादिसुगन्ध्युदकैः करिणां हस्तिनां मदशीकरैर्मदबिन्दुभिश्च सिक्ता मार्गा यस्यां ताम्। स्वामिनं श्रीरामं प्राप्तमालोक्य सुतरां मत्तामिव समृद्धाम् जनैरालोकनं पुर्यामुपचर्यते इति सूचनार्थं इवशब्दः। वेति वितर्के। वासितगामिवेति पाठे कामोन्मत्तां गामिवेत्यर्थः ॥ २६ ॥ ❀ ❀ प्रासादादिषु विन्यस्तैः स्वर्णकलशैः पताकाभिश्च मण्डितां शोभिताम् ॥ २७ ॥ ❀ ❀ संवृतैः पुष्पफलादियुक्तैः पूगै रम्भाभिः सुष्ठु वाससां पट्टिकाभिर्ध्वजविशेषैश्च मण्डितामिति पूर्वेणैवान्वयः। आदर्शैर्दर्पणैः अंशुकैः स्रग्भिश्च कृतानि कौतुकेन उत्साहेन तोरणानि यस्यां तां पुरीमैक्षतेति पूर्वेणैवान्वयः ॥ २८ ॥ ❀ ❀ तस्मिन् पौराणां वृत्तिमाह—तमिति। अर्हणानि पूजासाधनानि पाणिषु येषां ते पौरास्तत्र तं राममुपेयुः उपजग्मुः। ततश्च हे देव प्राग्वराहावतारे त्वयोद्धृतामिमां भूमिं पाहीति प्रार्थयमाना आशिषो युयुजुश्च ॥ २९ ॥ ❀ ❀ तस्मिन् प्रजानामनुवृत्तमाह—तत इति। चिरादागतं पतिं श्रीरामं दिदृक्षया द्रष्टुमिच्छया उत्सृष्टा गृहा गृहकार्याणि याभिस्ताः स्त्रियो नराश्च प्रजाः हर्म्याण्या-

रुरुहुः। तमरविन्दलोचनं वीक्ष्य न तृप्तानि नेत्राणि यासां ताः कुसुमैरवाकिरन् आच्छादितवन्त्य इत्यन्वयः ॥ ३० ॥ ❀ ❀ स्वयं कथमवर्त्ततेत्यस्योत्तरमाह—अथेति यावदध्यायसमाप्ति। अथ पुरीदर्शनानन्तरं स्वगृहं प्रविष्टः सन् रामः सीतया सह रेमे इति पञ्चमेनान्वयः तद्गृहं वर्णयति—जुष्टमिति। पूर्वराजभिरिक्ष्वाकुप्रभृतिभिः जुष्टं सेवितम्, अतएवानन्ता निरवधिका ये अखिला रत्नादीनां कोशास्तैराढ्यं समृद्धम्। अनर्घ्या उरवः परिच्छदा यस्मिंस्तत् ॥ ३१ ॥ ❀ ❀ विद्रुममया उदुम्बरा देहल्यो येषु तैर्द्वारैरित्यादितृतीयान्तानां मण्डितमिति तृतीयेनान्वयः। वैदूर्यमणिमयस्तम्भानां पङ्क्तिभिः। स्वच्छैः मरकतमणिमयैः स्थलैः। भ्राजन्तो ये स्फटिकास्तन्मयीभिः भित्तिभिश्च ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्र श्रीरामस्य भ्रात्रादिषु वृत्तिप्रकारमाह। अथेति। अथ सिंहासनोपवेशनानन्तरं, त्रिभुवनेश्वरः श्रीरामः, दिगवने दिक्पालने निमित्ते, भ्रातॄन् आदिशत। अनेन भ्रातॄणामपि तदाज्ञानुवृत्तिरुक्ता। दिग्विजये इति पाठे, भ्रातॄन्, दिग्विजये, आदिशत् इति। ततः, स्वानां, कौशल्यादीनां, आत्मानं दर्शयन्, सानुगः पुरीमयोध्यां, ऐक्षत। आत्मानं दर्शयन्नित्यनेन आत्मीयेषु पौरादिषु च स्वस्य वर्त्तनमुक्तम् ॥ २५ ॥ ❀ ❀ पौराणां तस्मिन् वृत्तिं ख्यापयितुं तैरलंकृतां पुरीं वर्णयति त्रिभिः। आसिक्तेति। स्वामिनं प्राप्तं प्राप्तराज्यम् आलोक्य, सुतरां मत्तानाम् इव स्थितानामिति शेषः। करिणां, मदशीकरैः मदोदकशीकरैः, गन्धोदैः चन्दनोदकादिभिश्च आसिक्ता मार्गा यस्यां ताम् ॥ २६ ॥ ❀ ❀ प्रासादेति। प्रासादाश्च गोपुराणि च सभाश्च चैत्यानि च देवगृहाणि च आदयो येषां तेषु, तत्र प्रासादा राज्ञो गृहाणि, गोपुराणि पुरद्वाराणि, सभाः सभागृहाणि, चैत्यानि पाषाणादिभिर्बद्धानि पिप्पलादिवृक्षमूलस्थलानि, देवगृहाणि प्रासादाः, 'प्रासादो देवभूभुजाम्' इत्यभिधानात्। विन्यस्ता ये हेमकलशाः स्वर्णकुम्भास्तैः, पताकाभिश्च, मण्डिताम् ॥ २७ ॥ ❀ ❀ पूगैरिति। सवृन्दैः समूहभूतैः, सवृन्तैरिति पाठे सवृन्तैः फलस्तबकसहितैः, पूगैः क्रमुकैः, रम्भाभिः, कदलीस्तम्भैः, सुवाससां शोभनवसनानां, पट्टिकाभिः वितानैः, आदर्शैर्मुकुरैः, अंशुकैः वसनैः, स्रग्भिर्मालाभिश्च, कृतानि कौतुकानि मङ्गलानि तोरणानि च यस्यां तां, एवंभूतां पुरीमैक्षतेति संबन्धः ॥ २८ ॥ ❀ ❀ पौराणां प्रजानां तस्मिन् वृत्तिमाह द्वाभ्याम्। तमिति। ततः, अर्हणानि पूजासाधनानि पाणिषु येषां ते, पौराः तत्र तत्र, ते तं श्रीरामम् उपेयुरुपजग्मुः। हे देव, प्राग्वराहावतारे, त्वया उद्धृतां, इमां पृथिवीं, पाहि। इति, आशिषः, युयुजुः ॥ २९ ॥ ❀ ❀ तत इति। ततः, प्रजाः भगवतः प्रजाभूताः स्त्रियः, नराश्च, चिरागतं पतिं श्रीरामं, वीक्ष्याकर्ण्य, दिदृक्षया द्रष्टुमिच्छया, उत्सृष्टगृहाः परित्यक्तगृहकृत्याः सत्यः सन्तश्च, हर्म्याणि स्वस्वगृहाणि स्वगृहसंबन्धिद्वित्रिचतुर्भौमानीत्यर्थः। आरुह्य अरविन्दलोचनं कमलनयनं श्रीरामं, वीक्षन्त्यः वीक्षन्तस्तथापीति शेषः। अतृप्तनेत्राः सत्यः सन्तश्च, कुसुमैः अवाकिरन् ॥ ३० ॥ ❀ ❀ स्वयं कथमवर्त्ततेत्यस्योत्तरमाहाथेति यावदध्यायसमाप्ति। अथेति। अथ स्वैः, पूर्वराजभिः जुष्टं, अनन्ता ये अखिला रत्नादीनां कोशास्तैराढ्यं, अनर्घ्या अमूल्या उरवो बहवः परिच्छदा यस्मिंस्तत् स्वगृहं प्रविष्टः सन्, रामः सीतया, रेमे इति पञ्चमश्लोकगतेनान्वयः ॥ ३१ ॥ ❀ ❀ पुनर्गृहं वर्णयति। विद्रुमेति। विद्रुममया उदुम्बरा देहल्यो येषु तानि यानि द्वाराणि तैः, तृतीयान्तानां मण्डितमिति तृतीयेनान्वयः। वैदूर्याणां स्तम्भानां याः पङ्क्तयस्ताभिः, स्वच्छैः, मारकतैर्मरकतमणिमयैः, स्थलैः, भ्राजन्त्यश्च ताः स्फटिकभित्तयश्च ताभिः दान्तस्फटिकभित्तिभिरिति पाठे, दान्ताः संघर्षणेन निर्मलीकृताः याः स्फटिकमय्यो भित्तयस्ताभिः ॥ ३२ ॥

भाषानुवादः

श्रीशुकदेवजी कहते हैं—त्रिभुवनपति महाराज श्रीरामने राजसिंहासन स्वीकार करनेके बाद अपने भाइयोंको दिग्विजयकी आज्ञा दी और स्वयं अपने निजजनोंको दर्शन देते हुए अपने अनुचरोंके साथ वे पुरीकी देखरेख करने लगे ॥२५॥ उस समय अयोध्यापुरीके मार्ग सुगन्धित जल और हाथियोंके मदकणोंसे सिंचे रहते। ऐसा जान पड़ता, मानो यह नगरी अपने स्वामी भगवान् श्रीरामको देखकर अत्यन्त मतवाली हो रही है ॥२६॥ ❀ ❀ उसके महल, फाटक, सभाभवन विहार और देवालय आदिमें सुवर्णके कलश रक्खे हुए थे और स्थान-स्थानपर पताकाएँ फहरा रही थीं ॥ २७ ॥ वह डंठलसमेत सुपारी, केलेके खंभे और सुन्दर वस्त्रोंके पट्टोंसे सजायी हुई थी। दर्पण, वस्त्र और पुष्पमालाओंसे तथा माङ्गलिक चित्रकारियों और बंदनवारोंसे सारी नगरी जगमगा रही थी ॥ २८ ॥ ❀ ❀ नगरवासी अपने हाथोंमें तरह-तरहकी भेटें लेकर भगवान्के पास आते और उनसे प्रार्थना करते कि 'देव ! पहले आपने ही वराहरूपसे पृथ्वीका उद्धार किया था, अब आप ही इसका पालन कीजिये ॥ २९ ॥ ❀ ❀ परीक्षित् ! उस समय जब प्रजाको मालूम होता था कि बहुत दिनोंके बाद भगवान् श्रीराम इधर पधारे हैं, तब सभी स्त्री-पुरुष उनके दर्शनकी लालसासे घर-द्वार छोड़कर दौड़ पड़ते थे।

वे ऊँची-ऊँची अटारियोंपर चढ़ जाते और अतृप्त नेत्रोंसे कमलनयन भगवान्‌को देखते हुए उनपर पुष्पोंकी वर्षा करते थे ॥३०॥ इस प्रकार प्रजाका निरीक्षण करके भगवान् फिर अपने महलोंमें आ जाते थे। उनके वे महल पूर्ववर्ती राजाओंके द्वारा सेवित थे। उनमें इतने बड़े-बड़े सब प्रकारके खजाने थे, जो कभी समाप्त नहीं होते थे। वे बड़ी-बड़ी बहुमूल्य बहुत-सी सामग्रियोंसे सुसज्जित थे ॥ ३१ ॥ ❀ ❀ महलोंके द्वार तथा देहलियाँ मूँगेकी बनी हुई थीं। उनमें जो खंभे थे, वे वैदूर्यमणिके थे। मरकतमणिके बड़े सुन्दर-सुन्दर फर्श थे, तथा स्फटिकमणिकी दीवारें चमकती रहती थीं ॥ ३२ ॥

चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः । मुक्ताफलैश्चिदुल्लासैः कान्तकामोपपत्तिभिः ॥ ३३ ॥
धूपदीपैः सुरभिर्मण्डितं पुष्पमण्डनैः[1] । स्त्रीपुम्भिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ॥ ३४ ॥
तस्मिन् स भगवान् रामः स्निग्धया प्रिययेष्टया । रेमे स्वारामधीराणामृषभः सीतया किल ॥ ३५ ॥
बुभुजे[2] च यथाकालं कामान् धर्ममपीडयन् । वर्षपूगान् बहून् नृणामभिध्याताङ्घ्रिपल्लवः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे [3]श्रीरामोपाख्याने एकादशोऽध्यायः ॥ ११ ॥

कृष्णप्रिया व्याख्या

अन्वयः—चित्रस्रग्भिः पट्टिकाभिः वासोमणिगणांशुकैः चिदुल्लासैः मुक्ताफलैः कान्तकामोपपत्तिभिः धूपदीपैः पुष्पमण्डनैः मंडितं सुरसंकाशैः भूषणभूषणैः स्त्रीपुंभिः जुष्टम् (स्वगृहं प्रविष्टः) ॥३३-३४॥ ❀ ❀ स्वारामधीराणाम् ऋषभः सः भगवान् रामः तस्मिन् स्निग्धया प्रियया इष्टया सीतया रेमे किल ॥ ३५ ॥ ❀ ❀ नृणाम् अभिध्यातांघ्रिपल्लवः च बहून् वर्षपूगान् धर्मम् अपीडयन् यथाकालं कामान् बुभुजे ॥ ३६ ॥

इति नवमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वाससां मणिगणानां चांशुकैर्दीप्तिभिः। चित् चैतन्यं तद्वदुल्लासैरुज्ज्वलैः। यद्वा चिदिति क्वचित् वैदूर्यस्तंभादिषु यथाशोभमुज्ज्वलैर्मुक्ताफलैर्मंडितमित्यर्थः। कांताः कमनीयाः। कामोपपत्तयो भोगसाधनधूपदीपैः सुरभिर्मंडितं पुष्पमंडनैः। स्त्रीपुंभिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ॥ ३४ ॥ ❀ ❀ तस्मिन् स भगवान्रामः स्निग्धया प्रिययेष्टया। रेमे स्वारामधीराणामृषभः सीतया किल ॥ ३५ ॥ ❀ ❀ बुभुजे च यथाकालं कामान्धर्ममपीडयन्। वर्षपूगान्बन्नृणामभिध्यातांघ्रिपल्लवः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कंधे श्रीरामोपाख्यानं नामैकादशोऽध्यायः ॥ ११ ॥

वंशीधरकृतो भावार्थदीपिकाप्रकाशः

पट्टिकाभिर्वितानैः। "लाक्षायां च वितानेऽपि पट्टिकाल्पध्वजेंशुके" इति निरुक्तिः। यद्वा-चिदव्ययं क्वचिदर्थे इत्यर्थ इति। शुद्धचैतन्यवद्देदीप्यमानमिति भावः ॥३३-३४॥ ❀ ❀ तस्मिन् गृहे। प्रियामनआह्लादकरी चेष्टा व्यवहारो यस्यास्तया। स्वारामधीराणां ज्ञानिनाम्। ऋषभः प्रियः ॥ ३५ ॥ ❀ ❀ निर्द्धारणार्थषष्ठीस्वीकारे भगवतो नरत्वमापतेत्तद्धारणाय यद्वेति। तृतीयार्थे षष्ठी ज्ञेया ॥ ३६ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

अन्वितार्थप्रकाशिका

तस्मिन्निति। स्वस्मिन्नात्मन्येवारमन्तीति स्वारामास्ते च ते धीरा विनिर्जितेन्द्रियाश्च तेषामृषभः श्रेष्ठः भगवान् रामः तस्मिन् गृहे स्निग्धया अत एव प्रिया चेष्टा आचारो यस्यास्तया सीतया रेमे ॥ ३५ ॥ ❀ ❀ बुभुजे इति। नृणां नृभिः

---

१. मण्डनैः। २. बुभुजे स कामानन्यानपीयन्। ३. प्राचीने पाठे 'श्रीरामोपाख्याने' अयमंशो न।

अभिध्यातावङ्घ्रिपल्लवौ यस्य सः श्रीरामः धर्ममपीडयन् विषयासक्त्या स्वधर्ममसङ्कोचयन् बहून् वर्षपूगान् संवत्सरसमूहान् यथाकामं यथेष्टं कामान् विषयांश्च बुभुजे ॥ ३६ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । नवमस्य व्यधादेकादशे गङ्गासहायकः ॥
इति श्रीमद्भागवते महापुराणे नवमस्कन्धेऽन्वितार्थप्रकाशिकायामेकादशोऽध्यायः ॥ ११ ॥

वीरराघवव्याख्या

विचित्राभिः स्रग्भिः पताकाभिश्च वाससां मणिगणानामंशुकैः पङ्क्तिभिः चिच्चैतन्यं तद्वदुल्लासैरुज्ज्वलैः मुक्ताफलैः यद्वा चिदिति पृथक्पदमव्ययम् क्वचिद्वैदूर्यस्तम्भादिषु यथाशोभमुज्ज्वलैर्मुक्ताफलैर्मण्डितमित्यर्थः । कान्ताः कमनीयाः कामोपपत्तयो भोगसाधनानि ताभिः सुरभिभिर्धूपैर्दीपैश्च मण्डितं पुष्पाणि मण्डनमलङ्कारो येषां भूषणैर्मुषितास्तैः सुरसङ्काशैः देवतुल्यैः स्त्रीपुम्भिः समासान्ताभावस्तस्यानित्यत्वात् आर्षत्वाद्वा जुष्टं सेवितं कामान् यथाकालमुचितकालमनतिक्रम्य बहून् वर्षगणान् बुभुजे कथम्भूतस्सन् ? स्वधर्मं वर्णाश्रमोचितमपीडयन् अनुपरुन्धन् अत्यजन्नित्यर्थः । नृणामितिशेषे षष्ठी नृभिरभिध्यातमङ्घ्रिपल्लवं यस्य तथाभूतस्सन् ॥ ३३–३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम् एकादशोऽध्यायः ॥ ११ ॥

विजयध्वजतीर्थकृता पदरत्नावली

कान्तं शोभितं पट्टिकाभिर्वितानैः ॥ ३३ ॥ ❀ ❀ भूषणानामपि भूषणैः ॥ ३४ ॥ ❀ ❀ स्वारामाः शोभनोद्यानानि तत्र चारो येषां ते स्वारामचारास्तेषामृषभः निरन्तरं चारुतरोद्यानेषु सञ्चरताम् ईश्वर इत्यनेनातीव सौख्यं सूचयति—अनेनापि सीतावियोगो नास्तीत्युक्तं भवति । किञ्च सीतया नित्यरमणात्स्वयं सुखरूपत्वात्प्रजानां सुखहेतुत्वात्सर्वजनचित्तविलयत्वेन राम इति भावः ॥ ३५–३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकादशोऽध्यायः ॥ ९ ॥

(विजयध्वजरीत्या नवमः)

विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वाससां मणिगणानां चांशुकैः चितश्चिच्छक्तेरुल्लासैर्विलासैश्चिन्मयैरिति सर्वेषां विशेषणमिदं पुण्र्या अप्राकृतत्वात् कान्ता कमनीया भोगानां उपपत्तिः सिद्धिर्यतस्तैरित्यपि सर्वेषां विशेषणम् ॥ ३३–३४ ॥ ❀ ❀ तस्मिन् स्वगृहे ॥ ३५ ॥ नृणां नृभिः ॥ ३६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकादशोऽयं नवमे सङ्गतः सङ्गतः सताम् ॥ ११ ॥

शुकदेवकृतः सिद्धांतप्रदीपः

वाससां मणिगणानां चांशुकैः दीप्तिभिः चिच्चैतन्यं तद्वदुल्लासैरुज्ज्वलैर्मुक्ताफलैः यद्वा चिदुल्लासैश्चिच्चेतनमात्रस्योल्लास आनन्दविशेषो येभ्यस्तैः कान्ताः कमनीयाः कामोपपत्तयो भोगोपकरणविभूतयस्ताभिः ॥ ३३ ॥ ❀ ❀ पुष्पाणि एव मण्डनानि अलङ्कारास्तैश्च मण्डितं भूषणानामपि भूषणभूतैः स्त्रीपुम्भिर्जुष्टम् ॥ ३४–३५ ॥ ❀ ❀ नृणां नृभिः अभिध्याताङ्घ्रिपल्लवस्सन् सीतया सह रेमे ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकादशोऽध्यायार्थप्रकाशः ॥ ११ ॥

गोस्वामिगिरिधरलालविहिता बालप्रबोधिनी

चित्राभिः स्रग्भिः । पट्टिकाभिर्ध्वजविशेषैः वाससां मणिगणानां चांशुकैः दीप्तिभिः । चित् चैतन्यं तद्वदुल्लासैरुज्ज्वलैर्मुक्ताफलैर्वैदूर्यस्तम्भादिषु यथाशोभं स्थितैः । कान्ताः कमनीयाः कामोपपत्तयो भोगसाधनानि ताभिः ॥ ३३ ॥ ❀ ❀ सुरभिभिर्धूपैर्दीपैश्च । पुष्पाणां मण्डनैरलङ्कारैश्च । तथा भूषणानामपि भूषणभूतैः शोभातिशययुक्तैः अतएव सुरसङ्काशैर्देवतुल्यैः स्त्रीपुम्भिश्च जुष्टम् ॥ ३४ ॥ ❀ ❀ सीतायास्तदानुकूल्यमाह—स्निग्धया स्नेहातिशयवत्या अत एव प्रिया चेष्टा आचारो यस्यास्तया । एवमुक्तौ प्रतीतां विषयासक्तिं वारयन् विशिनष्टि—स्वारामेति । स्वस्मिन्नात्मन्येवारमन्तीति स्वारामास्ते च ते धीरा

विनिर्जितेन्द्रियान्तःकरणाश्च तेषामृषभः श्रेष्ठ इत्यर्थः। तत्र हेतुमाह—भगवानिति। तस्य जितेन्द्रियत्वं बहुशास्त्रसम्मतमित्याशयेनाह—किलेति ॥ ३५ ॥ ❀ ❀ नृणां नृभिः अभिध्यातावङ्घ्रिपल्लवौ यस्य सः श्रीरामः धर्ममपीडयन् वर्णाश्रमाधिकारप्राप्तं स्वधर्ममजहन् बहून् वर्षपूगान् संवत्सरसमूहान् यथाकामं यथेष्टं कामान् विषयांश्च बुभुजे इत्यन्वयः ॥ ३६ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता नवमे तत्र सूर्यवंशनिरूपणे। एकादशो विवृतोऽध्यायो रामवृत्तनिरूपकः ॥ ३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चित्रेति। चित्राश्च ताः स्रजश्च ताभिः, पट्टिकाभिर्वितानैः, वाससां मणिगणानां च अंशुकैः पङ्क्तिभिः, किरणैर्वा। चिच्चैतन्यं तद्वदुल्लासैरुज्ज्वलैः, मुक्ताफलैर्मौक्तिकैः, कान्ताः कमनीयाः कामोपपत्तयो भोगसाधनानि ताभिः ॥ ३३ ॥ ❀ ❀ धूपैरिति। सुरभिभिः सुगन्धिभिः, धूपैः दीपैः, मण्डितम्। पुष्पाणि मण्डनमलंकारो येषां तैः, सुरसंकाशैर्देवतासमानैः, भूषणभूषणैर्भूषणान्यपि भूषयद्भिः, स्त्रीपुम्भिः, जुष्टम्। समासान्ताभावोऽनित्यत्वादार्षत्वाद्वा ॥ ३४ ॥ ❀ ❀ तस्मिन्निति। भगवान् सः श्रीरामः, तस्मिन्नुक्तविधस्वभवने, प्रविश्य, स्निग्धया इष्टया स्निह्यन्त्या इत्यर्थः। प्रिया चेष्टा यस्यास्तया, सीतया सह, स्वारामा आत्मारामाश्च ते धीराश्च तेषाम् ऋषभः श्रेष्ठः, गुरुरिति यावत्। एवंभूतः सन्, रेमे किल ॥ ३५ ॥ ❀ ❀ बुभुजे इति। नृणां नृभिरित्यर्थः। अभिध्यातमङ्घ्रिपल्लवं यस्य सः, स रामः, यथाकालं तत्तत्कालमनतिक्रम्य, बहून् वर्षपूगान् वर्षगणान्, धर्मम् अपीडयन् कामान् बुभुजे च ॥ ३६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां नवमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

भाषानुवादः

रंग बिरंगी मालाओं, पताकाओं, मणियोंकी चमक, शुद्ध चेतनके समान उज्ज्वल मोती, सुन्दर-सुन्दर भोग-सामग्री सुगन्धित धूप-दीप तथा फूलोंके गहनोंसे वे महल खूब सजाये हुए थे। आभूषणोंको भी भूषित करनेवाले देवताओंके समान स्त्री-पुरुष उसकी सेवामें लगे रहते थे ॥ ३३-३४ ॥ ❀ ❀ परीक्षित ! भगवान् श्रीरामजी आत्माराम जितेन्द्रिय पुरुषोंके शिरोमणि थे। उसी महलमें वे अपनी प्राणप्रिया प्रेममयी पत्नी श्रीसीताजीके साथ विहार करते थे ॥ ३५ ॥ ❀ ❀ सभी स्त्री-पुरुष जिनके चरणकमलोंका ध्यान करते रहते हैं, वे ही भगवान् श्रीराम बहुत वर्षोंतक धर्मकी मर्यादाका पालन करते हुए समयानुसार भोगोंका उपभोग करते रहे ॥ ३६ ॥

इति नवमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥